नेपाल-भारत-संस्कृत-सम्मेलन-स्मारिका

नेपाल-भारतयोः एका सम्पत्

# संस्कृतं वाक्



प्रधानसम्पादकः

प्रो. श्रीनिवासवरखेडी

सम्पादकाः

प्रो. काशीनाथन्यौपाने डॉ. प्रेमराजन्यौपाने

डॉ. दीपक अधिकारी डॉ . नितिनकुमारजैनः

केन्द्रीयसंस्कृतविश्वविद्यालयः

# सम्पादकीयम्

नेपाल–भारतभूमिः संस्कृतभाषा–साहित्य–ज्ञान विज्ञान – संस्कृति–सभ्यता विषयवस्तूनामुद्गमस्थल्यस्तीति सार्वजनीनं तथ्यमिदं वर्वर्तिसर्वोपरि । अनया दृष्ट्या द्वयोरपि राष्ट्रयोः समग्रसंयुक्तसम्पत्तिः संस्कृतभाषैवेति न तिरोहितं विदुषाम्। द्वयोरपि देशयोर्वर्तमानकालिकमौपचारिकं शिक्षणं यदा प्रारभत ततः पूर्वमेव संस्कृतवाङ्मयस्याध्ययनाध्यापनयोर्व्यवस्था भिन्नसंस्थानां माध्यमेन भवति स्मेति सुप्रसिद्धमिदं तथ्यम् । भारतस्थ–विभिन्नक्षेत्रस्थ–शिक्षणसंस्थासु संस्कृतस्य सुदीर्घ- परम्परा ह्यज्ञातकालादेवाद्यावधि यथावद् विद्यत इति समग्रं विश्वं पश्यदेवास्तीति न शङ्कापङ्कलेशः । द्वावपि देशौ अद्यतन-राजनीतिकसीमाङ्कनात् पूर्वमेव संस्कृतभाषायाः किञ्च भाषायामस्यां सन्निहितज्ञानभाण्डागाराणां संयुक्तसम्पत्तिरूपेण सहजतया आदानप्रदाने अकुरुताम् । एतस्य महत्त्वमद्य ततोप्यधिकं प्रतिभाति । **विद्या नष्टा चेत् काशी गम्यताम्** इति ह्याभाणकं नेपालेष्वद्यापि सर्वैः स्मर्यमाणं विद्यते । अद्यतनी नेपालशिक्षाप्रणाली न भारताद् भिन्ना इति सर्वप्रसिद्धमेतत् ।

उपर्युक्ततथ्यानां विवेचनेन नेपालभारतयोर्विशिष्टविदुषां विदुषीनाञ्च परस्परसंवादात् संसारस्य कल्याणाय संस्कृतस्य महत्त्वपूर्णा भूमिका निर्धारिता भवेत्। पुनश्च भविष्यं कथं निर्धारयितव्यं संसारस्य कल्याणञ्च कथं भवेद् मार्गश्च कीदृशः स्यात् तत्र संस्कृताध्येतृणां कर्तव्यं किं विद्वज्जनानां कर्तव्यञ्च कीदृशं द्वयोर्देशयोः केन्द्रीय–प्रान्तीय–सर्वकाराणां सरणिः कीदृशी स्यात् साधारणजनातानां कर्तव्यञ्च किं स्यादिति सम्मेलनेऽस्मिन् विचिन्तितम्। द्वयोर्देशयोर्विकासाधारः संस्कृतमेव। परिवर्तितवैश्विकसन्दर्भेषु संस्कृतवाङ्मयमस्मान् कीदृशं दिङ्निर्देशनं करोतीति गहनचिन्तनपुरस्सरं सम्मेलनस्यास्यायोजनं विहितमभूत् ।

प्राचीनकालादेव नेपालभारतयोः पवित्रतायाः क्षमताया विकासस्य मानवतायाः सभ्यतायाश्च संस्कृतं सर्वदा संरक्षणं कुर्वदस्ति।

वीरताया गाथा प्राकृतिकसम्पद्रक्षा–मानवमूल्य–रहस्योद्घाटनं विश्वबन्धुत्वरक्षणं च संस्कृतमाध्यमेनैव अद्यावधि जायते। अस्मिन्नेव सन्दर्भे कथमस्माभिरेतेषां विषयाणां सान्दर्भिकता सिध्यतीति मूलचिन्तनेन सह सम्मेलनस्यास्य प्रस्तावो विहितः । नेपाल–भारतयोः समानधारणानां निश्चयोऽपि भविष्यति । एतस्मात् समग्रस्यापि विश्वस्य नेतृत्वं द्वयोर्देशयोः संस्कृतविद्वज्जनैग्रहीतव्यं तस्मात् सम्मेलनमिदम् ऐतिहासिकं प्रथमं च अभवत्।

अस्मिन् वर्षेऽपि पुनः तद्ध सम्मेलनं हरिद्वारे भविता तत्र विशिष्टाः विद्वांसो विदुष्यश्च समवेता भूत्वा संस्कृतस्योन्नत्यै पुनरपि गभीरान् विमर्शान् करिष्यन्तीति विश्वासः।

**सम्पादक सन्दोहः**

# अनुक्रमणिका

1. नेपालभारतयोः सम्बन्धसेतुः संस्कृतम् 1

प्रो. शशिप्रभा कुमार

2. अन्ताराष्ट्रियं भारत-नेपालसंस्कृतसम्मेलनम् 6

प्रो. सुकान्तकुमार सेनापतिः

3. सं श्रुतेन गमेमहि 10

आचार्य राणि सदाशिव मूर्तिः

4. नैपालकशाक्तपरम्परायां भारतीयशाक्ताचार्याणाम् अवदानम् 16

–माधवप्रसाद लामिछाने, विद्यावारिधिः

5. **Proto-sanskrit in eastern europe: lithuanian retains the unique features of sanskrit** 25

DR. RAGHUNATH ADHIKARI, PHD

6. वैदिकसनातनसनातनपरम्परायां प्रचलितानां संस्कारकृत्यानां विश्लेषणम् 69

चिरञ्जीवी ढकाल

7. धर्मशास्त्रोल्लिखितानां पुत्राणां परिचयः 81

प्रकाशढकालः

8. विवाहसंस्कारनिरूपणम् 96

डा. नारायणप्रसादबरालः

9. ज्योतिषशास्त्रे दिक्-साधनम् 110

डा. नारायणप्रसाद निरौला

10. धर्मशास्त्रदृष्ट्या विवाहस्य भेदाः 123

दामोदरः रेग्मी

11. **Ahat and anahat nada yoga and its importance for modern era** 139

RAJENDRA PRASAD NEUPANE

12. **Wisdom Of *The Gita:* Therapy For Pandemic/ Post-Pandemic World** **153**

UTTAM POUDEL

13. **पर्यावरणविमर्शः** **168**

प्रा. डा. आनन्दप्रसाद घिमिरे

14. **Cube Of Numbers- Sridhara, Bhaskaraacharya And Bharati Krishna Trithaji, Vedic Method** **176**

DR. JAYANTA ACHARYA

15. **बहुशास्त्रीयं संस्कृताध्ययनम् - संस्कृतस्य वैज्ञानिकसाहित्यसन्दर्भे** **186**

प्रो. सोमदेवः शतांशुः

16. **नेपालभारतयोरात्मीयसम्बन्धस्य मूलं संस्कृतम्** **193**

प्रकाशतिवारी 'विद्यावारिधिः'

17. **अथर्ववेदस्य विषयवैविध्यम्** **208**

रूपक अधिकारी

18. **धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणम्** **221**

विष्णुप्रसादशर्मा

19. **संस्कृतं - भारतवर्षस्य संस्कृतेः सम्पर्कस्य च भाषा** **247**

प्रा. डा. नवराजकट्टेलः

# नेपालभारतयोः सम्बन्धसेतुः संस्कृतम्

**प्रो. शशिप्रभा कुमार**

अध्यक्षा, भारतीय उच्च अध्ययन

संस्थान, शिमला

**ओ३म् नमः शम्भवाय च मयोभवाय च**

**नमः शङ्कराय च मयस्कराय च**

**नमः शिवाय च शिवतराय च।।**

**ओ३म् शान्तिः शान्तिः शान्तिः।। (यजुर्वेद)**

हर्षो मेऽतिरिच्यतेऽत्र नेपालदेशे काष्ठमण्डपस्थेऽस्मिन् भव्यभवने समायोज्यमाने अन्ताराष्ट्रिये नेपालभारतसंस्कृतसम्मेलने सभागीभूतायाः। आत्मानमस्यां पुण्यभूमौ सम्प्राप्य नितरां प्रमोदमनुभवामि यतो हि अत्रैव लुम्बिनीप्रदेशे एशियामहाद्वीपस्य ज्योतिभूतः (Light of Asia) भगवान् बुद्धो जनिं लेभे। अपि चास्मिन्नेव देशे राजर्षेर्जनकस्य कर्मभूमौ जानक्याः सीतायाः जन्म अभवत्। अत एवेयं भूमिरस्माकं भारतीयानां कृते तीर्थरूपा यतो हि अस्याः कुक्ष्याः भूमिपुत्री सीता समुत्पन्ना -

**अर्वाची सुभगे भव सीते वन्दामहे त्वा। यथा नः सुभगाससि यथा नः सुफलाससि।। (ऋग्वेद,४/५७/६)**

मान्याः सप्रश्रयं विनिवेदयामि यन्मया परमेशकृपया शैशवकाले कन्यागुरुकुलेऽध्ययनावसरो लब्धः यत्र न केवलं देववाणीसंस्कृतमधीतम् अपि तु वेदवाणी-अमृतलवमपि पीतम्। पूर्वेषामृषीणामाचार्याणां तपःपूतेन प्रसादेन प्रवर्त्तितेषु नैकेषु शास्त्रेषु अन्यतमं काणादं वैशेषिकशास्त्रं विशिष्य मयाऽधीयते खलु। एवं श्रूयते यद्वैशेषिकदर्शनप्रवर्तका आचार्याः पाशुपतमतानुयायिन आसन्निति।1 तत्र साङ्ख्यकारिकायाः युक्तिदीपिकाटीकायामुक्तम् -

**काणादानामीश्वरोऽस्तीति पाशुपतोपज्ञमेतत्।**

विदिचरमेवात्रभवतां विचक्षणानां विदुषां यन्न्यायवैशेषिकयोर्दर्शनयोरनुमानप्रकरणे पञ्चावयवस्य सुष्ठु सङ्कल्पनं विहितमस्ति। एतेषु पञ्चावयवेषु हेतुर्लिङ्गं वा अतिशयितं महत्त्वं

---

1 विस्तारार्थं द्रष्टव्यम् - "Are the Vaisesikas Pasupatas?" In Kumar, ShashiPrabha, Categories, Creation and Cognition in Vaisesika Philosophy, Springer Nature Singapore 2019, pp. 135-150

भजते। तदनुसारं विचार्यमाणे मम मतौ भारतनेपालयोर्मध्ये सांस्कृतिकसम्बन्धसम्पोषकाः निम्नाङ्किताः पञ्चहेतवः आधारभूतास्सन्ति तद्यथा –

(क) आवां द्वौ भारतनेपालदेशौ न केवलं परस्परं प्रतिवेशिनौ, अपितु सहस्राब्देभ्यः स्रवन्त्याः वैदिकसंस्कृतिसरण्या उत्तराधिकारिणौ सहोदराविव मिथोऽन्तरङ्गेणैकेन परमात्मीयतासूत्रेण सम्बद्धाविति निश्चप्रचम्। वैदिकी संस्कृतिर्विश्वस्य प्राचीनतमा- **सा प्रथमा संस्कृतिर्विश्ववारा। (यजुर्वेद, ७/१४)**

अस्याः सनातनसंस्कृतेः सूत्रमावयोर्मध्ये सर्वथाऽविच्छिन्नं वरीवर्त्ति। अतएव अनादिकालादारभ्य अस्माकमाचारविचाराः, आहारविहाराः, पर्वपरम्पराः धर्मकर्मसंस्काराश्च सर्वमप्येतन्मिथः सुग्रथितम्।

(ख) नेपालभारतदेशयोर्भौगोलिक्यः सीमा नगाधिपेन हिमालयेन संरक्षिताः। पर्वतानां कन्दरेष्वेवास्माकं वैदिकी संस्कृतिः पल्लवितेति तत्र ऋग्वेद एव उद्घोषयति - **उपह्वरे गिरीणां सङ्गमे च नदीनाम्। धिया विप्रो अजायत।। (ऋ. ८/६/२८)**

तत्रापि चास्योत्तुङ्गतमः शिखरः 'एवरेस्ट'नामाऽत्रैव नेपालदेशे विराजते। कीदृशोऽयं हिमालयः? इति पृष्टे महाकवेः कालिदासस्य निम्नकथनं स्मृतिपथमायाति –

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः।। (कुमारसम्भवम् १/१)**

अपि च हिमालयस्य वर्णनमितोऽपि पूर्वं तत्र महाभारते लभ्यते, तद्यथा -

**हिमालयाभिधानोऽयं ख्यातो लोकेषु पावनः।**
**अर्धयोजनविस्तारः पञ्चयोजनमायतः।।**
**परिमण्डलयोर्मध्ये मेरुरुत्तमपर्वतः।**
**ततः सर्वा समुत्पन्ना वृत्तयो द्विजसत्तम।।**
**ऐरावती वितस्ता च विशाला देविका कुहू।**
**प्रसूतिर्यत्र विप्राणां श्रूयते भरतर्षभ।।**[2]

(ग) आवयोर्मध्ये न केवलं देशिकसान्निध्यमपितु धार्मिकदृशा च नेपालभारतदेशौ घनिष्ठतया सम्बद्धाविति - वैदिको धर्मः बौद्धधर्मश्च द्वयोरेव देशयोरपरं सम्बन्धसूत्रम्। अत्र नेपालदेशे 81.19 प्रतिशतं जनाः हिन्दूधर्मानुयायिनः तथा 8.2 प्रतिशतं जनाः

---

2 श्रीमता रघुनन्दनशर्मणा स्वीयग्रन्थे "वैदिक सम्पत्ति" इत्यभिधाने २५५-५६ पृष्ठेषु श्लोकाः उद्धृताः । महाभारतस्य प्रचलितसंस्करणेषु नोपालब्धाः ।

बौद्धधर्ममतावलम्बिनः एवञ्च भारतदेशे 79.8 प्रतिशतं जनाः हिन्दूधार्मानुयायिनः तथा 0.7 प्रतिशतं बौद्धमतावलम्बिनः सन्ति। एवमेव भारतदेशे भूतभावनस्य पशुपतिनाथस्य अधिष्ठानमत्र नेपालदेशे विराजते।

समेषां भारतीयानां कृते पवित्रं तीर्थमस्ति। वस्तुतो धन्या वयं नेपालभारतदेशीयास्सधर्माणः येऽत्र भगवतः पशुपतिनाथस्याधिष्ठानस्थलेऽस्मिन् काष्ठमण्डपप्रदेशे स्वीयां सम्मिश्रसांस्कृतिकपरम्परामवलम्ब्य चर्चामारचयाम इति।

(घ) नेपालभारतदेशयोस्सम्बन्ध एतादृशोऽन्तरङ्गः यदस्माकं कालन्धरः **विक्रमसम्वत्** इति नामा द्वयोर्देशयोः प्रचलति ; कालमानमितिरिच्यास्माकं तापमानमपि प्रायशस्तुल्यमेवेति। न केवलमेतत्, अपि तु अस्माकं **भोजनं** (नेपालस्य राष्ट्रियं खाद्यं 'दाल-चावल' इत्यस्ति); **भजनम्** (धर्मः, पूजापद्धतयश्च), **भेषजम्** (आयुर्वेदः), **भूषा** (शिरोवस्त्रम्, अधोवस्त्रम्, कञ्चुकञ्चेति) **भाषाः** च (संस्कृतं, मैथिली, हिन्दी, नेवारी इत्यादयः) समानास्सन्तीति।

(च) सर्वोपरि अस्माकं संस्कृतेः संस्काराणाञ्च स्रोतोभूतं **संस्कृतम्** यत्र सन्निहितं वैदिकं ज्ञानं द्वयोर्देशयोः जनानां जीवनान्यालोकयति। नेपालदेशस्य ध्येयवाक्यम् -

**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी**

भारतवर्षस्य च आदर्शवाक्यं **'सत्यमेव जयते'** संस्कृतभाषातः गृहीते स्तः। विगते G-20 सम्मेलने भारतवर्षस्य प्रधानमन्त्रिणा **'वसुधैव कुटुम्बकम्'**-इत्येतद्वाक्यमुद्घोषितमासीत्, अपि च –

**एका भूमिः, एकं कुलम्, एकं भविष्यम्।** One Earth, One Family, One Future. इति ध्येयवाक्यं प्रवर्तितम्।

सर्वमप्यस्माकं चिन्तनम्, आदर्शाः, संस्काराः, व्यवहाराः संस्कृतेनैव अनुप्राणितास्सन्ति। अस्माकं आराध्यदेवाः शिव-विष्णु-लक्ष्म्यादयः; अस्माकं पूर्वजाः; महात्मा बुद्ध - वैदेही सीतादयः; अस्माकं पर्वाणि होलिकादयः; अस्माकं पूजापद्धतयः कर्मकाण्डविधयश्च सर्वमेव सम्मिश्रं सुग्रथितमस्तीति अनेनापि सुव्यज्यते यत् भारतनेपालदेशयोर्मध्येऽन्तरङ्गसम्बन्धस्य आत्मीयसौहृदस्य च सुदृढतम आयामः संस्कृतमेव। अस्माकं समृद्धशास्त्रपरम्परायां योग-आयुर्वेद-ज्योतिषादयो विषयाः प्राचुर्येण पठ्यन्ते अभ्यस्यन्ते चापि। भारतमतिरिच्य नेपाल एव एकमात्रमपरो देशः यत्र स्वतन्त्ररूपेण संस्कृतविश्वविद्यालयः स्थापितः।

मान्याः! नेपालभारतदेशयोः सांस्कृतिकः सम्बन्धः संस्कृताधारित एव। नेपालदेशीयैर्विद्वद्भिः संस्कृतस्य संरक्षणाय प्रचार-प्रसारार्थं महान् श्रमो विहितः विधीयते चापि। अद्यापि आचार्यपूर्णचन्द्र उपाध्याय-काशीनाथ न्यौपानेसदृशा बहवः संस्कृतविद्वासः अस्यां दिशि कृतभूरिपरिश्रमास्सन्ति। प्रतिवर्षं बहवो नेपालदेशीया युवानः संस्कृताध्ययनार्थं भारतवर्षस्य विविधेषु विश्वविद्यालयेषु नैकेषु गुरुकुलेषु च समायान्ति।

बान्धवाः! भारतनेपालयोर्मध्ये वर-वधू-पक्षयोः सम्बन्ध इव सुकुमारः किन्तु सुदृढतरः सम्बन्धः अस्ति। विगतजनवरीमासे अयोध्यानगर्यां श्रीरामप्राणप्रतिष्ठासमारोहावसरे जानक्याः पितृकुलात् नेपालदेशतः बहुमूल्यानि वस्तूनि उपहाररूपेण प्रेषितान्यासन्निति विदितमेवात्रभवतां समेषाम्। त्रेतायुगादारभ्य अद्यावधि प्रचलन्निदं स्नेहसूत्रमेवमेवास्माकं आत्मीयतायाः संवर्धकं भूयादिति कामयमानाः वयं सर्वे संस्कृताध्यायिनः कृतसङ्कल्पा भूयास्मेत्येव कामयेऽहम्। भारते नेपालदेशे च संस्कृत-संस्कृति-संस्काराणां त्रिवेणी सततं प्रवहणशीला स्यादित्यर्थमस्माभिः सर्वैः बद्धपरिकरैर्भाव्यम् - सावधानतया च स्वीयदायस्य सम्पोषणं कर्त्तव्यम्। अस्माभिरेष **दायः 'सम्प्रदाय'** रूपेण भाविनि काले समागतवद्भ्यः जनेभ्यः सुष्ठु समर्पयितव्यः - ऋणत्रयात् (देवऋण-ऋषिऋण-पितृऋणेभ्यः च आधमर्ण्यं प्राप्तव्यमित्येष विचारविषयो भवतां भवतीनाञ्च समक्षमुपस्थाप्य स्वीयं वक्तव्यं उपसंहर्तुमिच्छामि।

अन्ते च कस्यापि कवेः वचांसि किञ्चित् परिवर्त्य प्रार्थये यत् ...

**धन्यं भारतभूतलं सुललितं सारस्वतं मन्दिरम्।**
**धन्या संस्कृतवाक् सुधेव मधुरा गीर्वाणसंसेविता।।**
**धन्याश्च प्रतिभायुताः सुकवयः नेपालदेशस्थिताः।**
**तेषां सूक्तिसुधारसः क्षितितले दीव्यात्समाः शाश्वतीः।।**

अन्तर्राष्ट्रीय
नेपालभारत
















संस्कृत
सम्मेलन

# अन्ताराष्ट्रियं भारत-नेपालसंस्कृतसम्मेलनम्

**प्रो. सुकान्तकुमार सेनापतिः**

कुलपतिः, श्री सोमनाथ संस्कृत युनिवर्सिटी,

राजेन्द्र भुवन रोड, वेरावल-३६२ २६५,

जि. गीर सोमनाथ (गुजरात)

**प्रस्तावना**

नेपाल-भारतसंस्कृतस्य अन्ताराष्ट्रियसम्मेलने समुपस्थितानां विविधविद्यासु कृतश्रमाणां विद्वन्मित्राणां, संस्कृतज्ञानां, संस्कृतानुरागिजनानां हार्दमभिनन्दनम् अभिवन्दनञ्च। अभिनन्दामः वयम् एतादृशविशिष्टोद्देश्यसिद्धस्य अन्ताराष्ट्रियसम्मेलनस्य आयोजकसम्बन्धान् संस्थाधिकारिसदस्यान्। मित्राणि संस्कृतम् आचारविचारपूतं ज्ञानविज्ञानवैभवयुक्तं संस्कारयुतं किञ्चित् अनर्घं तत्त्वम्। इदं हि संस्कृतं सुराष्ट्रनिर्माणस्य आधारम्, मानवसमाजस्य विकासकारणम्, नागरिकेषु अनेककल्याणगुणाधायकम्, निखिलस्यापि वैदिकसंस्कृतेर्मूलम् अस्ति।

संस्कृतं ज्ञाननेत्रमुन्मीलयति, संशयमपनुदति, पुण्यमार्गे प्रवर्तयति, पापात् निवारयति, सच्चरित्रं विकासयति, व्यक्तित्वगुणान् विकासयति, सर्वमनोरथान् पूरयति, त्रिविधं दुःखं निवारयति, नित्यं निरतिशयसुखंप्रददाति। अतः संस्कृतं राष्ट्रस्य, समाजस्य च हितसाधकमितिनिश्चयेन वक्तुं शक्नुमः।

नेपालराष्ट्रं भारतस्य प्रतिवेशिमित्रराष्ट्रेषु अत्यन्तं सन्निहितम् अस्ति। नेपालभारतयोः भौगोलिक-ऐतिहासिक-सांस्कृतिक-साहित्यिक-दार्शनिक-धार्मिक-आर्थिकश्च सम्बन्धः अत्यन्तं सुदृढः अद्यापि अस्ति। दक्षिण-एसियाभूखण्डे नेपालराष्ट्रं बृहत्हिन्दुराष्ट्ररूपेण परिगणितं भवति।भारतं हिन्दुबाहुल्यराष्ट्रंतु अस्त्येव, सहैव ऋषिराष्ट्ररूपेण विश्वेऽस्मिन् विश्वे प्रसिद्धम् अस्ति। हिन्दुराष्ट्ररूपेण भारतनेपालयोः सम्बन्धः चिरकालात् नीविडः एव। हिन्दुत्ववर्यः स्वभावस्य उभयोः राष्ट्रयोः नैसर्गिकः हिन्दुत्वस्मारकं यथा -

**ॐकारमूलमन्त्राढ्य पुनर्जन्मदृढाशयः**
**गोभक्तो भारतगुरुः हिन्दुर्हिंसनदूषकः।।** (माधव दिगविजयम्)
**हिंसया दूयते यश्च सदाचारणतत्परः।**
**वेदगो प्रतिमासेवी स हिन्दुमुखशब्दभाक्।।** (बुद्धस्मृति)

1950 तमे वर्षे नेपालभारतयोर्मध्ये “भारत-नेपालशान्तिमित्रतासन्धि" रूपः यो अनुबन्धः अनुष्ठितः सोऽपि ऐतिहासिकः। अनेन राष्ट्रद्वयस्यापि सम्बन्धः दृढतरः अभवत्।

**शान्ति-मैत्रीसन्धेः परिणामः**

- भारतनेपालयोः द्विपक्षीयसन्धिद्वारा उभयोः दक्षिण-एसियाप्रतिवेशिराष्ट्रयोः रणनीतिक-सम्बन्धस्य दृढीकरणम् अभवत्।
- अनेन सन्धिकार्येण राष्ट्रद्वयस्य जनानांगमनागमनं, परस्परवस्तूनाम् आदानप्रदानविनिमयादिव्यवहारः सहजः सुलभश्च अभवत्।
- भारतात् शस्त्रादिक्रयणे सौकर्यमभवत्।
- नेपालस्य कृते केचन विशेषाधिकाराः अपिसम्प्राप्ताः।

नेपालभारतयोः सीमान्तसम्बन्धः सुदीर्घः सुदृढः च अस्ति। 1850 किलोमिटरदूरतापर्यन्तं भारतनेपालयोः सीमाप्रदेशः व्याप्तो वर्तते।भारतस्य पञ्चभिः राज्यैः सह नेपालस्य सीमाप्रान्तः सम्बद्धो वर्तते। तानि राज्यानि सिक्किम, पश्चिमवंङ्गः, बिहारः, उत्तरप्रदेशः, उत्तराखण्डश्च। हिन्दुधर्म-बौद्धधर्मयोः विकासदिशा राष्ट्रद्वयं परस्परं निकटतरम् अस्ति। अस्योदाहरणं भगवतः बुद्धस्य जन्म नेपालस्य लुम्बिनीमध्ये अभवत्। ज्ञानप्राप्तिः भारतस्य बोधगयास्थाने अभवत्।ज्ञानप्रसारस्य प्रारम्भः सारनाथे एवमेव निर्वाणस्थानं भारतस्य कुशीनगरे आसीत्।एतस्मात् नेपालभारतयोः सांस्कृतिकः धार्मिकश्च सम्बन्धः दृढ आसीत् इति। भारते नेपाले चबौद्धधर्मस्य प्रचारःबहुलतया अभवत्।राष्ट्रद्वये हिन्दू-बौद्धधर्मयोः स्वीकर्तारः अनेके सन्ति। रामायणसर्किटयोजना राष्ट्रद्वयस्यापि सांस्कृतिकं धार्मिकञ्च पक्षं दृढीकरोति।

**सामाजिक सम्बन्धः** - राष्ट्रद्वयस्य मध्ये नागरिकाणां जीविका-विवाह-पारिवारिक-सम्बन्ध्यश्च तथा घनिष्ठः यथा “रोटी-बेटी का रिस्ता" भवति।

**आर्थिकसम्बधः** - व्यापारादिसन्दर्भे नेपालस्य कृते भारतम् अत्यन्तं सहायकराष्ट्ररूपेण कार्यं करोति। भारतं नेपाले अर्थनिवेशं कृत्वा नेपालस्य व्यापारक्षेत्रं दृढीकरोति।सामुद्रिकव्यापारस्य सहजतायाः कृते नेपालं कोलकतावन्दरस्थपोताश्रयस्य उपयोगं करोति। भारतस्य विविधकर्पोरेटसंस्थाः निर्माण-विद्युत्-पर्यटनादिसेवाकार्येषु उपकुर्वन्ति। भारतं नेपालस्य कतिपयान् मौलिकविकासपक्षान् दृढीकर्तुं यथा - स्वास्थ्य-जलसंसाधन-शिक्षा-ग्रामीणादिविकासक्षेत्रेषु आवश्यकतानुगुणं सहकरोति। मित्रराष्ट्रत्वेन प्राकृतिकापत्काले भारतं मानवीयतकनीकसहायतां च करोति।

**सुरक्षासम्बन्धः** - भारतं 2011 वर्षतः नेपालेन सहप्रतिवर्षं'सूर्यकिरणः' नाम्ना संयुक्तं सेनाप्रशिक्षणं करोति। भारतीयसेनायाः 'गोरखा' रेजिमेंटस् द्वारा नेपालस्य पर्वतीययुवमित्राणि भारतीयसेनायां नियुक्तिं प्राप्नुवन्ति। राष्ट्रद्वयस्य मध्ये द्विपक्षीयसहयोगसम्बन्धकारणेन नेपालसैन्यानाम् उपकरण-प्रशिक्षणादिषु आधुनिकीकरणं भवति।

**सञ्चारसम्बन्धः** - भारत-नेपालनागरिकेषु विद्यमानं सम्बन्धं दृढीकर्तुम् आर्थिकसम्बन्धञ्च विकासयितुं विविधविकाससम्बद्धकार्यक्रमाणाम् आयोजनं भवति। भारतस्य राक्सौलस्थानं काष्ठमण्डपेन सह योजयितुंइलेक्ट्रिकरेलविस्तारनिमित्तं राष्ट्रद्वयस्य सर्वकारीयस्तरे सहमतिहस्ताक्षरम् अभवत्।

**धार्मिकसम्बन्धः** - हिन्दुधर्म-बौद्धधर्मयोः सन्दर्भेराष्ट्रद्वयमनन्यम्।अपि च भारतनेपालयोर्मध्ये अनेकानि धार्मिकस्थानानि सन्ति येन परस्परसम्बन्धः द्रढीयान् भवति।भारतवत् नेपाले अपि भगवान् श्रीरामः तत्रत्यानां जनानां विश्वासकेन्द्रम् अस्ति।

**सांस्कृतिकमन्तःसम्बधः**

- उभयोः संस्कृतेः मूलम् एकम् अस्ति।
- संस्कृतिः वेदमूला वर्तते।
- वेद-उपनिषद्-पुराण-धर्मशास्त्र-दर्शनादिनि ज्ञानराशेः मूलरूपेण स्वीकृतानि सन्ति।
- नेपाल-भारतयोः ब्राह्मणमूलमपिअनन्यम्। भारतादागताः ब्राह्मणाः कालान्तरे नेपाले पूर्वजरूपेण स्वीकृताः। ततो नेपालस्य ब्राह्मणवर्गस्य अखण्डतासिद्धा।

**साहित्यिकमन्तः सम्बन्धः**

- मैथिली-अवधी-भोजपुरीभाषाणां संयोगेन नेपाले'सुधक्कडी' भाषाविकसिता अभवत्।
- भानुभक्त युगे - नेपाली साहित्येन मैथिली-भोजपुरी-अवधीसाहित्यानामपि विकास आसीत्।
- नेपाले जंगबहादुरराणामहाराजस्य आगमनानन्तरं शिक्षानुरागिणः नेपालबान्धवाः वाराणसीं गताः। ततः वाराणसी नेपालीशिक्षासाहित्यस्य केन्द्रमभवत्। नेपालस्य मध्यकालीनः प्रसिद्धः युवा कविः मोतिरामभट्टः वाराणस्याम् उषित्वा आदिकवेः भानुभक्तस्य रामायणस्यानुसन्धानं विधाय तस्य प्रकाशनमारब्धवान् आसीत्। तस्य प्रसिद्धकवेः भारतेन्दुहरिश्चन्द्रेण यह

अत्यन्तमात्मीयः सम्बन्धः आसीत्। एतत्सर्वं राष्ट्रद्वयस्य साहित्यकमन्तःसम्बन्धं निरूपयति एव।

- नेपालसाहित्यकाराणां सम्मानं भारते, भारतीयानांच नेपाले सम्मानमासीत्।

**शास्त्राध्ययनपरम्परासम्बन्धः -**

शास्त्रं सर्वं वेदमूलकं पुरुषार्थसाधकमिति राष्ट्रद्वयस्य सम्मतमस्ति। यथा गुरुकुलपरम्परया भारते वेदस्य दर्शनादिशास्त्राणाम् च अध्ययन-अध्यापनव्यवस्था अस्ति तथैव नेपालराष्ट्रेऽपि शास्त्राध्ययनस्य सैव परम्परा अस्ति। नेपालस्य बहवः हि विद्वांसः भारते काशी-मिथिला-नवद्वीपादिपाण्डित्यमण्डितां स्थलीं च प्राप्य वेद-वेदाङ्ग-न्याय-वेदान्त-मीमांसा-पुराण-धर्मशास्त्राण्यधीत्य न केवलं नेपाले शास्त्रज्ञानस्य प्रचार-प्रसारं कृतवन्तः अपितुभारतस्य विविधासु विद्यानगरीषु शास्त्रज्ञानं सङ्क्रमितवन्तः। न्याय-व्याकरण-धर्मशास्त्र-वेदान्त-साहित्यादिशास्त्रेषु अनेकान् प्रसिद्धान् ग्रन्थान् विरच्य प्राच्यविद्यां समृद्धवन्तः। नेपाल भारतयोः सुदृढः सम्बन्धः आ-वैदिककालात् आसीत्, सम्प्रति अस्ति, भविष्यति स्थास्यति इति अस्माकं विश्वासः इति शम्।






इन्डिया फाउन्डेशन





# सं श्रुतेन गमेमहि

**आचार्य राणि सदाशिव मूर्तिः**

कुलपतिः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः

तिरुपतिः, आन्ध्रप्रदेशः, भारतम्

नेपालभारतौ द्वावपि वेदमार्गरतौ, सनातनधर्महितौ, तपस्विजनमहितौ, मैत्रीभाबसहितौ, विश्वशान्तिकामनाकलितौ देशौ। समस्तवसुधासौभ्रात्रभावपूर्णहृदयौ देशौ। उभयदेशगतचिरन्तनज्ञानधारामूलस्रोतः वेदवाङ्मयरशिरेव इत्यत्र नास्ति मनागपि संशयः। वेदरक्षणे लोकरक्षणमस्तीतीदं देशयुगलमपि एकगलेन गायति। अतोऽत्र आधुनिकयुगे वेदपरिरक्षणार्थं केचनोपायाः विद्वदामोदाय प्राशासनिकप्रीतये च अत्र समर्प्यन्ते।

**सम्प्रदायक्रमेण वेदविद्याबोधनप्रोत्साहः**

आधुनिककाले आङ्लादिमाध्यमेषु ये वेदमधीतुमिच्छन्ति ते वेदशाखाक््रममविगणय्य चतुर्भ्यः वेदेभ्यः कतिचन सूक्तानि वा कांश्चन मन्त्रान् परीक्षादृष्ट्या पठित्वाऽथवा अधीत्य वेदोऽवगत इति तृप्ताः भवन्ति। अपरे केचन पाश्चात्यविदुषामनुवादबद्धदृष्टयो भूत्वा यद् बुद्ध्यते तदेव वेदर्षीणां मतिसारः इति सम्भावयन्ति। अयमसमग्रक्रमः। गुरुशिष्यसम्बन्धक्रमे साङ्सभाष्याध्यनं यदि क्रियते सा रीतिरेव अन्यादृशी भवति। ते सम्प्रदायपरिरक्षणमपि सिद्ध्यति। लुप्तप्रायाणां, विपदि पतितानां विविधानां वेदशाखानाम् अपि पुनरुद्धरणं, परिरक्षणं च भवति। उद्यमेऽस्मिन् नेपाल - भारतयोर्विद्यमानवेदशाखानां परिररक्षणव्यवस्था द्रढीकरणीया।

**वेदविज्ञानपरियोजनाः**

वेदाः मानवसमाजस्य सर्वप्रथमवैज्ञानिकविषयाकराः निशितदृष्टिवतां सततगवेषणशीलिनां तथ्यानुभवः। वेदेषु, वेदान् प्रमाणरूपेण स्वीकृतवति समग्रार्ष-शास्त्र-तदुत्तरकालिकसाहित्ये च सृष्टिविज्ञान, वृष्टिविज्ञान, लौहविज्ञान, औषधविज्ञान, भौतविज्ञान, जलविज्ञानादीनां नैके विशिष्टांशाः समुपलभ्यन्ते। तदर्थं नित्यानुसन्धानं प्रचलेत्। तदर्थं सर्वैरपि संस्कृतज्ञैः यत्नशीलैर्भाव्यम्। विशिष्य आधुनिकवैज्ञानिकोच्चशिक्षासंस्थानां सहयोगेनैवंविधगवेषणं प्रचलति चेत् तन्मान्यता गण्या भवति।

**सर्वकारद्वारा वेदपाठशालानां कृते धनसाहाय्यम्**

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयेन भारते विद्यमानाभ्यः १५१ सम्प्रदायवेदपाठशालाभ्यः वार्षिकं धनसाहाय्यं क्रियते। उपविंशतिछात्रयुक्ताभ्यः वेदपाठशालाभ्यः प्रतिशालं, प्रतिवर्षं ₹३,००,०००/- रूप्यकाणि दीयन्ते। विंशतितः अधिकसङ्ख्यावद्भ्यः प्रतिशालं, प्रतिवर्षं ₹५,००,०००/- रूप्यकाणि दीयन्ते। तथा भिन्नभिन्नराज्यस्थपाठशालाभ्यः तत्तद्राज्यसर्वकारैः, केन्द्रसर्वकारेण च समुचितं धनसाहाय्यं कर्तुं शक्यते। नेपालेऽपि सदृशी व्यवस्था द्वाभ्यामपिऽदेशाभ्यां परिकल्पनीया।

**मातृकालिपिग्रन्थानां अन्तर्जालस्तरे परिरक्षणम्**

भारतस्य, नेपालस्य च अनन्तज्ञाननिधिः मातृकाग्रन्थेषु वर्तते। ते ग्रन्थाः तालपत्रेषु, कागदपत्रेषु च लिखिताः लक्षशः उपलभ्यन्ते। तेषाम् परिक्षणं महाव्रतमेव। तत्र विविधदशाः भवन्ति। अ) कूर्चैः धूलिशोधनं आ) Spirit द्वारा शोधनं इ) विविधतैलैः शोधनं ई) तैलशुद्धानां शोषणं उ) तदा Scanner यन्त्रद्वारा छायाग्रहणं ऊ) छायासु अनपेक्षितभागानां निष्कासनं ऋ) तदा ग्रन्थानुक्रमण्यां नामयोजनं तत् सदृशानाम् इतरकृत्यानां पालनं ॠ) विदुषां साहाय्येन प्रकाशनार्थं सज्जीकरणमित्यादीनि कार्याणि पालनीयानि। अस्मिन्नपि Digitalization कर्मणि श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः निःशुल्कं Digitalization करोति। एतस्मिन् विषये विविधदेशस्थाः संस्कृतशोधसंस्थाः अग्रे आगत्य श्रीवेङ्कटेश्वरवेदविश्वविद्यालयेन MoU कर्तुं शक्नुवन्ति।

**कुमाराध्यापिका**

प्रायः भारते नेपाले च विविधराज्येषु नैकेषु ग्रामेषु, नगरेषु च विविधवेदाशाखासम्बन्धिनः वेदविदः नैके दृश्यन्ते। यदि तादृशाः वेदपण्डिताः स्वपुत्रेभ्यः, तैस्साकं अन्येभ्यः वेदबोधनं कुर्वन्ति चेत् वेदप्रचारः परम्पराक्रमेण विस्तीर्यते। एतस्मिन् विषये तिरुमल-तिरुपतिदेवस्थानैः श्रीवेङ्कटेश्वरवेदवेश्वविद्यालयद्वारा कुमाराध्यापिका इति परियोजनामुखेन प्रोत्सायति। एतदर्थं श्री वेङ्कटेश्वरवेदविश्वविद्यालयेन अध्यापकाय प्रतिमासं ₹२०,०००/- रूप्यकाणि, प्रतिच्छात्रं ₹ ४,५००/- च दीयते। तेन साकं प्रतिच्छात्रं प्रवेशसमये प्रोत्साहकधनं ₹१,००,०००/- एक पर्यायमात्ररूपेण वित्तकोशे निक्षिप्य अष्टमे वर्षे विद्यासमाप्त्यवसरे वृद्धिसहितम् आद्यनिक्षिप्तं धनं सर्वं तत्तच्छात्राय दीयते। सदृशपरियोजनाः समारब्धुं शक्यन्ते।

**वेद-वेदाङ्ग-उपवेदानुसन्धानविस्तरणम् तथा अप्रकाशितविशिष्टग्रन्थानां प्रकाशनम्**

वैदिकवाङ्मयानुसन्धानक्षेत्रेऽप्याधुनिकविज्ञानक्षेत्रसहयोगितापूर्वकगवेषणोद्यमः समर्थनीयः। प्राचीनभारतीयविज्ञान-क्षेत्रीयाः सहस्रशः तालपत्रेषु, विविधहस्तलिखितग्रन्थेषु च विद्यमानाः ग्रन्थाः प्रकाशिताः भवेयुः।

**वेदाध्ययनरतच्छात्राणां छात्रवृत्तिः**

श्रीवेङ्कटेश्वरवेदवेश्वविद्यालये शास्त्रिस्तरीयवेदविद्यपाठ्यक्रमे प्रविशतां छात्राणां निश्शुल्कवेदविद्याबोधनेन साकं प्रतिच्छात्रं प्रवेशसमये प्रोत्साहकधनं ₹३,००,०००/- एक पर्यायमात्ररूपेण वित्तकोशे निक्षिप्य चतुर्थवर्षान्ते विद्यासमाप्त्यवसरे वृद्धिसहितम् आद्यनिक्षिप्तं धनं सर्वं तत्तच्छात्राय दीयते। आचार्य स्तरीयवेदविद्यपाठ्यक्रमे प्रविशतां छात्राणां निश्शुल्कवेदविद्याबोधनेन साकं प्रतिच्छात्रं प्रवेशसमये प्रोत्साहकधनं ₹१,००,०००/- एक पर्यायमात्ररूपेण वित्तकोशे निक्षिप्य वर्षान्ते विद्यासमाप्त्यवसरे वृद्धिसहितम् आद्यनिक्षिप्तं धनं सर्वं तत्तच्छात्राय दीयते। सदृशरीत्या वा तदधिकतरक्रमेण वा नैकविधवेदविद्याप्रोत्साहकपरियोजनाः विविधराज्यस्तरेषु, राष्ट्स्तरेयोश्च रचनीयाः।

**नेपालदेशीयानामपि वेदबोधनम्**

भारते नेपालदेशीयानामपि विविधवैदिकानुष्ठेषु प्रवेशपरीक्षाद्वारा वेदविद्याबोधनाय स्थानं कल्पनीयम्। श्री श्रीवेङ्कटेश्वरवेदवेश्वविद्यालयोऽपि तथा प्रवेशपरीक्षाद्वारा नेपालदेशीयानामपि वेदविद्याबोधनं करिष्यति। एतैरेवं विधैरन्यैः बहुविद्वद्वरेण्यमुखविनिर्गमिष्यमाणैः महत्तरैः उपायैः वेदवाणी सुरसरिदिवि पृथिवीमखिलां पुनातु। अव्यादरिषड्वर्गभयाच्च।

जयतु भारतनेपालवेदगरिमा।

**भारतनेपाल–दशविधबन्धः**

**भौगोलिकबन्धः**

सुश्रीमद्भारताम्बाप्रियहितसहजश्चन्द्रवद्विष्णुपत्न्याः
चीनायाः दक्षिणस्थो हिमनगमुकुटो भूमिहारस्समन्तात्।
खड्गाकारप्रवृत्तः पशुपतिनिलयो मुक्तिनाथस्य वासो
नेपालो रम्यदेशो प्रकृतिरुचिरभूर्भारतस्यात्मबन्धुः।

**ऐतिहासिकबन्धः**

वेदाविर्भावकालाद्भुवि सुरधरणी नेपभूमिः प्रशस्ता
सीतायाः जन्मदेशस्सुरुचिरमिथिलापट्टणोत्सङ्गडोला।
लुम्बिन्यां गौतमीयो जनिमलभत सिद्धार्थनाम्ना हि बुद्धः
सेयं नेपालसीमा युगयुगचरितैर्बान्धवी भारतानाम्।।

**सांस्कृतिकबन्धः**

पाराशर्योक्तमार्गे मुनिगणमुदिते साधुसत्सङ्गसूक्तैः
संस्काराः भारतीयैर्दिशि दिशि चरितास्तादृशीमेव श्रद्धाम्।
दीक्षां चैवं वहन्तो वरबुधसुजनाः नेपदेशप्रसूताः
सौदर्यं दर्शयन्तः स्मृतिविहितपथा वर्तमानाः सधर्माः।।

**सम्प्रदायबन्धः**

वस्त्रे भूषाविधाने गृहरचनविधावुत्सवानां प्रचारे
मैत्रीबन्धे विनोदेष्वभिनयसुकलानाट्यचेष्टाविलासे।
सम्बुद्धौ ध्यानसिद्धौ भरतजनसमास्सर्वकृत्येषु धीराः
नेपालीयाः महान्तो महितसुकृतयो सम्प्रदायप्रिया वै।।

**भाषाबन्धः**

वर्णोत्पत्तिप्रकारे पदनियमविधौ वाक्यनिर्माणगत्यां
वृत्तीनां तत्तवसारे विपुलविमृशधीसारनिष्पत्तियोगे।
मीमांसायां च वादे वरमतिकलिताः भारतीयैस्समानाः
नेपालीयाः बुधेशाःपटुतरवचसामाकराः माकराणाम्।।

**विद्याबन्धः**

वेदास्साङ्गास्ससूत्राः स्मृतिवरततयस्सोपवेदाश्च शास्त्रा-
ण्यार्षप्रोक्ताश्चविद्याः सुगमनिगमतन्त्राण्यागमास्सेतिहासाः।
पौराणं वाङ्मयाढ्यं  नवललितकलाः दर्शनं शब्दकोशाः
नेपाले सुष्ठ्वधीताः भरतभुवि यथा सादरं मान्यबुद्ध्या।।

**प्राशासनिकबन्धः**

नैपुण्यं कौटलीये गुरुनिशितदृशा पालनं स्वप्रजानां
प्रज्ञा कामन्दकीये नृपदलवलये नीतिपूर्वा हि रीतिः।
शौक्री नीतिश्च भेदे रिपुदमनविधौ शौर्यवृत्तिश्च युद्धे
नेपाले भारते च सममिदमखिलं पूर्वराजन्यकाले।।

**शास्त्रबन्धः**

काणादे पाणिनीये स्फुरदुडुगणने भूयसा ज्यौतिषे वै
भौते रासायनेत्थं नरमृगविषये वृक्षविज्ञानभूम्याम्।
लौहे वाणिज्यशास्त्रे बहुविधविभुता वृष्टिविज्ञाननिष्ठा
नेपाले भारते च सममिदमखिलं पूर्वतो वेदभूम्याम्।।

**काव्यबन्धः**

गद्ये पद्ये च चम्प्वां लघुकृतिनिचये दण्डके नीतिकाव्ये
स्तोत्रे दृश्यप्रबन्धे सहृदयहृदयप्रीतिकृत्काव्यमार्गः।
गैर्वाण्यां प्राकृते वै भरतकुलकवीतुल्यबुद्धिप्रभूताः
नेपालेऽप्यार्यभूम्यां महितकविकृताः काव्यबन्धास्त्वगण्याः।।

**व्यवहारबन्धः**

सौजन्यं चित्तदेशे  वचनविमलता शुद्धरूपं सहासं
लालित्यं वैखरीषु प्रकटितविभवं विश्वसौभ्रातृभावे।
वेदोक्तस्वात्मभूतिर्निगमचयविधिप्रीतचित्तप्रसादः
सारल्यं वर्तने सा सहजगतिरियं भारते नेपजे वै।।













# नैपालकशाक्तपरम्परायां भारतीयशाक्ताचार्याणाम् अवदानम्

–माधवप्रसाद लामिछाने, विद्यावारिधिः
सहप्राध्यापकः, पूर्वमीमांसा तथा तन्त्रविभागः,
नेपाल–संस्कृत–विश्वविद्यालयः,
वाल्मीकिविद्यापीठम्, प्रदर्शनीमार्गः, काष्ठमण्डपः

**विषयप्रवेशः**

अस्मिन् कार्यपत्रे प्रथमतो नैपालक–शाक्तपरम्परायाः सङ्क्षिप्तं परिचयमुपस्थाप्य नेपाले कालीपरम्परायाः प्राधान्यं, तस्याञ्च परम्परायां गुह्यकाल्या गुह्येश्वर्या वा प्रभावः समुल्लिखितः। नैपालक–शाक्तपरम्पराया विकासे पञ्चद्राविडशाक्ताचार्याणां, काश्मीरप्रदेशाद्, बङ्गप्रदेशाच्च समागतानां शाक्ताचार्याणां प्रभूतं योगदानं वर्तते। अत्र मया ऐतिहासिकशिलापत्राणि, ताम्रपत्राणि, तन्त्रग्रन्थानां पुष्पिकावाक्यानि च शोधसामग्रीतया प्रयुक्तानि।

**शाक्तपरम्परायाः पृष्ठभूमिः**

कारणवस्त्ववच्छिन्नं कार्योत्पादनोपयोगिभूतम् अपृथक्सिद्धं धर्मविशेषत्वं शक्तित्वम्। शक्तिशब्दे 'श' इति ऐश्वर्यवाचकम् 'क्ति' इति च पराक्रमवाचकम्। अत एव ऐश्वर्यपराक्रमस्वरूपा तयोर्दात्री च शक्तिरिति कथ्यते। उक्तं च देवीभागवते—

**ऐश्वर्यवचनः शश्च क्तिः पराक्रम एव च।**

**तत्स्वरूपा तयोर्दात्री सा शक्तिः परिकीर्तिता।। (देवीभागवतम्, ९।२।१०)**

तान्त्रिकाणां मते पराशक्तिरेव विज्ञानानन्दघनो ब्रह्म। निखिलं स्थूलसूक्ष्मकारणात्मकं जगत् शक्तेर्विकासमात्रम्। विश्वस्य मूले या पूर्णसत्ता पारमार्थिकरूपेण विद्यमानास्ति सैव शक्तेः परमं रूपम्। अनन्तब्रह्माण्डसमुदायरूपतया प्रकटिता ब्रह्मणः स्वाभाविकी शक्तिरेव शास्त्रेषु संवित्, प्रकृतिः, कालीत्यादिभिर्नामभिः सङ्केतिता वर्तते। तां एव पराशक्तिं महाशक्तिं वा परब्रह्मस्थानीय उपास्यतया गृहीत्वा तां च अखिलविश्वब्रह्माण्डस्य परमकारणत्वेन ये उपासन्ते ते शाक्तमतावलम्बिन इत्युदीरिताः। शक्त्युपासनापरम्परा अतीव प्राचीना वर्तते। देवीपूजायाः प्रमाणं त्रिंशत्सहस्रवर्षपूर्वं नवपाषाणकालेऽपि प्राप्यते (प्रिस्टन, १९४०, ६ पृष्ठम्)। मध्ययुरोपमहादेशे पूर्वयुरोपमहादेशे च हस्तिदन्तैरस्थिभिश्च निर्मिता नारीमूर्तिणामवशेषा उपलभ्यन्ते। इरान–इराक–भूमध्यसागरीयक्षेत्र–

पश्चिमएसिया-मोहनजोदडो-हडप्पाप्रभृतिषु स्थानेषूपलब्धेभ्यो नारीणां चित्रेभ्यो मूर्तिभ्योऽवशेषेभ्यश्च देव्युपासनापरम्परा अतीव प्राचीना अस्तीति ज्ञायते।

वैदिकसंहितायाम् अदिति, शची, उषा, पृथ्वी, वाक्, सरस्वती, रात्रिः, धिषणा, इला, सिनीवाली, मही, भारती, अरण्यानी, निर्ऋतिः, मेधा, पृश्नि, सरण्यू, राका सीताप्रभृतिदेवीनामुल्लेखः प्राप्यते। तत्र पराशक्तिर्भगवती विराड्रूपतया वर्णिता प्राप्यते। सा एव ईश्वरी रुद्र-वसु-आदित्य-विश्वेदेवैश्चरति। सा एव मित्रावरुणौ बिभर्ति, सा एव इन्द्राग्नीम् अश्विनौ च बिभर्ति (ऋग्वेदसंहिता, १०।१२५।१)। दुर्गादेव्याः विस्तृतं वर्णनं तैत्तिरीयारण्यके प्राप्यते। तत्र दुःस्वप्ननाशिनी दुर्गा सर्वमपि स्वपापं हरणाय प्रार्थ्यते। (तैत्तिरीयारण्यकम्, १०।१)। ब्राह्मणग्रन्थेषु राका, सिनीवालीप्रभृतीनां देवीनाम् उल्लेखः प्राप्यते (ऐतरेयब्राह्मणम्, १५।४, ३२।९)। ध्यानयोगानुगता ऋषयः स्वगुणैर्निगूढां सर्वकारणस्वरूपां, देहात्मशक्तिमपश्यन् (श्वेताश्वतरोपनिषत्, १।३), एकमेव ब्रह्म शक्तियोगाद् अनेकरूपतां याति, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च (श्वेताश्वतरोपनिषत्, ६।८), भेदरहिता देवतामयी अदितिः प्राणादभिव्यज्यते।

ततो सा चिदम्बरस्य विज्ञानमय्यां गुहायां प्रविशति जगद्रूपेण स्वात्मानं व्यनक्ति च (कठोपनिषत्, २।४।७) इत्यादिभिरुपनिषद्वचोभिर्ब्रह्मणि अन्तःस्थिता शक्तिरेव विश्वप्रपञ्चस्य कारणम् इति उपनिषत्सारं ज्ञायते। पौराणिकसाहित्ये कालिकापुराणं शक्तिवादस्य स्वतन्त्रं पुराणमस्ति। देवीभागवतं च शाक्तसिद्धान्तप्रतिपादकं पुराणम्। ब्रह्माण्डपुराणे ललितासहस्रनामाभिधेयं प्रकरणं प्राप्यते। मार्कण्डेयपुराणे देवीमाहात्म्यनामकं प्रकरणमुपलभ्यते। सप्तशतीति नाम्ना विख्यातिमापन्नं देवीमाहात्म्यम् शाक्तोपासकानां कृते अतीव महत्त्वपूर्णमस्ति। श्रीमद्भागवतमहापुराणे वर्णितं रासलीलाप्रकरणं शक्तिवादस्य रहस्यं प्रकटयति।

ब्रह्मवैवर्तपुराणे पराशक्तिरेव विश्वजननी मूलप्रकृतिरस्ति, सा एव विश्वसर्जनसमये आद्याशक्तित्वेन विराजते तथा स्वेच्छया त्रिगुणमयी भवति, सा वस्तुतो निर्गुणा निराकारास्ति तथापि प्रयोजनवशात् सगुणत्वं धारयति इत्युल्लिखितम् (ब्रह्मवैवर्तपुराणम्, २।६६।७-१०)। एवंप्रकारेण वैदिकसाहित्ये पौराणिकसाहित्ये च प्रतिपादितस्य शक्तितत्त्वस्य विकासः तन्त्रागमे परिलक्ष्यते। औपनिषदसिद्धान्ते वर्णितमीक्षणं-तपः-सर्जनमेवागमशास्त्रे तन्त्रशास्त्रे वेच्छा-ज्ञान-क्रियाशक्तिर्बिन्दु-बीज-नादात्मकं तत्त्वमिति वर्णितम्। सा एव इच्छा-ज्ञान-क्रियात्मिका स्वातन्त्र्यशक्तिर्विश्वमयदशायां

नानात्वेनाभिव्यज्यते। सा एव स्वातन्त्र्यशक्तिः तन्त्रागमशास्त्रेषु चितिः, ऊर्मिः, संवित्, काली, कालसङ्कर्षिणीत्यादि-भिर्नामभिर्ज्ञायते, साधकैश्च तैस्तैर्नामभिरुपास्यते।

**नैपालकशाक्तपरम्परा**

काष्ठमण्डपे उपलब्धा मातृकामूर्तयः अतीव प्राचीना वर्तन्ते। ताभिर्मूर्तिभिरत्रत्या शाक्तोपासनापरम्परा ख्रिष्टाब्दात् पूर्वत एव प्रचलिता आसीदिति ज्ञायते। पाटनक्षेत्रस्य मातृकामूर्तयः, चाँगुनारायणक्षेत्रस्य मातृकामूर्तयः, बगलामुखीमन्दिरे विद्यमाना मातृकामूर्तयश्च ईसवीय द्वितीयशतकस्येति मन्यते। मानदेवनृपतेः समये एकादशोत्तर चतुश्शतशकाब्दे शीलवत्या अभिलेखः प्राप्यते। तस्मिन् अभिलेखे महाप्रतिहारस्य भीमगुप्तस्य पत्न्या शीलवत्या स्थापितायाः शर्वाणी इत्याख्या देव्याः कारणपूजायाः कृते तया भूमिदानं कृतम् इत्युल्लिखितः। तथा च पञ्चविंशत्युत्तर चतुश्शतशकाब्दे विजयवती विजयेश्वरीं स्थापितवती। विजयेश्वरी एव इदानीं पलाञ्चोक भगवतीति नाम्ना लोके प्रसिद्धास्ति। कान्तिपुरराज्यस्य संस्थापको गुणकामदेवः कङ्केश्वरी, रक्तकाली, मनमैजुभगवत्याश्च प्रतिष्ठापनं कृतवान् इति ऐतिहासिकप्रमाणैर्ज्ञायते। अनेन ईसवीय एकादशशताब्द्यां नेपाले शाक्तोपासनायाः प्राधान्यमासीदिति ज्ञायते।

महीन्द्रमल्लभूपतिना कान्तिपुरनगर्यां तुलजाभवान्या आयतनं निर्मितम्। भूपतीन्द्रमल्लः वाराहीकुमारीवैष्णवी-सिद्धिलक्ष्म्यादिदेवीनां आयतनं निर्मितवान्। तेनैव आनन्ददेवेन निर्मितं भैरवमन्दिरं जिर्णोद्धारं कृतम्। सिद्धिनरसिंहमल्लनृपतिः चत्वारिंशद्दिनपर्यन्तं तन्त्रोक्तं कोटिहवनं कृत्वा स्वगुरोर्विश्वनाथस्य सम्मतिना ललितपत्तने तुलजाभवानीं स्थापितवान्। प्रतापमल्लनृपतिः तन्त्रविद्याया मर्मज्ञः साधकश्च आसीत्। स देगुतलेजुकालभैरवनृसिंहहनूमान्दक्षिणकालीप्रभृतिदेवदेवीनां विधिपूर्वकं स्थापनां कृतवान्। स्थितिमल्लनृपतिर्मानेश्वर्या भक्त आसीत्। तेन श्रीमन्मानेश्वरीलब्धप्रसाद इत्युपाधिर्गृहीतमासीत्। तथैव ज्योतिर्मल्लयक्षमल्लौ मानेश्वरीदेव्याः भक्तौ आस्ताम्।

नेपाले तन्त्रविद्यायाः तन्त्रसाधनायाश्च उत्कर्षो मल्लशासनकाले दृश्यते। तस्मिन् काले काष्ठमण्डपे, ललितपत्तने, भक्तपुरनगरे च तन्त्रसाधनायाः कृते बहुसङ्ख्यकानि आगमगृहाणि निर्मितानि, तान्त्रिकोपासनापरकाः पद्धतिग्रन्था रचिताः सङ्कलिताश्च। भूपालेन्द्रमल्लनृपतेः महामात्येन नवमीसिंहेन तन्त्रचिन्तामणिरित्याख्यो ग्रन्थो रचितः। सिंहप्रतापशाहः तन्त्रविद् साधकश्चासीत्। स च अनेकतन्त्रग्रन्थानां आलोडनेन पुरश्चर्यार्णवइत्याख्यो सुप्रसिद्धो ग्रन्थो रचितवान्। रणबहादुरशाहभूपतिः तुलजाभवान्या दीक्षां क्रमदीक्षां च गृहीत्वा पूर्णाभिषिक्तः आसीत्। स च निर्वाणानन्द इतिनाम्ना प्रसिद्ध

आसीत्। अनेन तन्त्रोक्तभैरवीचक्रं आयोज्य जगन्नाथमन्दिरं निर्मितम्। काष्ठमण्डपे नगराणां स्थापना तान्त्रिकविधिपूर्वकं विहिता। नगरस्य रक्षणार्थं नगरं परितः अष्टमातृकाभैरवाक्षेत्रपालगणेशप्रभृतीनां देवदेवीनां स्थापना जाता। नेपाले गुह्येश्वर्या गुह्यकाल्या वा सर्वोपरि मान्यता वर्तते। नेपाले सतीदेव्या गुह्यस्थानं समपतदिति पीठमेतद् गुह्येश्वरीपीठनाम्ना प्रथितम्।

मेरुतन्त्रे एकपञ्चाशच्छक्तिपीठानां सम्भव उदाहृतः (मेरुतन्त्रम्, १०।८०१-९१७)। नेपालपीठविषये तत्रोक्तम् यत्-

**नेपालं तु इकारः स्याद् गुह्यं तत्र तु पार्वति।**

**तस्माद् वामस्य मार्गस्य मूलस्थानं तदुच्यते।। (मेरुतन्त्रम्, १०।८१८ )।**

कुब्जिकातन्त्रे मायावती-मधुपुरीत्यादिषु द्वाचत्वारिंशत् सिद्धपीठेषु नेपालपीठस्यापि उल्लेखो विहितः। तच्च यथा—

**मायावती मधुपुरी काशी गोरक्षकारिणी।**

**हिङ्गुला च महापीठं तथा जालन्धरं पुनः।।**

**ज्वालामुखी महापीठं पीठं नागरसम्भवम्।**

**कामगिरिमहापीठं तथा गोदावरी प्रिये।।**

**नेपालं कर्णसूत्रञ्च महाकर्णं तथा प्रिये। इत्यादि (कुब्जिकातन्त्रम्, ७।५०—५७)।**

नेपालपीठमिति गुह्येश्वरपीठमेव। निशिसञ्चारतन्त्रे नेपाले गुह्येश्वरीसमायुक्तः पशुपतिर्विराजत इत्युल्लेखः प्राप्यते (आचार्यः, वि.सं. २०७५, ४२ पृष्ठे उद्धृतम्)। निशिसञ्चारतन्त्रस्योल्लेखश्चाभिनवगुप्तविरचिते तन्त्रालोके प्राप्यते। अतो गुह्येश्वरीपीठस्यास्तित्वं नवमशतकपूर्वमेवासीदिति ज्ञायते। नेपालपीठस्याधिष्ठातृत्वेन प्रसिद्धिमापन्नाया भगवत्या गुह्येश्वर्याः उपासनापरम्परा अतीव प्राचीनास्ति। कुब्जिकामततन्त्रे गुह्यकालीतन्त्रस्योल्लेखः प्राप्यते। तौ च द्वौ प्राचीनौ (ने.सं. ५२०, ५२५) हस्तलिखितौ ग्रन्थौ राष्ट्रिय अभिलेखागारे, काष्ठमण्डपे सुरक्षितौ स्तः। विमलप्रबोधविरचितः कालीकुलक्रमार्चनम् इत्यभिधेयो ग्रन्थोऽपि अस्याः परम्परायाः सुप्रसिद्धो ग्रन्थः।

**नैपालकशाक्तपरम्परायां भारतीयशाक्ताचार्याणाम् अवदानम्**

नैपालकशाक्तपरम्पराया विकासे भारतीयशाक्ताचार्याणां प्रभूतं योगदानं वर्तते। काश्मीरकक्रमाचार्याः, दाक्षिणात्याः शाक्ताचार्याः समयसमये नेपालं आगतवन्तः, तैश्च

नृपतयो दीक्षासम्पन्ना जाताः इतिसूचकानि प्रमाणानि प्राप्यन्ते। तेषां समासेन चर्चा अत्र विधीयते।

**१. विमलप्रबोधः**

काश्मीरकक्रमाचार्यो विमलप्रबोधो महाराजाधिराजानां अरिमल्लनृपतीनां राज्याभिषेकं कृतवान् इति अमृतेश्वरपूजायाः पुष्पिकावाक्याज्ज्ञायते। तेन कालीकुलक्रमार्चनाभिधेयो ग्रन्थो रचित इति तस्यैव ग्रन्थस्य पुष्पिकावाक्याज्ज्ञायते। तच्च यथा—

**प्रणम्य अलकाचार्यपादपद्मं सुभक्तितः।**

**श्रीविमलप्रबोधोऽहम् एकदण्डीशिवात्मकः।।**

परमहंसपरिव्राजकाचार्य श्रीविमलप्रबोधपादविरचितकालीकुलक्रमार्चनं समाप्तम्। भगवत्या गुह्यकाल्या उपासनापरकोऽयं ग्रन्थ राष्ट्रिय अभिलेखागारे, काष्ठमण्डपे सुरक्षितोऽस्ति। अस्य स्वामित्वे कालिकाकुलपञ्चशतकम्, देवीद्व्यर्धशतिका इति द्वे पुस्तके आस्ताम्। देवीपञ्चशतिकम्, सार्धशतिका इति नाम्ना तयोरुल्लेख आचार्य जयरथेन तन्त्रालोकस्य विवेकटीकायां कृतः। अनयोः सम्पादनं अनेनैव पंक्तिकारेण विहितम्, प्रकाशनञ्च नेपालप्रज्ञाप्रतिष्ठानतो जातम्।

**२. नारायणभट्टः**

वैक्रमाब्दस्य सप्तदशशताब्द्यां शिवसिंहमल्लनृपतेः शासनकाले द्रविडवंशस्य मूर्धन्यो विद्वान् नारायणभट्टः काठमण्डपं समागतः। स च कावेरीनद्यास्तीरस्थो राडदेशज आसीदिति भृंगारेश्वरमन्दिरस्य शिलापत्रे उट्टंकितमस्ति। तच्च यथा—

**कावेरीसरितां वरांकितमहद्राडाख्यदेशश्रितः।**

तस्यैव कृपया तन्त्रसिद्ध्याश्च शिवसिंह मल्लः ललितपत्तनम्, दोलखा, सिन्धुली, लिस्ती, केरुङ्, मकवानपुरं पश्चिमे गण्डकीक्षेत्रञ्च कान्तिपुरराज्यस्य अधीनस्थं कृतवान्। चम्पाग्रामस्थे भृंगारेश्वरमन्दिरे उट्टंकिताभिलेखे नारायणभट्टस्य सौन्दर्यं, विद्वत्ता, तन्त्रसिद्धिश्च यथा प्रकाशिता–

**सत्कीर्तिः शरदिन्दुसुन्दररुचिर्मूर्तिः शिवस्याकृतिः।**

**विद्या यस्य समस्तशास्त्रनिचयव्याख्यातिभूमिं गता।**

**सिद्धिर्यस्य दिनेऽपि चन्द्रकिरणे रात्रौ च सूर्योद्गमे,**

**सोऽयं सद्द्रविडान्वयोद्भवतनुः श्रीभट्टनारायणः।।**

**येन श्रीशिवसिंहनामनृपतेर्नेपालदेशाखिला–**

**धीशत्वं परिकल्प्य भूतिरखिला स्वस्यापि सम्पादिता।।**

शिवसिंहमल्लनृपतिः नारायणभट्टं गुरुं स्थापयित्वा मन्त्रं गृहीतवान्। तस्य च मन्त्रस्य प्रभावेण ललितपत्तनं विजित्वा गुरोराज्ञया काष्ठमण्डपे ललितपत्तने च देगुतलेमन्दिरं निर्मितवान्निति भाषावंशावल्यां उल्लिखितमस्ति (देवीप्रसादलम्साल, २०२३, पृ.५९)। नारायणभट्टः वैक्रमाब्दे एकशप्तत्त्युत्तर एकसहस्रषोडशवर्षे (१६७१) भाद्रशुक्लदशम्यां भृंगारेश्वरमन्दिरे त्रिशूलम् अर्पितवान्, द्विशप्तत्त्युत्तर एकसहस्रषोडशवर्षे (१६७२) चैत्रपूर्णिमायां भृंगारेश्वरमन्दिनिकटे गणेशकुमारौ स्थापितवान्। राजगुरोर्नारायणभट्टस्य निधनं वैक्रमाब्दे चतुश्शप्तत्त्युत्तरैकसहस्रषोडशवर्षे (१६७४) पौषशुक्लद्वितीयायां अभूदिति नारायणभट्टस्य पुत्रेण महादेवभट्टेन श्रीपशुपतिनाथमन्दिरे स्थापिते ताम्रपत्रे लिखितमस्ति।

**३. महादेवभट्टः**

नारायणभट्टस्य पुत्रो महादेवभट्ट आसीत्। पिता नारायणभट्टो दिवंगते सति स्वपितुर्मोक्षकामनया महादेवभट्टः पशुपतये सुवर्णकण्ठीं अर्पितवान्। तथा च स पशुपतिनाथमन्दिरे भगवतो विष्णोः सुवर्णमूर्तिं स्थापितवान्। महादेवभट्टस्य विषये इतोऽधिकं नैव ज्ञायते।

**४. लक्ष्मीनारायणभट्टः**

महादेवभट्टस्य पुत्रो लक्ष्मीनारायणभट्टो लम्बकर्णभट्ट इत्यपि नाम्ना प्रसिद्धोऽस्ति। अयं लक्ष्मीनारायणभट्टः प्रतापमल्लनृपतेर्गुरुरासीदिति प्रतापमल्लश्रीनिवासमल्लयोः सन्धिपत्रे साक्षित्वेन 'श्रीलक्ष्मीनारायण गुरुजु' इत्युल्लिखितत्वाज्ज्ञायते। वैक्रमाब्दे सप्तत्रिंशदुत्तरैकसहस्राधिकसप्तशतवर्षे लक्ष्मीनारायणभट्टेन देगुतलेमन्दिरे गृद्ध्रस्पर्शदोषशान्त्यर्थं कह्नेलचोकइत्याख्ये स्थाने यज्ञो विहितः इति महेशराजपन्तेन प्रकाशितेन ऐतिहासिकपत्रेण ज्ञायते। लम्बकर्णभट्टस्य परामर्शेण प्रतापमल्लनृपतिः फर्पिङइत्याख्ये स्थाने भगवत्या दक्षिणकाल्या हनूमान्ढोकाप्रासादस्य द्वारे च हनूमतो मूर्तिं स्थापितवान्। भाषावंशावल्यां प्रतापमल्लनृपतिः स्वगुरोर्लम्बकर्णभट्टस्य सम्मत्या श्रीपशुपतिनाथमन्दिरप्राङ्गणस्थितस्य वासुकिमन्दिरस्य तथा च गुह्येश्वर्या जीर्णोद्धारं कृतवानिति साक्ष्यं प्राप्यते (भाषावंशावली भाग २, ९० पृष्ठम्)।

**५. हरिशंकरभट्टः**

लक्ष्मीनारायणभट्ट (लम्बकर्णभट्ट)स्य वा पुत्रो हरिशङ्करभट्टो ललितपत्तने मङ्गलबजारइत्याख्ये स्थाने शिवमन्दिरं एकषष्ट्युत्तरसप्तशताधिकएकसहस्रतमे वैक्रमाब्दे

वैशाखशुक्लद्वितीयायां शिवायतनं निर्मितवानिति तत्रोट्ङ्कितशिलापत्रेण ज्ञायते। अनेन गुह्यकालीपूजाविधिर्लिखित आसीदिति अस्यैव ग्रन्थस्य पुष्पिकावाक्याज्ज्ञायते। ग्रन्थोऽयं मम गुरोर्विद्यानाथभट्टस्य सङ्ग्रहे वर्तते। अयमेव हरिशङ्करभट्टो योगनरेन्द्रमल्ल—भूपालेन्द्र मल्ल—भूपतीन्द्रमल्लानां नृपतीनां सन्धिपत्रे साक्षित्वेन विद्यते (पूर्णिमा १३३ पूर्णाङ्कः, ६२ पृष्ठम्)।

**६. वीरेश्वरभट्टः**

चत्त्वारिंशदुत्तरसप्तशताधिकैकसहस्रतमवैक्रमाब्दस्य (१७४०) ताडपत्रे वीरेश्वरभट्टस्योल्लेखः प्राप्यते। तस्मिन् पत्रे स श्रीराजगुरुरित्युपाधिना सम्बोधितः। अनेन सिंहासनप्रतिष्ठापूजाविधिरित्याख्यो ग्रन्थो लिखित इति ज्ञायते। पार्थिवेन्द्रमल्लनृपतेः सिंहासनप्रतिष्ठाधिकारसिद्ध्यर्थं वीरेश्वरभट्टस्य आचार्यत्वे राजलक्ष्म्या गुह्येश्वर्याः पूजा सम्पादिता इति तस्य ग्रन्थस्य पुष्पिकावाक्याज्ज्ञायते। अयमपि ग्रन्थो विद्यानाथभट्टस्य सङ्ग्रहे वर्तते।

**७. नरसिंहदेवभट्टः**

त्रिचत्त्वारिंशदुत्तरसप्तशताधिकैकसहस्रतमवैक्रमाब्दे माघकृष्णपञ्चम्यां भूपतीन्द्रमल्लनृपतेरुपनयनसंस्कारे आमन्त्रितानां काष्ठमण्डपस्थानां भट्टब्राह्मणानां नामावल्यां नरसिंहदेवभट्टस्य नाम विद्यते। नरसिंहदेवभट्टः पञ्चपञ्चाशदुत्तरसप्तशताधिकैकसहस्रतमवैक्रमाब्दे आश्विनशुक्लदशम्यां लक्ष्मीनारायणस्य प्रतिमा स्थापितवान् इति तस्याः प्रतिमायाः पादपीठे उट्टङ्कितेनाभिलेखेन ज्ञायते (पूर्णिमा १३३ पूर्णाङ्कः, ६१ पृष्ठम्)। लक्ष्मीनारायणस्येयं प्रतिमा इदानीं छत्रपति–शिवाजी–महाराज–वास्तुसङ्ग्रहालये (प्रिन्स अफ वेल्स म्युजियम अफ् वेस्टर्न इन्डिया), मुम्बय्यां सङ्गृहीता वर्तते।

**उपसंहारः**

नैपालकशाक्तपरम्पराया विकासे दाक्षिणात्यशाक्ताचार्याणाम्, काश्मीरकक्रमाचार्याणाम् च योगदानं वर्तत इति ऐतिह्यप्रमाणैर्ज्ञायते। अस्मिंश्च विषये सङ्केतमात्रं विहितमत्र। विषयेऽस्मिन् अनुसन्धानस्य महत्यावश्यकता वर्तते। इति शिवम्।

**सन्दर्भसामग्रीसूची**

आचार्यः, दिवाकरः (वि.सं. २०७५), नेपालपीठ र गुह्येश्वरी, काठमाडौँ : श्रीपशुपति अर्चना सुव्यवस्था प्रतिष्ठान।

ऋग्वेदसंहिता (सायणभाष्यभाषानुवादसहिता १-९ भाग, ई.सं. २००७), रामगोविन्दत्रिवेदी (सम्पा.), वाराणसी : चौखम्बा विद्याभवन।

ऐतरेयब्राह्मणम् (सायणभाष्यसहितम्, ई.सं. २०१६), जमुनापाठकः (सम्पा.), वाराणसी : चौखम्बा विद्याभवन।

कालिकाकुलक्रमार्चनम् (पाण्डुलिपिः), राष्ट्रिय अभिलेखालयः, काष्ठमण्डपः।

कुब्जिकातन्त्रम् (ई.सं. २००९), प्रदीपकुमाररायः (सम्पा.), वाराणसी : प्राच्य प्रकाशन।

गुह्यकालीपूजाविधिः (पाण्डुलिपिः), विद्यानाथभट्टस्य सङ्ग्रहः, काष्ठमण्डपः।

देवीभागवतम् (ई.सं. २००३), तामतेजपाण्डे (सम्पा.), वाराणसी : चौखम्बा विद्याभवन।

पणशीकरः, वासुदेवलक्ष्मणः (सम्पा., ई.सं. १९९०), ईशाद्यष्टोत्तरशतोपनिषदः, वाराणसी : चौखम्बा विद्याभवन।

पूर्णिमा, महेशराजपन्तः, १३३, १३५ अङ्कः, काष्ठमण्डपः : संशोधनमण्डलः।

प्रिन्स्टन, जे. (ई.सं. १९८०), कल्ट अफ् द गडेस, न्यू दिल्ली : विकास पब्लिसिङ हाउस।

ब्रह्मवैवर्तपुराणम् (ई.सं. २०१८), वाराणसी : चौखम्बा कृष्णदास अकादमी।

मेरुतन्त्रम् (ई.सं. १९४०), रघुनाथशास्त्री (सम्पा.), बम्बई : लक्ष्मीवेंकटेश्वर स्टीम प्रेस।

सिंहासनप्रतिष्ठापूजाविधिः (पाण्डुलिपिः), विद्यानाथभट्टस्य सङ्ग्रहः, काष्ठमण्डपः।





# Proto-Sanskrit in Eastern Europe: Lithuanian Retains the Unique Features of Sanskrit

**Dr. Raghunath Adhikari, PhD**

…………….

…………….

**Abstract**

This article builds upon the paper presented by the author at the Indo-Nepalese International Sanskrit Conference held in Kathmandu from March 27–29, 2024. It delves into the historical and comparative linguistic analysis of Proto-Sanskrit in Eastern Europe, with particular attention to preserving distinctive Proto-Sanskrit characteristics within the modern Lithuanian language. Employing historical-comparative and linguistic paleontology methodologies, this study addresses major research questions, including the nature of similarities between Sanskrit and Lithuanian, the process of Proto-Sanskrit (Proto-Indo-European) influence in Eastern Europe, and the underlying causes of Sanskrit-Lithuanian linguistic similarities.

The primary objective of this study is to elucidate the degree of similarity between the two languages by examining their phonological, morphological, syntactic, and semantic features. The major findings suggest a shared Indo-European linguistic heritage between Sanskrit and Lithuanian, indicating that their ancestors likely inhabited the same territory before the Proto-Indo-European split. The analysis of Adhikari (2023) reveals over 500

common roots between Sanskrit and Lithuanian, which undergo derivation in sentence usage, with an additional 1000 words displaying close linguistic relations governed by simple linguistic rules. Notably, both languages exhibit the dual number, a feature uncommon in many other languages.

However, Sanskrit possesses eight cases while Lithuanian has seven, reflecting subtle differences in their grammatical structures. These findings contribute to a deeper understanding of the linguistic ties between Sanskrit and Lithuanian, shedding light on the historical and cultural interactions that shaped linguistic evolution in Eurasia.

**Keywords:** *Proto-Sanskrit, Proto-Indo-European, Sanskrit and Lithuanian languages, linguistic similarities, historical-comparative methodology, the Baltic region, Eastern Europe, and South Asia.*

**Methodology**

This study employs a historical comparative methodology to investigate the presence of Proto-Sanskrit features in the Lithuanian language, particularly focusing on their unique retention within the Eastern European linguistic landscape. The research methodology consists of several key components. Firstly, the comparative historical method is utilized to establish linguistic connections between Sanskrit and Lithuanian through systematic comparison of phonological, morphological, and lexical features. This approach allows for the reconstruction of hypothetical Proto-

Sanskrit forms and their subsequent comparison with corresponding elements in the Lithuanian language.

Additionally, paleontology, in the linguistic sense, is employed to trace the evolutionary development of linguistic features over time, shedding light on the historical trajectory of Sanskrit influence in Eastern Europe. Furthermore, the analysis incorporates the assessment of orthographic consistency to ensure accuracy in identifying and matching linguistic correspondences between the two languages. Through the rigorous application of these methodological frameworks, this study aims to provide a comprehensive understanding of the preservation of Proto-Sanskrit features within the Lithuanian language, contributing to the broader field of historical linguistics and Indo-European studies.

Background Information:

This article focuses on the theme: 'Proto-Sanskrit in Eastern Europe: Lithuanian retains unique Sanskrit features'. Proto-Sanskrit, the ancient predecessor of classical Sanskrit, occupies a crucial position in the linguistic evolution of Proto-Indo-European (PIE) languages. Traditionally associated with the *bhāratabarsha* (Indian Subcontinent), Proto-Sanskrit's linguistic influence extends beyond South Asia into Eastern Europe, as recent research conducted by Vidunas (2016) and Adhikari (2023) has revealed.

This paper explores the intriguing intersection of linguistic history, investigating the presence of the Proto-Sanskrit features

in Lithuanian, a Baltic language spoken in northeastern Europe. While the Indo-European connection between Sanskrit and European languages is well-established the retention of the distinct Proto-Sanskrit features in Lithuanian presents a captivating puzzle. Despite geographical and temporal disparities, the Lithuanian language has preserved linguistic traits, remarkably similar to those found in ancient Sanskrit.

Understanding the preservation of Proto-Sanskrit features in the Lithuanian language provides insights into migration patterns, cultural exchanges, and the linguistic evolution of the ancient civilization of Indo-Europeans. By analyzing linguistic evidence and historical contexts, this study aims to illuminate the enduring legacy of Proto-Sanskrit in Eastern Europe and its implications for understanding Indo-European linguistic dispersal. Key research questions include exploring the nature of similarities between Sanskrit and Lithuanian, the process of Sanskrit influence in Eastern Europe, and the underlying causes of Sanskrit-Lithuanian linguistic affinities.

This introduction outlines the research's scope and significance, preparing for a detailed exploration of the linguistic connections between Sanskrit and Lithuanian in subsequent sections. The paper will delve into specific Proto-Sanskrit features retained in the Lithuanian language, analyze their linguistic implications, and discuss broader insights into ancient cultural and linguistic interactions.

Reviewing the scholarly works:

The scholarly comparative works on Sanskrit and Lithuanian remain insufficient in quantity. Existing literature can be categorized into two types: contextual and thematic. Contextual literature provides the background and context rather than focusing on direct comparisons. In contrast, thematic literature specifically compares Sanskrit and Lithuanian. Contextual literature aids in evaluating the historical positions of Sanskrit and Lithuanian within the Indo-European language families.

**Contextual Literature**

In the contextual part of literature Ctesias, a Greek scholar who worked as a physician in the Persian court at approximately 500 BC, wrote the book *Indica*, regarded as the first documented information about India from the part of European scientists, according to historical sources (Nichols, 2021). This book presents information indicating that the Indian languages contain similarities with the Persian language and presents diverse information about India, however, it does not mention the Sanskrit language. This Ctesias' work became one of the major resource books for Herodotus.

Many scholars noticed and marked correspondences between different Indo-European languages, i.e., Giraldus Cambrensis (1146–1222); Dante Alighieri (1265–1321); J. J. Scaliger (1540–1609) (Poser, 2008). Marcus Van Boxhorn (1612-1653), In 1637 he

prepared a list of IE[3] (originally stemmed from "Scythian") languages, where the Lithuanian language also was included (Kapović, 2017). His friend Claudius Salmasius/Claude de Saumaise (1588-1653) 1643 added Sanskrit to the IE list (Driem, 2020).

Filippo Sassetti, an Italian (Florentine) merchant, who resided in Goa, India, wrote Bernardo Davanzati a letter on January 22, 1586, emphasizing the relative closeness of Sanskrit and European languages (Redondo, 2021). According to Majumdar (2017), "It was the Florentine merchant Filippo Sassetti who, after five years' stay in Goa (1583-1588), declared for the first time that there existed a definite relation between Sanskrit and some of the principal languages of Europe" (p. 205).

William Jones' talk in the Asiatic Society in 1786. In his renowned lecture to the Asiatic Society in Calcutta, India, in 1786, William Jones claimed the shared origin of many languages, such as Greek, Latin, Gothic, Celtic, Sanskrit, Persian, and others, following European scholars. The significant part of his speech is: "The Sanskrit language, whatever be its antiquity, is of a wonderful structure; more perfect than the Greek; more copious than the Latin, and more exquisitely refined than either, ...to the same family" (Cannon, 2006, p. 245).

---

3 The term Indo-European (IE) was first time coined by Thomas Young (1773-1829) in 1813.

Following this trend, Franz Bopp's work, 'Comparative Grammer...1845', is the first initiative of literature that compares Sanskrit and Lithuanian; it will be further discussed in the thematic section. After this work Williams' (1872) 'Sanskrit-English Dictionary' is another important contribution in this field it also will be further discussed in the thematic section. Similarly, Turner (1966) published the Comparative Dictionary of the Indo-Aryan Languages listing similar cognates from various Indo-European languages, that also includes Sanskrit and Lithuanian as some examples.

In general, the book *Vedic Sanskrit Mother of All Languages* by Saraswati (2013) compared Sanskrit to major Indo-European languages in terms of the lexicon. Chapter 4 of the book explicitly compares Sanskrit and Lithuanian; however, the work extracted from Chatterji (1967), and Saraswati (2013) lacks the comparative linguistic approach correctly.

Vyas (2013), presents limited comparative information between Sanskrit and Lithuanian. In his book, *Sanskritka Bhasha Shastriya Adhyan* in Hindi. Where he has mentioned comparative cognates of Sanskrit and Lithuanian, including Greek and Latin, i.e., Lith. *esti*, Greek. *esti*, Skt. *asti* 'is, exists'. In addition, he has emphasized that Lithuanian has kept the ancient forms; it contains six cases and dual numbers, and it is an essential language for linguistic study.

In the Hindi book 'Comparative Philology & General Linguistics,' Dvivedi (2019) briefly addressed the significance of Lithuanian and placed this language under Balto-Slavic classification, following Vyas (2013). He stated, "Lithuanian has kept the ancient musical accent that was present in Vedic Sanskrit and Greek, as well as the dual number in grammar" (p. 388). Some Lithuanian references are in the book *The Vedic Age* (Majumdar, 2017). Instead, there needs to be more literature that presents a comparative perspective that stresses the significance of the Lithuanian language.

वेदनिर्दिष्टैर्गर्भाधानादिपुण्यकर्मैर्द्विजानां शारीरिके संस्कारे विहिते सति इहलोके परलोके च पुण्यप्राप्तिर्जायते।(मनुस्मृतिः, ३६।२) धार्मिकं विधिविधानमाश्रित्य सम्पादिता

शरीरशुद्धिप्रक्रिया अपि संस्कार एव।(श्रीमद्भागवतमहापुराणम्, १३-११-७) मनुष्यो वेदनिर्दिष्टविधेरनुसरणं विदधाति चेत् शास्त्रनिर्दिष्टफलप्राप्त्याधिकारी भवति। वैदिकसनातनविधिपूर्वकं विहितानां संस्काराणां माध्यमेन मानवो ब्रह्मबोधमपि कर्तुं समर्थो भवति।

संस्कारमाध्यमेन प्रमुखरूपेणात्मशुद्धिरन्तःकरणशुद्धिर्देहशुद्धिश्च जायते। मनुष्याणां मानसिकं कायिकं धार्मिकं बौद्धिकं चोन्नयनार्थं कर्तव्यान्यनुष्ठानान्येव संस्काराणां स्वरूपाणि। एतादृशः सनातनोऽभ्यासो मनुष्याणां न केवलं कायिकमपि तु सर्वात्मकं परिष्कारं, शुद्धिः, पूर्णता च विधास्यति। वैदिके सनातनसमाजे अनेकानि धार्मिककृत्यानि विधानानि तथा च संस्कृतयो नियमा अनुष्ठानानि च विद्यन्ते।

**संस्काराणां संख्याक्रमश्च**

वैदिकसनातनधर्मशास्त्रीयेषु ग्रन्थेषु संस्कारानां सीमायाः संख्याया विषये मतवैभिन्यं प्राप्यते। मनुस्मृतौ याज्ञवल्क्यस्मृतौ पारस्करगृह्यसूत्रे च संस्कारस्त्रयोदशाः १३ इति, गौतमधर्मसूत्रेअष्टचत्वारिंशत् ४८(अष्टात्मगुणैः सह), व्यासस्मृतौषोडश १६ संस्कारा इत्येवं प्रकारेण निर्दिष्टाः सन्ति। (संस्कारप्रकाशः, पृष्ठ १७, उत्पादनकूटसंख्या २०३३, गोरखपुर,गीताप्रेस ) यतो हि, संस्काराणां संख्यायाः सीमायाश्च विषये नैश्चित्यं ऐक्यं च न दृश्यते परन्तु धर्मसूत्र–गृह्यसूत्रादिग्रन्थानां स्मृतिग्रन्थानां चाध्ययनेन ज्ञातुं शक्यते यत्–मानवजीवने संस्कारा नितरामपरिहार्या महत्त्वपूर्णाश्च।

भारतवर्षीयविदुषां माधवाचार्याणां, डा.राजवलीपाण्डेय–स्वामीदयानन्दादीनां मतेषु संस्काराणां विषये काचित् भिन्नता दृश्यते परन्तु प्रमुखाः संस्काराः षोडशसंख्यकाः। मानवजीवने दया, क्षमा, अनसूया, शौचः, अनायासः, सदाचारः, अकार्पण्यं, अस्पृहा इति अष्टगुणानां प्राप्तिरेव संस्काराणां मुख्योद्देश्यम्। संस्काराणां संख्याविषये ऋषीणां महर्षीणामपि विभिन्ना धारणाः सन्ति। अत्र नेपालदेशे प्रचलितायां वैदिकसनातनसनातनपरम्परायां प्रसिद्धानां षोडशसंस्कारकृत्यानां विषये सामान्या परिचर्चा क्रियते।

**वैदिकसनातनपरम्परायां प्रसिद्धानां संस्काराणां परिचयः**

सनातनसमाजेषु संस्काराणां प्रयोजनमनिवार्यमिति धिया सामाजिकीं व्यावहारिकीं च परम्परां ध्यायन् संस्काराणां संख्या षोडश १६ इति विद्वद्भिर्निर्दिष्टाः। भारतवर्षे प्रमुखतः प्रसिद्धाः षोडशसंस्कारा एते –

**१. गर्भाधानसंस्कारः**

गर्भ+आधान इति गर्भाधानः। पुरुषस्य बीजं शुक्राणुं वा स्त्रीगर्भे स्थापनार्थं शास्त्रोक्तविधिना यत् कर्म क्रियते तदेव गर्भाधानम्। (१४-२२÷८÷१संस्कारनामकथनगौतमधर्मसूत्र ) वैदिकसनातनसंस्कारेषु प्रथमः संस्कारो गर्भाधानं इति मनुयाज्ञवल्क्यादिऋषीणां मतम्। मानसिकशारीरिकरूपेण योग्येन पुरुषेणोत्तमसन्ततिप्राप्त्यर्थं यथोचितं कालं परिस्थितिमवस्थां च विचार्य योग्याया अनुकूलाया अनुरागिण्याश्च स्त्रीया गर्भक्षेत्रे वीर्यदानरूपः संस्कारो गर्भाधान इति ख्यातः। गर्भदोषं निराकर्तुं योग्यसन्ततिलाभार्थं गर्भक्षेत्रं सुसंस्कृतं च विधातुं गर्भाधानसंस्कारः क्रियते।मासिकधर्मस्य (रजस्वलायाः) चतुर्थरात्रिपश्चात् षोडशरात्रिपर्यन्तावधि ऋतुकाल इति कथ्यते। कन्यार्थिनः पतिपत्न्यो विषमरात्रौ पुत्रार्थिनश्च समरात्रौ गमनं कुर्युः।

संस्कारोऽयं गर्भसंस्कार इति मत्वा प्रत्येकेषु ऋतुकालेषु गर्भाधानसंस्कारो कर्तव्य इति केचित् विद्वांसः कथयन्ति चेदपरे विद्वांसः केवलं योनिसंस्कार इति मत्वा प्रथमऋतुगमनकाल एव गर्भाधानसंस्कारः कर्तव्य इति वदन्ति। ऋतुकालेऽमावास्या, पूर्णिमा, अष्टमी, चतुर्दशीति तिथयो प्रमुख, मघादिनक्षत्रा वर्जनीयाः।

गर्भाधानसमये उच्चारणीयो मन्त्रो यथा –

**ॐ पूषाभगं सविता मे ददातु रुद्रः कल्पयतु ललामम्। विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते।**

**अर्थः**

सूर्यादय आदित्यास्तथा च एकादश रुद्रा योनिस्थानं रक्षन्तु। विष्णुर्गर्भस्थानं रक्षेत्। त्वष्टा सन्ततिं सुन्दरं रूपसम्पन्नं कुर्यात्। ब्रह्मा गर्भसिञ्चनं गर्भसंगठनं च कुर्यात्। धातृदेवी शारदा गर्भाधानं कुर्यात्।

**२. पुंसवनम्**

वधूर्गर्भवती जाता इति निश्चिते सति, गर्भात् तृतीये मासेऽनुकूले वा समये पुंसवनसंस्कारः कर्तव्यः। पौरुषयुक्तः सन्ततिर्जायेत इति कामनया सनातनशास्त्रीयविधिपूर्वकं यः संस्कारः क्रियते तदेव पुंसवनम्। गर्भाधानस्य तृतीये मासे वा गर्भस्थशिशोः सञ्चलनपूर्वं हि शुभ्रनक्षत्रे पुंसवनं कर्तव्यम्। (१३-१५÷१व्यासस्मृति।) पुंसवनसंस्कारे सम्पादिते सति, हस्ती-घोटक-प्रासादादिष्वारोहणं न कर्तव्यम्। अधिको व्यायामः, धावनम्, वाहनारोहणम्, नदी-नदतरणम्, अमंगलवाक्योच्चारणम्,

अतिहसनादि न कर्तव्यम्। एवञ्च श्वश्रुश्वसुराणामपमानं न कर्तव्यमिति च शास्त्रेषु निर्दिष्टं विद्यते। (हिन्दू संस्कार परिचय एवं विमर्श, डा. लक्ष्मीकान्तपन्थी, पृ. ४०।)

**गर्भिणी कुञ्जराश्वादि शैलहर्म्यायादिरोहणम्।**

**व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्।। (भविष्यपुराणम्)**

**नामाङ्गल्यं वदेत् वाक्यं न तु हास्याधिको भवेत्।**

**कुर्याच्छ्वशुरयोर्नित्यं पूजामाङ्गल्यतत्परा।। (संस्कार-रत्नमाला)**

तृतीयमासपश्चात् सप्तमासपर्यन्तं गर्भपातो भवितुं शक्नोतीति विचार्य सावधाना भवेयुरिति मत्वा पुंसवनसंस्कारस्य अवधारणा प्रचलिता।

**३. सीमन्तोन्नयनम्**

सीमन्त इति मस्तिष्कः। उन्नयनमितिविकासः। गर्भवतीं प्रसन्नं कर्तुं, गर्भस्थशिशोः सौभाग्यकामनया च गर्भाधानस्याष्टममासपूर्वं हि यः संस्कारो सम्पद्यते तदेव सीमन्तोन्नयनसंस्कारः। विशेषरूपेण, गर्भाधानस्य षष्ठमासादारभ्याष्टममासपर्यन्तं वा जन्मनः पूर्वं हि ज्योतिःशास्त्रसम्मते शुभे मुहूर्तेऽयं संस्कारः कर्तव्यः। सीमन्तोन्नयनसंस्कारे गर्भिण्याः स्त्रियाः केशेषु वेणीशोधं(काइँयो लगाउनु) क्रियते वा केशजूटकं(जुरो) विधीयते। अयं विधिरपि गर्भरक्षानिमित्तमेव। क्षेत्रसंस्काररूपेण सीमन्तोन्नयनसंस्कारः प्रतिगर्भं न कर्तव्यः।प्रथमगर्भसमये एव सीमन्तोन्नयनसंस्कारः कर्तव्यः। सीमन्तोन्नयनं पश्चाद् गर्भिणी केशप्रशाधनं शृङ्गारादिकं सहवासं च न कुर्यात्। तथा च पतिर्येन केनाप्युपायेन पत्नीं प्रसन्नां कुर्यादिति शास्त्रेषु निर्दिष्टः। अधुना पाश्चात्त्यानां “बेबीसावर” परम्परा सीमन्तोन्नयनविधेः प्रभावात् एव प्रचलिता। (आचार्य प्रेमकुमार, संस्कारको महत्त्व, पृष्ठ ८१, शोध, अनुसन्धानात्मकपत्रिका, ने.सं.वि.प्रा.संघ केन्द्रीय समिति।)

**४. जातकर्म**

शिशोर्जन्मपश्चान्नाभिच्छेदनपूर्वं हि जातकर्म विधीयते। अस्मिन् धराधाम्नि प्रथमवारं समागतस्य नवजातशिशोरायुरारोग्यबलबुद्धिप्राप्तिकामनया संस्कारोऽयं सम्पाद्यते। (प्रथमे गर्भे मासे षष्ठेऽष्टमे वा। १-१५-३, पारस्कर गृह्यसूत्र।) बालस्य जन्मपश्चात् स्वल्पं जलसिञ्चनं विधाय, बालस्य बालिकाया वा मुखमण्डलं पश्यन् प्रसन्नो भूत्वा नवजातशिशोः जनकः मन्त्रोच्चारणपूर्वकं गोघृतं मधुश्च नवजातशिशोर्जिह्वायां क्षिपेत्। “घिऊ–मह चटाउने” इति लोकभाषायां प्रसिद्धो विद्यते। गर्भावस्थायां वर्तमाना स्त्रीयत्किमपि खादति तदेवान्नं सूक्ष्मरूपेण गर्भस्थशिशोराहारः। “गर्भाम्बुपानजो दोषो जातात्सर्वोऽपि नश्यति“ इति मान्यतानुसारं, गर्भस्थस्य शिशोः आहारदोषशान्त्यर्थं जातकर्म विधीयते।

**५. नामकर्म**

नामकरणसंस्कारः सामान्यतया नेपालदेशे "न्वारन" इति नाम्ना प्रसिद्धः। आयुर्वर्चोऽभिवृद्धिश्च सिद्धिर्व्यवहृतेस्तथा......अर्थात् आयुवृद्ध्यर्थं तेजोवृद्ध्यर्थं तथा च सांसारिकव्यवहाराय च मनुष्याणां कृते नाम्न आवश्यकता भवति। (७९-३, याज्ञवल्क्यस्मृतिः) शिशोर्जन्मनो दशरात्रिं पश्चात् एकादशदिवसे नामकरणसंस्कारः कर्तव्यः।अस्मिन् संस्कारे ज्योतिर्विदादिष्टे शुभमुहूर्तेऽग्निस्थापनपूर्वकं हवनादि समाप्य जन्मनक्षत्र-मासादि विचार्य कुलगुरुः जनकः वा नवजातशिशोर्नामकरणं विदधाति।

अद्यतने समये प्रायश एकादशदिने एव नामकरणपरम्परा प्रचलिता विद्यते, अनेन ज्ञायते यद् वैदिकसनातनसमाजो धार्मिक-सामाजिकरूपेण सहिष्णुर्वर्तत इति प्रतीयते। ब्राह्मणानां नामानि मंगलयुक्तानि स्युः, क्षत्रियाणां नामानि बलरक्षापरिचायकानि स्युः, वैश्यानां नामानि धन-वैभव-पुष्टियुक्तानि तथा च शूद्राणां नामानि सेवाभावयुक्तानि स्युः इति मनुस्मृतौ निर्दिष्टं विद्यते। एवञ्च स्त्रीणां नामानि सुकोमलानि मंगलमयानि मनोहराणि च स्युरिति निर्दिशति मनुस्मृतिः।

जातीयसूचकरूपेण ब्राह्मणस्य नामान्ते शर्मा, क्षत्रियाणां वर्मा, वैश्यानां गुप्तस्तथा च शूद्राणां दास इति नामकरणपरम्परा विद्यते।नवजातशिशोरायुतेजवृद्ध्यर्थं तथा च सांसारिकव्यवहारसिद्ध्यर्थं च नामकरणसंस्कार आवश्यकः। (१-१५-३, पारस्करगृह्यसूत्र, हरिहरभाष्यम् ) शुभकर्मणा मानवस्य नाम एव प्रख्यातं भवति। नाम एव सांसारिकानामाध्यात्मिकानां च व्यवहाराणां कारणम्। नाम्न एव मनुष्यः सुकीर्तिं प्राप्नोति। सुन्दरं नाम तथा च नामानुसारं कर्म सम्पाद्यते चेत् आयुस्तेजश्च वद्र्धत इत्यत्र न संशयः। तस्मात् कारणात् नामकरणसंस्कार आवश्यको विद्यते।

**६. निष्क्रमणम्**

सम्पादिते नामकरणविधौ माणवकं प्रसूतिशयनकक्षात् सूर्यदर्शनार्थं बहिरानीयते, स एव संस्कारः निष्क्रमणमिति ख्यातः। (अहन्येकादशे नामचतुर्थे मासि निष्क्रमः। १२-१, याज्ञवल्क्यस्मृतिः) शिशोर्नामकरणं पश्चात् तृतीयमासेचतुर्थमासे वा चन्द्रसूर्यदर्शनं विधातव्यम्। जनकः शिशुं प्रसूतिकक्षतो बहिरानीय "ॐतच्चक्षुर्देवहितं पुरस्तात् शुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।।"इत्यादिभिर्मन्त्रैर्बालकं सूर्यदर्शनं कारयेत्। निष्क्रमणविषये ऋषीणां मतवैभिन्यं दृश्यते। अतः परिस्थितिं कुलपरम्परां च विचार्य शुभे मुहूर्ते निष्क्रमणसंस्कारः कर्तव्यः। प्रसूतिकक्षतो बहिरानीय

प्रकृतेर्मानवजीवनस्य च प्रमुखभूतस्य सूर्यस्य दर्शनम् तथा च जीवनाधारभूतस्य वायोः सान्निध्ये माणवकं संस्थाप्यानुपमस्य प्राकृतिकशक्तेरुपासनमेव निष्क्रमणसंस्कारस्य वैशिष्ट्यम्।

**७. अन्नप्राशनम्**

अशनम् इति भोजनम्। शास्त्रोक्तविधिना शिशुं प्रथमवारं अन्नं प्राश्यते चेत्तदन्नप्राशनम्। नेपालदेशे संस्कारोऽयं प्राशनी, पास्नी, भातखुवाई इत्यनेकैर्नामभिः प्रसिद्धो विद्यते। शारीरिकविकासाय यथा बालकंस्य कृते मातुर्दुग्धमतीव महत्त्वपूर्णं भवति, तथैवान्नमप्यावश्यकं भवति। "षष्ठेऽन्नप्राशने मासि........।" इति याज्ञवल्क्यमतानुसारं पुत्रस्य षष्ठे मासे तथा च पुत्र्याः पञ्चमे मासे अन्नप्राशनं कर्तव्यम्। नारदमते सामान्यतया सौरमासानुसारेण पुत्री चेत् पञ्चमासादारभ्य विषमे मासे तथा पुत्रश्चेत् षष्ठमासादारभ्य समे मासे अन्नप्राशनं कर्तव्यम्। (निर्णयसिन्धु,द्वि.प्र., पृष्ठ५२५,अनु.प्रा.डा. ढकाल।) पुत्र्यापेक्षया पुत्रस्य शारीरिको विकासः शनैः शनैर्भवतीति विचार्य पुत्र्याः पञ्चमे मासे पुत्रस्य षष्ठमासे इति लिङ्गमाधृत्यान्नप्राशनम्।

शुभमुहूर्ते वृद्धिश्राद्धं समाप्य काचन कन्या वा बालस्य जनकः वा जननी कश्चन कुलवृद्धो मन्त्रोच्चारणपूर्वकमन्नप्राशनं कुर्यात्। "यक्ष्मनाशकानि पापनाशकानि नवप्रकारकाण्यन्नानि सदैव शक्तिदायकानि पुष्टिदायकानि वा स्युः" इति प्राशनकर्ता प्रार्थयेत्। "अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः।" इति वाक्यमप्यन्नमाहात्म्यं गायति। अन्नप्राशनसंस्कारदिवसे एवजीविकापरीक्षा कर्तव्या। विविधवृत्तिसूचकानि लेखनी–पुस्तक–घट–द्रव्य–अस्त्रादि वस्तूनि बालस्यअग्रभागे स्थापनीयानि। बालस्तेषां मध्ये यत्किमपि वस्तु प्रथमं स्पर्शति वा हस्ते गृह्णाति, तस्यैव वस्तुनो माध्यमेन बालस्य जीविका भवतीति मान्यता एव जीविकापरीक्षा। (संस्कारप्रकरणम्, मुहूर्तचिन्तामणिः।) शिशोर्ब्रह्मचर्य–तेज–बुद्धि–आयुवृद्ध्यर्थं अन्तःकरणशुद्ध्यर्थं मनसि ब्रह्मजिज्ञासा उत्पन्ना भवेदिति कामनयाप्यन्नप्राशनसंस्कार आवश्यकः।

**८. चूडाकर्म**

बालस्य प्रथमवारं केशमुण्डनं केशकर्तनं वा चूडाकर्म कथ्यते। गर्भावस्थायामेव बालस्य शिरसि जातान् केशान् कत्र्यतेऽस्मिन् संस्कारे। संस्कारोऽयं चूडाकर्म–चूडाकरण–चौलकर्म–क्षौरकर्म इति विभिन्ननामभिः प्रसिद्धो विद्यते। अस्मिन् संस्कारे बालस्य केशमुण्डनसमये शिरस्य मध्यभागे (भूमरी) चूडा स्थापनीया इति कुलपरम्परा। (निर्णयसिन्धु,द्वि.प्र., पृष्ठ५२५,अनु.प्रा.डा. ढकाल।) बालस्य केशकर्तनान्नखकर्तनाद् वा

आयु-सौन्दर्य-सौभाग्यवृद्धिर्जायते इति चरकसंहितायां उल्लिखितं विद्यते। सुश्रुतवचनादपि चूडाकरणात् स्वास्थ्यरक्षा सौन्दर्यवृद्धिश्च जायते इति स्पष्टं भवति। सुश्रुतमते जन्मनो विषमे वर्षे वा प्रथमे तृतीये पञ्चमे सप्तमे वषे याज्ञवल्क्यमते कुलपरम्परानुसारं चूडाकरणं कर्तव्यमिति स्पष्टं विद्यते।बालस्य जननी पञ्चमासादधिका गर्भवती विद्यते चेत् बालस्य मुण्डनं न कर्तव्यम्। परन्तु बालकः पञ्चवर्षादधिकः स्यात् चेत् गर्भवती सत्यपि चूडाकरणं शुभमेव भवति। चूडाकरणसंस्कारे जूटिकाबन्धनमनिवार्यमेव भवति।

**९. कर्णवेधः**

कर्णवेधस्य शाब्दिकं अर्थं भवति कर्णच्छेदनम्। पौरुषप्राप्त्यर्थं स्त्रीत्वप्राप्त्यर्थं वा कर्णवेध आवश्यकः। बालस्य कर्णच्छेदनपरम्परा तथा च बालिकायाः कर्णनासिकाच्छेदनपरम्परा अधुनापि विद्यमाना विद्यते। कर्णवेधसंस्कारस्य समयविषये विद्वद्जनेषु सामान्यजनेषु च विभिन्ना जनश्रुतयः प्रचलिताः सन्ति। (पृष्ठ २७७, दधिराम मरासिनी, कर्मकाण्डभास्करः) विविधदोषाणां परिहारार्थं जन्माच्छष्ठदिवसे नामकरणदिवसे वा नैपालकाः कुलपरम्परानुसारेण कर्णवेधसंस्कारं कुर्वन्ति। मासमयनतिथिपक्षनक्षत्रादीन् विचार्य शुभमुहूर्ते कर्णवेधसंस्कारः कर्तव्यः। कर्णवेधसंस्कारपश्चात् बालका बालिकाश्च आभूषणं धारयन्तीत्यतस्तेषां सौन्दर्याभिवर्धनं भवति। रोगरक्षार्थं सौन्दर्यवृद्ध्यर्थमलंकारधारणार्थं वा कर्णवेधः कर्तव्यः। कर्णवेधसंस्कारपश्चात् कर्णच्छिद्रेषु सूर्यस्य प्रकाशः प्रविशति चेत् तत्पश्चादेव द्विजा देवपितृकार्येषु अधिकारवन्तो भवन्तीति सनातनशास्त्रीयमान्यता विद्यते।

**१०. अक्षरारम्भः**

संस्कारविधिपूर्वकं बालकं बालिकां चाक्षरारम्भः क्रियते चेत् स च संस्कारोऽक्षरारम्भ इति नाम्ना ज्ञायते। पञ्चमे वर्षे सम्प्राप्ते बालकं अक्षरारम्भं कारयेत्। (पृष्ठ २६५, संस्कारप्रकाश, पूर्ववत्।) चूडाकर्मणः पश्चात्, बालस्य बालिकाया वा बुद्धिरत्यन्तं तीक्ष्णा विद्यते चेत् तृतीये पञ्चमे सप्तमे वा वर्षे उपनयनसंस्कारस्य पूर्वं ह्यक्षरारम्भं कारयेत्। बालको बालिका वा शिक्षाग्रहणार्थं योग्या चेत् सनातनशास्त्रीयविधिमाश्रित्य अक्षरारम्भः कर्तव्यः।

**११. उपनयनम्**

ज्ञानप्राप्तिकामनया यं कमपि वटुमाचार्यसमीपे नयनं उपनयनम्। ( उप (समीपे) आचार्यादीनां वटोर्नयनं प्रापणम् उपनयनमित्युच्यते। पृष्ठ ३३४, वीरमित्रोदय

संस्कारप्रकाश, पूर्ववत्।) उपनयनं व्रतबन्धनाम्नापि प्रसिद्धं विद्यते। त्रैवर्णिकं कुमारं वेदस्य यम–नियमस्यव्रतस्य देवस्य च सामीप्यं प्रददात्युपनयनसंस्कारः। ब्राह्मणस्य गर्भादष्टमे वर्षे क्षत्रियस्य एकादशवर्षे वैश्यस्य च द्वादशवर्षे उपनयनकालः निर्दिष्टः। (गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्। गर्भदेकादशे राज्ञो गर्भात्तु द्वादशे विशः।।३६-२, मनुस्मृतिः)। निर्दिष्टे समये व्रतबन्धो न सम्भवश्चेत् ब्राह्मणस्य षोडशवर्षपर्यन्तं क्षत्रियस्य द्वाविंशतिवर्षपर्यन्तं तथा च वैश्यस्य चतुर्विंशतिपर्यन्तं येन केनाप्युपायेन व्रतबन्धः कर्तव्यः इति याज्ञवल्क्यमतम्।

ब्राह्मणक्षत्रियवैश्या मातृगर्भतः प्रथमवारं जायन्ते तथा च व्रतबन्धसंस्काराद् द्विजत्वं प्राप्नुवन्ति। यथा कुशलः कलाकारः शीलाखण्डं सुन्दरं मूर्तिं कर्तुं समर्थो भवति तथैव विद्वान् आचार्यो बालकं संस्कारेण शिक्षितमनुशासितं च कुर्वन्ति। असद्गुरुणा कुमारस्योपनयनं क्रियते चेत् स कुमार उपनयनसंस्कारात् प्राप्तव्यं वीर्यं ज्ञानमनुशासनं च प्राप्तुमसमर्थो भवति। ब्रह्मचारिणं कुमारं च विद्वासं स्नातकं कर्तुं वेदाध्यापनार्थं प्रयतमाना आचार्यास्तं कुमारं विद्यागर्भतो द्वितीयवारं जन्म ददन्ति। व्रतबन्धकर्मणि मुख्यतया विधिपूर्वकं यज्ञोपवीतं धारयति गायत्रीश्रावणं कुरुते तथा च वेदारम्भश्च विदधाति कुमारः। आचार्यसमीपे नयनमुपनयनमित्यर्थे निष्पन्न उपनयनशब्दो बटुकं समृद्धजीवनस्य कृते परिष्कृतं मार्गं निर्दिशति।

**१२. वेदारम्भः**

धर्मग्रन्था वेदं ब्रह्मस्वरूपं मन्यन्ते। अत उपनीतस्य विप्रस्य वेदारम्भसंस्कारोऽनिवार्यो विद्यते। वेदाध्ययनरहितान्नन्येषु कर्मेषु रतान् च त्रैवर्णिकान् शुद्रस्वरूपान् मत्त्वा सर्वेषु द्विजकर्मेषु तेषां बहिष्कारः कर्तव्यः। (योऽनधीत्यद्विजो वेदमन्यत्रकुरुते श्रमम्। स शुद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः।। १६८-२, मनुस्मृतिः) स्वपरम्परानुसारं वेदस्य वेदशाखानां चाध्ययनस्य प्रचलनं विद्यमानमस्ति। चतुर्वेदाध्ययनसमयो नास्ति, परिस्थितिरनुकूला नास्ति चेत् स्वस्य गर्भाधानपुंसवनादिषु कर्मषु यस्य वेदस्य वेदशाखायाश्च मन्त्राणां प्रयोगो विहितोऽस्ति तस्यैव वेदस्य वेदशाखायाश्चाध्ययनं कर्तव्यमिति।

वेदाध्ययनात् समग्रपापानां नाशं विधाय पश्चादायुवृद्धिः सिद्धिलाभश्च जायते तथा चामृतप्राप्तिर्भवति। शुभे मुहूर्ते सिद्धिबुद्धिगणेशादीनां पूजनं विधाय योग्यगुरोः सकाशाद् साङ्गवेदानांमुपनिषदादिग्रन्थानां चाध्ययनः प्रारम्भणीयः।

**१३. केशान्तः (गोदानम्)**

गावः केशा दीयन्ते कर्त्यन्ते इति व्युत्पत्त्या गोदानशब्दस्य अर्थो जटाश्मश्रुक्षौरकर्म इति। (पन्थी, हिन्दू संस्कार परिचय, पृष्ठ१११) अध्ययनार्थं गुरुकुले आगतस्य ब्रह्मचारिणः केशकर्तनं निषिद्धम्। ब्राह्मणस्य षोडशवर्षे क्षत्रियस्य द्वाविंशतिवर्षे तथा च वैश्यस्य चतुर्विंशतिवर्षे केशान्तसंस्कारो विधीयते।अस्मिन् संस्कारे ब्रह्मचारिणः श्मश्रूणां नखानां केशानां च कर्तनं विधाय गङ्गायां क्षिप्यते। अयं संस्कारो यौवनकालस्य पदार्पणवेलायाः संकेतः। गुरुकुले स्थित्वाध्ययनं कृतः ब्रह्मचारीवटुर्वेदाध्ययनादिकर्माणि समाप्य केशकर्तनं विधाय गुरुदक्षिणां ददाति, अयमेव संस्कारः केशान्तसंस्कारः।

**१४. समावर्तनम्**

यथाकालं गुरुकुले स्थित्वा वेदोपनिषदादिग्रन्थानामध्ययनं समाप्य यदा ब्रह्मचारी गुरुकुलं त्यक्त्वा गृहं गन्तुमिच्छति, तत्समये सम्पाद्यमानः संस्कारः समावर्तनम्। (पृष्ठ २७७, दधिराम मरासिनी, कर्मकाण्डभास्करः) अध्ययनादिकर्म समाप्य गुरुकुले प्रज्ज्वलिताय नित्याहुताय च अग्नये पूर्णाहुतिं दत्त्वा कुमारोऽष्टचिरञ्जीवीनामष्टसिद्धीनामअष्टपर्वतानां च प्रतीकरूपेणाष्टसंख्यकान् कलशान् स्थापयित्वा वेदमन्त्रैः पूजयति। तत्पश्चादाचार्यः शिष्यस्य आयुर्विवेक ऐश्वर्यं गाम्भीर्यं च कामयन् ॐ येप्स्वन्तरग्नयः.........इति मन्त्रेण स्नानं कारयति। स्नानसम्पादनपश्चादेव हि शिष्यः स्नातक इति कथ्यते। तत्पश्चात् सुन्दराणि वस्त्राणि परिधायाचार्यादाशीर्वादमाज्ञां च प्राप्य ब्रह्मचारी गृहं प्रतिगच्छति। अधुना विश्वविद्यालयेष्वायोजिता दीक्षान्तसमारोहाः समावर्तनसंस्कारस्य च परिवर्तिता आयामाः।

**१५. विवाहसंस्कारः**

वह प्रापणे धातोर्वि उपसर्गे घञ् प्रत्यये च सञ्जाते विवाहशब्दस्य व्युत्पत्तिर्जायते। विशिष्टं वहनमिति विग्रहेण विवाहशब्दस्यार्थो विशिष्टभारवहनं इति जायते। उद्वाहः परिणयः उपयमः पाणिग्रहणमेते शब्दा विवाहशब्दस्य परिचायकाः। (२१-३,मनुस्मृतिः) योग्यसन्तानोत्पादनाद् वंशविस्तार एव विवाहस्य विशिष्टमुद्देश्यम्, न तु भोगविलासो न हि इन्द्रियसुखलाभश्च। धार्मिकचेतनाया विकासानन्तरं विवाहो न केवलं सामाजिकव्यवहार सम्पादनाय आवश्यकोऽपितु धार्मिकरूपेणापि आवश्यको विद्यते। धर्मशास्त्रेषु ब्राह्मविवाहो दैवविवाह आर्षविवाहः प्राजापत्यविवाह आसुरविवाहो गान्धर्वविवाह राक्षसविवाहः पैशाचविवाह इत्यष्टौ विवाहप्रकारा उल्लिखिताः। तेष्वष्टसु चत्वारो विवाहा उत्तमाश्चत्वारो विवाहा अधमा इति मन्यते। विवाहसमये श्रोत्रीयो

महाकुलोत्पन्नो वरोऽन्वेषितव्य इति याज्ञवल्क्यमतम्।कन्या च विवाहाकाङ्क्षी, रोगहीना, अग्रजानुजसहिता, असमानगोत्रे उत्पन्ना, असमानप्रवरा, पितुः सप्तकुलादपरे स्थिता मातुश्च पञ्चकुलादपरे स्थिता रक्तसम्बन्धरहिता आवश्यकी।कन्याया वरस्य च गुणानवगुणान् च विचार्य एव विवाहः कर्तव्य इति सनातनशास्त्रीयमान्यता विद्यते।

वाग्दानं—स्वयम्वरः—वरवरणी—कन्यादानं—लग्नग्रन्थीकरणं—गुप्ताहुतिः—पाणिग्रहणम्—अश्वारोहणं—शिलापूजनम्—अष्टपर्वतपूजनं—सप्तपदी—सप्तर्षिपूजनं—सूर्यदर्शनं—हृदयालम्भनं—सिन्दूरदानम्—अवशिष्टहोमश्चतुर्थीकर्म—द्विरागमनादीनि कार्याणि विवाहे मुख्यानि कार्याणि। कामेन्द्रियानां जागरणं विधाय प्रकृतिप्रदत्तां चञ्चलां कामवासनां दाम्पत्यसूत्रेण बद्ध्वा पतिपत्न्योर्मध्य एव सम्बन्धं स्थापयित्वा वंशविस्तरणं, योग्यसन्ततिजननेन स्वकुलस्य स्वदेशस्य विश्वस्य च हितचिन्तनं वैवाहिकजीवनस्यादर्शः।

**१६. अन्त्येष्टिसंस्कारः**

दिवंगता मातरः पितरश्च परलोके शान्तिं प्राप्नुयुरिति कामनया दिवङ्गतस्य पुत्रादिभिः सम्पादनीयः संस्कारः एवान्त्यसंस्कारः। अयं संस्कारः क्रियाकर्म इति नाम्ना नेपालदेशे प्रसिद्धः। पञ्चज्ञानेन्द्रयाः पञ्चकर्मेन्द्रियाः पञ्चप्राणाः मनो बुद्ध्यादि सप्तदशतत्त्वैः सह आत्मा मानवदेहं त्यक्त्वा वा यं वायुशरीरं धारयति, स प्रेत इति हिन्दूमान्यता। ( सगोत्रजैर्गृहीत्वा तु चितामारोप्यते शवः। अधोमुखो दक्षिणदिक्चरणस्तु पुमानिति। उत्तानदेहा नारी तु सपिण्डैरपिबन्धुभिः।। पृष्ठ ५२७, कर्मकाण्डभास्करः,मरासिनी, पूर्ववत्।) जीवितावस्थायां मनुष्योऽनेन शरीरेण विविधानां विषयाणामुपभोगं विदधाति, अतः मृत्युपश्चादपि तस्मिन्नेव शरीरे जीवो विशेषरूपेणानुरक्तो भवति।

वायुरूपं शरीरं पूर्वशरीरेणोपभुक्तान् भोगान्नेव भोक्तुं कामयति। अतो हि दिवङ्गतस्य प्रेतत्वमुक्तेः कामनया दशगात्रादिकर्माणि कर्तव्यानीति शास्त्रेषु निर्दिष्टम्। श्मशाने चितायां पुरुषमधोमुखं स्त्रियं चाकाशमुखं कृत्वोत्तरदिशि शिरो कृत्वा मन्त्रोच्चारणपूर्वकं मुखाग्निश्चिताग्निर्वा दातव्य इति ब्रह्मपुराणे उल्लिखितम्। अस्मिन् काले दशगात्रादिकर्म, एकादशाहकृत्यानि, काञ्चनपुरुषदानं, वृषोत्सर्गः, आद्यमासिकश्राद्धः, उदककुम्भदानं, षोडशीश्राद्धः सपिण्डीकरणञ्चेति कर्माणि क्रियन्ते। मृत्युपश्चात् सम्पादनीया वर्णाश्रमव्यवस्था, कुलपरम्परायां प्रचलिता दान-भोजनादीनि समस्तकर्माणि क्रियाक्रमादयश्च सर्वे कृत्या अन्त्येष्टिसंस्कारा एव।

**निष्कर्षः**

मानुषं जीवनं समुन्नतं सुसंस्कृतं त कर्तुं संस्कारा विशेषरूपेण महत्त्वपूर्णाः। सनातनपरम्परायां प्रचलिताः षोडशसंस्कारा अद्यपर्यन्तं जीविताः। मनुष्याणां शारीरिकं मानसिकंमाध्यात्मिकं चोन्नयनार्थं जन्मत आरभ्य मृत्युपर्यन्तं विविधानां संस्काराणां व्यवस्था विद्यते। संस्कारादेव हि खलु मनुष्या द्विजत्वं प्राप्नुवन्ति। वर्तमानसमये परिस्थितिमवस्थां च विचार्य षोडशसंस्कारकृत्यानां मध्ये सर्वेषां संस्काराणामनुशीलनं न कुर्वन्ति जनाः, एतद् नोचितम्। वैदिकसनातनपरम्पराया विषये संस्कारविषये, संस्कारकृत्यानां ज्ञानानां च विषये समाजे शिक्षाप्रदानमेवास्याध्ययनस्य मुख्यो ध्येयः।

**सन्दर्भग्रन्थसूची**


- पारस्कर.पारस्करगृह्यसूत्र. (वि.सं.२०४९). वाराणसी : चौखम्बा संस्कृत संस्थान।
- मनु. मनुस्मृति. (ई.२००७). अनु. शिवराज कौडिन्यायन, वाराणसी : चौखम्बा संस्कृत संस्थान।
- याज्ञवल्क्य. याज्ञवल्क्यस्मृति (मिताक्षरा). (पुनर्मुद्रण,२०६५) वाराणसी : चौखम्बा संस्कृत संस्थान।
- घिमिरे, ऋषिराम.(सम्पा.) विवाह पद्धति. (वि.सं.२०५७) दाङ : महेन्द्र संस्कृत विश्वविद्यालय।
- मित्रमिश्र. वीरमित्रोदय (संस्कारप्रकाशः), (सन् १९९५) अनु. पं. विष्णुप्रसादशर्मा, वाराणसी : चौखम्बा संस्कृत सिरीज।
- गौतम, शम्भुराज.(सम्पा.) शोध, (वि.सं.२०६९) अनुसन्धानात्मकपत्रिका, वर्ष १ अंक १,,काठमाडौं, ने सं. वि. प्रा. संघ केन्द्रीय समिति।
- संस्कारप्रकाश, (वि.सं.२०६९), ३०औं पुनर्मुद्रण, गीताप्रेस, गोरखपुर।
- पन्थी, डा. लक्ष्मीकान्त. हिन्दू संस्कार परिचय र विमर्श, (वि.सं.२०७४) काठमाडौं, रत्न पुस्तक भण्डार।
- भट्ट,कमलाकर. निर्णयसिन्धु, (वि.सं.२०७१) अनु. प्रा. डा. वेणीमाधव ढकाल, काठमाडौं, विद्यार्थी पुस्तक भण्डार।
- मरासिनी, पं. दधिराम. कर्मकाण्डभास्करः, (वि.सं.२०७४) काठमाडौं : विद्यार्थी पुस्तक भण्डार।
- गौतम. गौतमधर्मसूत्र, (वि.सं.२०६९) अनु. प्रमोदवर्धन कौडिन्यायन, काठमाडौं : विद्यार्थी पुस्तक भण्डार।


अन्ताराष्ट्रियं नेपाल-भारत-संस्कृत-सम्मेलनम्
चैत्रमासस्य १४-१६, २०८० । मार्च २७-२९, २०२४ । काष्ठमण्डपो नेपालः


अन्ताराष्ट्रियं नेपाल-भारत-संस्कृत-सम्मेलनम्
चैत्रमासस्य १४-१६, २०८० । मार्च २७-२९, २०२४ । काष्ठमण्डपो नेपालः

# धर्मशास्त्रोल्लिखितानां पुत्राणां परिचयः

**प्रकाशढकालः**

उपप्राध्यापकः, धर्मशास्त्रविभागः,

वाल्मीकिविद्यापीठम्, नेपालः

**लेखसारः**

सनातनवैदिकपरम्परायां धार्मिककृत्यानामनुष्ठानार्थं कस्यचित् कर्तुरावश्यकता भवतीत्यवधारणा प्राप्यते। स कर्ता पुत्रो भवितुमर्हतीति। पुत्रस्य परिभाषायाः, स्वरूपस्य प्रकारस्य च विषये धर्मशास्त्रे मुनीनां बृहन्ति परामर्शाध्ययनमतान्तराणि उपलब्धानि सन्ति। विभिन्नेषु मतेषु प्राप्तेष्वपि पुत्रस्य बृहन्महत्त्वं वर्तत इति सर्वे मुनयो विद्वांसश्च स्वीकुर्वन्ति। अस्माकं शास्त्रेषु बहुप्रकारकाणां पुत्राणामवधारणाः सन्ति। तेषामेव पुत्राणां विषये संक्षिप्तरूपेण परिचयः परिभाषा वर्गीकरणञ्चेति। यथासम्भवमस्मिन् लेखे उल्लिखितं वर्तते।

**शब्दकुञ्जिका**– औरसः, क्षेत्रजः, गूढजः, प्रतिलोमजः, यादृच्छिकः।

**विषयप्रवेशः**

वैदिकसनातनी सभ्यता विश्वस्य प्राचीनतमा उत्कृष्टा वैज्ञानिकी च सभ्यताऽस्ति। धर्मशास्त्रप्रवर्तकैर्महर्षिभिर्वैदिकपरम्परायाः संस्कारस्य च मर्यादायै नैकानि योगदानानि कृतानि। यतोऽद्यपर्यन्तं शास्त्रीये संस्कारपरम्परे जीविते स्तः। पुराणेष्वनेकानां नरकानां वर्णनं विद्यते। तत्रैव पुन्नामनरकमपि वर्णितमस्ति। धर्मशास्त्रानुसारेण जीवितपुत्रस्याऽऽननदर्शनमात्रेण पितरौ नरकगमनान्नरकयातनाभ्यश्च मुक्तौ भवतः। ये मातरं पितरञ्च पुन्नामनरकात् त्रायते स एव पुत्रोऽस्तीति गोपथब्राह्मणे स्पष्टरूपेणोल्लिखितम्। 'यच्च पुत्र पुन्नामनरकमनेकशततारं तस्मात् त्राति पुत्रस्तत् पुत्रस्य पुत्रत्वम्' (गोपथब्राह्मण १।१।२)

तदेव सुपुत्रस्य परमं कर्तव्यञ्चास्ति। मातरि पितरि च जीविते सति तयोर्वाक्यकरणाद् वृद्धत्वे प्राप्ते पथ्यभोजनप्रदानात्तथा मृत्योः पश्चात् गयादितीर्थक्षेत्रे पिण्डप्रदानादेव पुत्रस्य पुत्रत्वं सिद्ध्यति।

**'जीवतो वाक्यकरणात् क्षयाहे भूरिभोजनात्,**

**गयायां पिण्डदानात् च त्रिभिर्पुत्रस्य पुत्रता।।' (श्रीमद्देवीभागवत ६।४।१५)**

**समस्याकथनम्**

विश्वस्य सर्वप्राचीनतमायाः संस्कृते रूपेण वैदिकसनातनसंस्कृतेः प्रसिद्धिस्सर्वविदिता। अस्माकं तत्त्वदर्शिभिर्महर्षिभिः समये समये सम्पादितानां पुत्रोत्सवानां विषये वैज्ञानिकतां धार्मिकताञ्चाऽऽश्रित्याऽनेकप्रकाशिका व्याख्याः कृताः। पुराणेषु बहुव्याख्यातस्य समाजे च महन्महत्त्वप्रदत्तस्य पुत्रस्य परिभाषां वर्गीकरणञ्चेति। शास्त्रसम्मततया विधातुं सारल्येन प्रायो न सम्भवति। पुत्रशब्दः पुंलिङ्गविशिष्टमेव जनयति सुपुत्रीञ्च जनयतीति गम्भीरो विषयो वर्तते। पुत्रेषु च सवर्णात्सवर्णायां गर्भाधानेनोत्पन्नः पुत्र उत्तमो भवतीत्यार्षकथनमस्ति।

**अध्ययनस्योद्देश्यम्**

प्रस्तुतशोधलेखस्योद्देश्यानि निम्नाङ्कितानि सन्ति –

क. धर्मशास्त्रे समुल्लिखितानां पुत्राणां परिचयप्रदानम्।

ख. पुत्रप्रकारविवेचनम्।

**शोधविधिः**

कस्यापि शोधस्य कृते बहुतमानां शोधसामग्रीणामावश्यकता वरीवर्ति। प्रस्तुतलेखस्य कृते च प्राथमिकसहायकसामग्रीरूपे धर्मशास्त्रमूलभूतानि स्मृति–ब्राह्मणाऽरण्यकग्रन्थ–पुराण–रामायण–महाभारतादीनि ग्रन्थान्याऽऽधारभूतानि। तैः सहैव धर्मशास्त्रस्य विभिन्नानि ग्रन्थानि च सहायकस्रोतोरूपाणि सन्ति। काञ्चित् तथ्यान् प्रमाणयितुं धर्मशास्त्रस्य मूलग्रन्थस्य टीका वृत्तयो भाष्याणि हिन्दीनेपाल्योरनूदिता विषयाः वस्तूनि प्रयुक्ताः सन्ति। सङ्कलितसामग्रीणां मूलत एतान् विधीनाधृत्याऽध्ययनङ्कृतम् – वर्णनात्मिका, विश्लेषणात्मिका, विवेचनात्मिका, तुलनात्मिका च। मनुस्मृति–याज्ञवल्क्यस्मृति–विष्णुस्मृति–नारदस्मृति–गरुडपुराणादिषूल्लिखिताः प्रसङ्गा प्रस्तुते शोधकार्ये संयोजिताः। विकिपिडिया–विश्वकोषादिसञ्चारमाध्यमेभ्यः प्राप्तानि विषयवस्तून्यप्यत्र प्रयुक्तानि सन्ति।

**सैद्धान्तिक आधारः**

**धर्मपरिचयः**

धृ धारणे इत्यस्माद् धातोः ध्रियते लोकः अनेन इति धर्मः। धरति धारयति वा लोकमिति धर्मः। धर्मशब्दस्य अर्थविषये नैकमतं दृश्यते। अनेकैः विद्वद्भिः अनेकेषु ग्रन्थेषु धर्मस्यार्थनिरुपणं स्वतन्त्ररुपेण कृतमस्ति। धारणम्, अवलम्बनम्, पालनम्, पोषणम्, धार्मिकक्रिया, संस्कारः, कर्तव्यम्, जातिः, सम्प्रदायः आचारः व्यवहारः, प्रायश्चित्तः, दानम्,

विधिः, प्रचलनम्, अधिकारः, औचित्यम्, पवित्रता, नैतिकता, प्रकृतिः स्वभावः, चरित्रम्, विशेषता, समानता, अहिंसा, यज्ञः, सत्सङ्गः, भक्तिः, रीतिः, सत्यम्, ज्येष्ठः पाण्डवः युधिष्ठिरः, मृत्योर्देवता यमराजः इत्यादयः धर्मस्यार्थाः ऋषिभिर्मुनिभिः पौरस्त्यविद्वद्भिर्वा स्वरचितेषु धार्मिकग्रन्थेषु वर्णिताः। धर्मशब्दः प्रथमतया ऋग्वेदे प्रयुक्तोऽस्ति।

तत्र धर्मशब्दः धार्मिकविधिः, व्रतम्, आचारः इति विविधेषु अर्थेषु प्रयुक्तो वर्तते। छान्दग्योपनिषदि धर्मस्यार्थनिरुपणमित्थं प्रकारेण कृतं वर्तते —"त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति, ब्रह्मसंस्थोऽमृतत्वमेति।" (छान्दग्योपनिषद २।२३ ) अर्थात् गृहस्थधर्मः तापसधर्मः ब्रह्मचर्यधर्मश्चेति धर्मस्य त्रयो विभागाः वर्तन्ते। अत्र धर्मशब्देन विभिन्नाश्रमेषु विधेयानि कार्याणि प्रतिपादितानि। धर्मशास्त्रग्रन्थेषु प्रयुक्तेन धर्मशब्देनापि मानवजीवनस्य विभिन्नासु अवस्थासु आचरितव्यानि कर्तव्याणि निर्दिष्टानि। तेन धर्मशास्त्रग्रन्थेषु आचार इत्यर्थे धर्मशब्दः प्रयुक्तो दृश्यते। उक्तञ्च मनुस्मृतौ —

**आचारः परमो धर्मः आचारः परमं तपः।**

**आचारः परमं ज्ञानमाचारात् किं न साध्यते।।**

तथापि मनुस्मृति—याज्ञवल्क्यस्मृत्यादीनां धर्मशास्त्रग्रन्थानामनुसारेण धर्मः पञ्चविधो वर्तते। तद्यथा — १. वर्णधर्मः २. आश्रमधर्मः ३. वर्णाश्रमधर्मः ४. नैमित्तिकधर्मः ५. गुणधर्मश्चेति।

धर्माधर्मविषये वेदमूलकतया स्मृत्याचारात्मतुष्ट्यादयोऽपि प्रमाणरुपेण स्वीकृताः सन्ति। वेदे चत्वारपुरुषार्थानां वर्तमानत्वेऽपि धर्मस्य मुख्यतया वर्णनं विहितम्। तत्पश्चाद् धर्मस्य विस्तृतवर्णनं धर्मशास्त्रे एव क्रियते। अतस्तस्य नाम धर्मशास्त्रम्। तस्यापरं नाम स्मृतिः। महर्षिणा मनुना वेदधर्मशास्त्रयोः भेदप्रदर्शनावसरे धर्मशास्त्रस्यैव स्मृतिपदवाच्यता प्रदर्शिता। तस्य धर्मशास्त्रस्य पुनः वेदस्मरणमाध्यमेन प्रतिपादितत्वात् स्मरन्ति वेदमनया इति स्मृतिः, अथवा महर्षिभिः वेदार्थचिन्तनं स्मृतिः सिद्धा एव—

**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।**

**ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ।।**

आश्रमव्यवस्था वैदिकधर्मस्य एको महत्त्वपूर्णो विषयो मन्यते। सामान्यतया मनुष्यः शताब्दं जीवति। शतवर्षात्मकः आयुः चतुर्धा विभाजिते सति पञ्चविंशतिवर्षात्मकः एकः आश्रमो भवति। ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्न्यासाश्रमश्चेति चत्वारः

आश्रमाः भवन्ति। मानवजीवनस्य व्यावहारिकनैतिकसामाजिकानां कार्याणामाधाररूपेण स्थितायाः आश्रमव्यवस्थायाः वर्णनं विवेचनञ्चावश्यकं दृश्यते।

मानवजीवनस्य पञ्चविंशतिवर्षतः पञ्चाशद्वर्षपर्यन्तं यः कालः सः गृहस्थाश्रमकालः। विवाहं कृत्वा पत्न्या साकं जीवनयापनमेव गृहस्थाश्रमः इति उच्यते। शतवर्षात्मकजीवनस्य द्वितीय आश्रमो गृहस्थाश्रमो वर्तते। गृहस्थेन जनेन सन्तानोत्पादनं कृत्वा तथा पितृणां कृते तर्पणं श्राद्धञ्च विधाय पितृऋणात् मुक्ते भवनीयः। यथाशक्त्या होमयज्ञपूजनादिकं कृत्वा मानवः देवर्णात् मुच्यते। स्वाध्यायनेन मनुष्यः ऋषेर्णात् मुक्तो भवति। अतिथिभिक्षुकादीनां सत्कारेण सेवया च मनुष्यर्णत्वात् मुच्यते। ब्रह्मयज्ञः देवयज्ञः भूतयज्ञः पितृयज्ञः मनुष्ययज्ञश्चेति। पञ्चमहायज्ञान् वैश्वदेवकर्म इति उच्यते। उक्तानां कर्मणां यथाविधिना सम्पादनमेव गृहस्थाश्रमस्य धर्म इति।

पुन्नाम पुंसां वा नरकात् त्रायत इति पुत्रशब्दस्य व्युत्पत्तिर्लभ्यते। इत्थं पुंनाम्नो नरकान् मातापित्रोरुद्धारकर्तुः पुत्रस्य महत्त्वाऽऽख्यानात् श्रुतिस्मृतिपुराणेषु पुत्रस्य महन्महत्त्वं द्रष्टुं शक्यते।

**'पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः।**

**तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा।।' (गरुडपुराण, अध्याय ७।९ )**

पुत्रेण कीदृशेन भाव्यन्तथा कतिप्रकारकाः पुत्रा भवन्तीति विषये धर्मशास्त्रप्रयोजकानां मध्ये मतमतान्तराणि प्राप्यन्ते। धर्मशास्त्रानुसारेण कुत्रचिद्ग्रन्थेषु द्वादशप्रकारकाणां पुत्राणां वर्णनं लभ्यते चेत्क्वचित् त्रयोदशप्रकारकाणामन्यत्र च पञ्चदशप्रकारकाणां वर्णनमस्ति। परन्त्वाऽऽचार्यैर्विशेषतो द्वादशप्रकारकाः पुत्रा भवन्तीति निर्दिष्टाः। औरसः पुत्रिकापुत्रः क्षेत्रजश्च तथा परः।

**पौनर्भवश्च कानीनः सहोढश्च तथा सुतः।**

**गूढोत्पन्नो दत्तकश्च क्रीतश्चैव तथा परः।**

**अपविद्धस्तूपगतः शूद्रापुत्रस्तथैव च।**

**एते द्वादश वै पुत्रास्तेषां वक्ष्यामि लक्षणम्।**

**संस्कृतायां स्वयं जातः पुत्र औरस उच्यते। (विष्णुधर्मोत्तरपुराणम् अध्याय ३३।१।११)**

भिन्नविधानां बहुप्रकारकाणां पुत्राणामुल्लेखेषु प्राप्तेष्वपि मनुयाज्ञवल्क्यादिनिर्दिष्टानुसारेण द्वादशविधपुत्रमध्ये समेषामपि समावेशो विहितः।

तेषामेवौरसप्रभृतीनां समस्तानां द्वादशविधानां पुत्राणां परिचयः स्वरूपञ्चेत्यस्मिन्ग्रन्थे प्रस्तूयते।

**औरसपुत्रः**

वैदिकसनातनविधिद्वारा विवाहसंस्कारकृतायां धर्मपत्न्यां गर्भाधानपूर्वकमुत्पन्नं पुत्र औरसः कथ्यते।

**स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धियम्,**

**तमौरसं विजानीयात् पुत्रं प्रथमकल्पितम्। (मनुस्मृतिः, ९।१६६)**

शास्त्रेषु निर्दिष्टानां पुत्राणां मध्ये श्रेष्ठः प्रधानश्चौरसपुत्र एव। औरस एव मुख्यः पुत्र इति धर्मशास्त्रे परिभाषितः। अन्येऽवशिष्टाः पुत्रा अमुख्या अप्रधानाश्च। पुत्रिकापुत्रोऽर्थादात्मजायाः पुत्रः पुत्रस्वरूपोऽस्ति। अतः पुत्रिकापुत्रोऽप्यौरसपुत्रतुल्य एव। औरसपुत्रो कीदृशो भवतीति धर्मशास्त्रेषु मनुवशिष्ठयाज्ञवल्क्यबौधायनादिभिर्व्याख्यातः।'औरसो धर्मपत्नीजस्।' (याज्ञवल्क्यस्मृतिः, २।१२८) 'द्वादशैवपुत्राः पुराणदृष्टाः। स्वयमुत्पादितस् स्वक्षेत्रे संस्कृतायां प्रथमः।' ( वशिष्ठस्मृतिः, १७।१२।१३) शास्त्रसम्मतविधिना विवाहितायाः स्वधर्मपत्न्या औरसपुत्रस्य जन्माभावे पुत्ररूपेण पुत्रिकापुत्रस्य ग्रहणविधानमपि शास्त्रसम्मतमस्ति। औरसपुत्रपुत्रिकापुत्रयोरन्तरं नास्ति किञ्चित्। महर्षियाज्ञवल्क्यस्य मतेऽपि द्वयोरपि समानता प्राप्यते। पुत्रिकापुत्रो खलु द्विप्रकारको भवति। अपुत्रः सन् पुत्रीवता जनेन पुत्रिकापुत्रार्थं पुत्र्या वाग्दानसमये वरायाऽनुरोधः कर्तव्यो भवति। यथा "एतस्या पुत्र्या जनिष्यमाणः पुत्रो भवता मह्यं दातव्यः। तं शिशुमहं स्वस्य पुत्रं मत्वा धारयामि अन्यथा कन्यादानेऽहमसमर्थः "। इति पूर्वमेव संसूचयितव्यम्।

**'अभातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्।**

**अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति।।' (वशिष्ठस्मृतिः, १७.१८)**

पुत्रिकापुत्र इत्यत्र षष्ठीसमासो गम्यते। पुत्रिकैव पुत्रः पुत्रिकापुत्र इति कर्मधारयोऽपि विवक्षितः। यथाऽऽह गौतमः" तृतीयः पुत्रिकैवेति तृतीयः पुत्रः पुत्रिकैवेत्यर्थः। क्षेत्रजः- क्षेत्रजात- नियोगादुत्पन्नः। सगोत्रेणेतरेण वेत्युत्तरेणान्वयः। इतरेण- सपिण्डेन देवरेण वा। गूढजो गूढोत्पन्नः पितृगृहे प्रच्छन्नमुत्पन्न इत्यर्थः। सवर्णजत्वनिश्चये सतीति शेषः।" वर इमां वार्तां स्वीकरोति चेदेव विवाहो भवति। तादृश्यां अभातृकायां कन्यायां शास्त्रीयविधिना विवाहितायां भर्तुः समागमेनोत्पन्नः पुत्रः पुत्रिकापुत्र कथ्यते। पुत्रीमेव पुत्ररूपेणाऽङ्गीकृत्य च पुत्रिकापुत्रं स्वीकर्तुं शक्यते। विवाहितां पुत्रीं पुत्रमिव गृह एव

संस्थाप्य पैतृकसंपत्तेः सर्वाधिकारप्रदानविधानमेव पुत्रिकापुत्र इति मन्यते। व्याकरणदृष्ट्या 'पुत्रिकायाः पुत्रः' इति पुत्रिकापुत्रस्य व्याख्यानं सम्भवति। महर्षिणा वशिष्ठेनाऽपि पुत्र्याः पुत्रत्वेन स्वीकारेण 'पुत्रिका एव पुत्रः' इतिवद्व्याख्यातम्। इतो ज्ञायते यत् प्राचीनकाले च पुत्रीं पुत्रमिव सम्पत्तावधिकारप्रदानप्रचलनमासीदिति। अन्यच्च पुत्र्याः पुत्रं गृहे संपुष्य सम्पत्तेरधिकारप्रदानप्रचलनमपि प्राप्यते।

**क्षेत्रजः**

विधिरयं कलियुगे निषिद्धोऽस्ति। नियोगविधिना देवराद् गर्भाधानं कृत्वा जनितः पुत्रः क्षेत्रजः कथ्यते। कारणवशादपुत्रवत्यामवस्थायां पत्युः श्वश्रूश्वशुरयोर्मान्यानां वाऽऽज्ञामनुमितिञ्च गृहीत्वा स्वेच्छया स्वस्य देवरात् सापिण्ड्यान्तर्गतात् कस्माच्चित् पुरुषाद् गर्भाधानं कृत्वा पुत्रप्राप्तेर्व्यवस्था शास्त्रे प्राप्यते।

**'अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।**
**सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्।**
**आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथा भवेत्।**
**अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः।' (याज्ञवल्क्यस्मृतिः १-६८।६९)**

अस्मिन् विधौ रजस्वलाऽऽरम्भदिनादेव विभिन्नानां नियमानां पालनं कृत्वा निश्चितसमय एव यौनसम्बन्धादिकं कर्तव्यं भवति। तथा च यौनकार्ये कर्तव्ये दिवसे सम्पूर्णे शरीरे घृतलेपनं कृत्वा आगर्भं शारीरिकसम्बन्धस्थापनं कर्तव्यम्।

**देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया।**
**प्रजेप्सिताऽऽधिगन्तव्या संतानस्य परिक्षये।**
**विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।**
**एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन।' (मनुस्मृतिः, ९-५९।६०)**

एवंरीत्या स्वस्य पतिरसक्षमश्चेन्मान्यानामाज्ञया स्वेच्छया च सम्बद्धगोत्रवतो योग्यात् पुरुषाद् गर्भधारणेनोत्पन्नः पुत्रः क्षेत्रज इति महर्षिणा याज्ञवल्क्येन स्पष्टीकृतम्।

क्वचित् खलु वाग्दाने कृते परन्तु विवाहपूर्व एव वरस्य मृत्यौ विवाहयोग्यया कन्यया नियोगविधिना पुत्रोत्पादने न काऽपि समस्येत्युल्लिखितमस्ति। तस्मिन् कार्ये सम्बन्धितकन्यायाः स्वेच्छैव निर्णायिकाऽऽवश्यकी मन्तव्या। विधवायामवस्थायां विवाहितया स्त्रिया नियोगविधिना देवराद् गर्भधारणं कर्तुं शक्यते, न तु मनोरञ्जनार्थं सम्भोगादिकं करणीयं कृते च सहवासे द्वावपि पतितौ भवत इति शास्त्रीयमान्यता वर्तते।

**'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।**

**तां अनेन विधानेन निजो विन्देत देवरः।**

**यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम्।**

**मिथो भजेता प्रसवात्सकृत्सकृदृतावृतौ।' (मनुस्मृतिः, ९.६९-७०)**

धर्मशास्त्रानुसारेण क्षेत्रजपुत्रः क्षेत्रज–द्वयामुष्यमाण भेदाद् - द्विविधा। गर्भदो जनोर्बीजी कथ्यते। सपत्नीकः पतिः क्षत्री कथ्यते। बीजीक्षेत्रिणोरनुमत्याः जनिष्यमाणः शिशुरुभयोरावयोर्भवतीति निश्चयः कार्यः। तादृशः शिशुर्द्विपितृको भवति। तेन शिशुनोभयोः पित्रोर्मृत्योः पश्चात् पिण्डदानादिकं संस्कारं कर्तव्यमिति शास्त्रे विधिरुपलब्धोऽस्ति। स च शिशुरुभयोः पित्रोर्गोत्रं पैतृकसम्पत्तिञ्च प्राप्नोति। (आचार्य, गोविन्दप्रसाद, शास्त्रीय अंशबण्डा......, पृ. ६१०) पुत्रोत्पादनेऽसमर्थो नपुंसको रोगी वा पतिरस्ति चेत् पत्युरनुमतिना कस्यचन पुरुषस्य गर्भमाधायोत्पन्नः पुत्रश्च क्षेत्रज एव। साम्प्रतं स एव विधिः 'आइभिएफ' 'टेष्टट्युब बेबी' वेति नाम्ना प्रसिद्धम्। कस्यचिद्गर्भं प्रविधेः सहयोगेन कस्याश्चन कुक्षौ प्रक्षिप्य क्रियमाणां प्रक्रियामाधुनिकीं प्रक्रियां कथयन्ति। नार्या गर्भाशयः कृषिक्षेत्रमिवोर्वर उत्पादनक्षमश्च भवति। यदाऽऽरोप्यते तत्फलति। निष्कर्षे स्वपतावसमर्थे ज्ञाते समाजस्य संस्कृतेश्चाऽनुमतिप्राप्तेन क्षेत्रिणा पतिपत्न्योः सहमतौ कृतेन गर्भाधानेनोत्पन्नः शिशुरेव क्षेत्रज इति बोद्धव्यः।

**दत्तकपुत्रः**

अपुत्रवते पुत्रेच्छवे माता वा पिता वा ददाति, मातापितरौ वोभौ शास्त्रीयविधिना स्वपुत्रं दत्तः। तादृशः पुत्रो दत्तकपुत्रो भवति।

**औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः।**

**दद्यान्माता पिता वापि स पुत्रो दत्तको भवेत्। (पराशरस्मृतिः, ४-२४)**

**अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः।**

**दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। (याज्ञवल्क्यस्मृतिः २-१३०)**

**दत्तकोऽर्थात् प्रदत्तः।**

स एव धर्मपुत्र इति प्रसिद्धोऽद्यतनसमये। इत्थंरीत्या दत्तकपुत्रग्रहणसमये व्याहृत्या हवनं कृत्वा शासकस्य ग्रामाध्यक्षस्य मान्यानां वाऽनुमितिं ग्रहणीयमिति शास्त्रे निर्दिष्टमस्ति। वसिष्ठस्य मतानुसारम् "पुत्रं परिग्रहीष्यन् बन्धूनाहूय्य राजनि चाऽऽवेद्य निवेशनस्य मध्ये व्याहृतिभिः हुत्वादूरे बान्धवं बन्धुं सन्निकृष्टमेव प्रतिगृह्णीयात्" (वसिष्ठस्मृतिः १५-६०)

शास्त्रानुसारेण तु धर्मपुत्रस्य दत्तकपुत्रस्य ग्राहकेण जनेन यथासम्भवं सहोदराणां भ्रातृणां सन्ततिर्ग्राह्यः। 'अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्।' (आचार्य, गोविन्दप्रसाद,... पूर्ववत्) सहोदराणामपि पुत्रवत्त्वाभावे सपिण्ड्यन्तर्गता बान्धवाः बन्धुष्वपि स्वकीयं पुत्रं दातुं नेच्छन्ति चेत् त्वन्यगोत्राणां सन्ततिं धर्मपुत्ररूपां दत्तकरूपां स्वीकर्तुं शक्यते। सहोदरैः सपिण्ड्यन्तर्गतैर्वा स्वपुत्रे प्रदत्तेऽपि तं तिरस्कृत्याऽन्येभ्यो जनेभ्यो धर्मपुत्रग्रहणं तु शास्त्रसम्मतं नैव। दत्तकपुत्रगृहीते कालान्तरे स्वपत्न्याः पुत्रप्राप्तौ धर्मपुत्रत्यागो नैव कर्तव्यः। तस्यामवस्थायामौरसपुत्रधर्मपुत्रयोः पितुः सम्पत्तौ समानमधिकारं प्राप्नुतः। 'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः।' (याज्ञवल्क्यस्मृतिः २-१२७)

**कृत्रिमः (कृतपुत्रः)**

यस्य न स्तो मातापितरौ तादृशं बालं स्वपुत्रस्य रूपेण गृह्यते चेत् सः कृतपुत्र इति धर्मशास्त्रे व्याख्यातम्। तेन बालकेन सजातीयेन भवितव्यम्। ब्राह्मणक्षत्रियवैश्यशूद्रैः क्रमेण ब्राह्मणक्षत्रियवैश्यशूद्रा एव कृतपुत्ररूपेण स्वीकर्तव्याः। कृतपुत्रग्रहणविधौ सजातीय एव बालक आवश्यकः। 'सदृशं यं सकामं स्वयं कुर्यात्स कृत्रिमः।' ( बौधायनधर्मसूत्र, २-२-३-२१) कृतोऽर्थात् कृत्रिमः। जन्मनाऽन्यस्य पुत्रं येन केनोपायेन स्वस्य पुत्रं मन्यते चेत् सः कृत्रिमः पुत्रः। तादृशैश्च च सजातीयैः पुत्रगुणैर्युक्तैर्भवितव्यमिति मनुयाज्ञवल्क्यादीनां मतम्।

**'सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम्।**

**पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः।' (मनुस्मृतिः, ९ -१६९)**

**गूढजपुत्रः**

शास्त्रीयविधिना विवाहितया पत्न्या पत्युर्गृहे निवसन्त्या पुत्रहीनया पुत्रसहितया वा स्वपत्युरनुमतिं विनैव कस्यचिदज्ञातस्य व्यक्तेर्गर्भं धृत्वा शिशुरुत्पाद्यते चेत् सः शिशुर्गूढज इत्युच्यते।

**'सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम्।**

**पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः।' (मनुस्मृतिः, ९.१६९)**

गूढोऽर्थाद् गुप्तः। तस्माज्जात इति गूढजः। स्वस्य पुत्रोत्पादनाक्षमत्वे पत्न्याऽन्यस्य गर्भं संधृत्य पुत्र उत्पाद्यते तमेव पुत्ररूपेण स्वीक्रियते तर्हि सो गुप्तजो गूढजो वा।

**अपविद्धपुत्रः**

मात्रा पित्रा मातापितृभ्यां वा त्यक्तं पुत्रं यदि कश्चन स्वस्य पुत्ररूपेण स्वीकरोति बिभर्ति च तर्हि तादृशः पुत्रोऽपविद्धपुत्रः भवति –

**'उत्पद्यते गृहे यस्तु न च ज्ञायेत कस्य सः।**

**स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः।' (मनुस्मृतिः, ९.१७०)**

अपविद्धपुत्रस्य विषये महर्षिभिर्बौधायनमन्वादिभिर्लिखितं विद्यते। अपविद्धो वा क्षेत्रजो वौरसो वा गूढजो वा पुत्रिकापुत्रो वा सर्वे सजातीया एव पुत्ररूपेण स्वीकारार्हा इति धर्मशास्त्रस्य मान्यताऽस्ति। औरसक्षेत्रजदत्तककृत्रिमगूढजाऽपविद्धाः पुत्राः पूर्वषट्कसंज्ञया उच्यन्ते।

**'मातापितृभ्यां उत्सृष्टं तयोरन्यतरेण वा।**

**यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते।' (मनुस्मृतिः, ९.१७१)**

**कानीनपुत्रः**

अविवाहितायामेवाऽवस्थायां पितृसदने पितृपरिचयहीने पुत्रे जनिते तादृशः पुत्रः कानीनपुत्रो भवति।

**'पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः।**

**तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्।' (मनुस्मृति, ९.१७२)**

तस्मिन् पुत्रे मातामहस्यैवाऽधिकारो भवति।

**'कानीनः कन्यकाजातः मातामहसुतो मतः।' (याज्ञवल्क्यस्मृतिः २.१२९)**

महाभारतग्रन्थे कुन्त्या ज्येष्ठपुत्रः कर्णो यः सूर्यस्योपासनया जनित आसीत् सः कानीनो वर्तते।

कर्णस्य जन्म कुन्त्या गर्भतोऽभूत्। तस्मिन् समये कुन्ती कुमारी कन्याऽऽसीत्। दुर्वासानाम्ना ऋषिणा दत्तस्य मन्त्रस्य प्रयोगौत्सुक्येन भगवतः सूर्यस्य पुत्ररूपेण कर्णस्य जन्माऽभूत्। लोकमर्यादया लज्जया भीत्या च कुन्ती तं शिशुं काष्ठमञ्जूषापात्रे निधाय नद्यां विसृष्टवती। सूतोऽधिरथस्तस्य पत्नी च नदीमेकदा स्नानार्थङ्गतौ तदा तौ नद्यां तत्पात्रं प्राप्तवन्तौ। तस्मिन्नुद्घाटयिते पात्रे शिशोर्लाभः। तमेव शिशुं तौ गृहमानीतवन्तौ यथासम्भवैरुपायैश्च शिशोः पालनं भरणञ्च कृतवन्तौ। तौ तस्य बालकस्य नाम वसुषेण इति कृतवन्तौ।

धृतराष्ट्रस्य सामीप्यादधिरथः कर्णस्य शिक्षां दीक्षाञ्च द्रोणाचार्यात् कारयितवान्। यथाकालेन कर्णोऽस्त्रविद्यायां निपुणोऽभूत्। वेदवेदाङ्गानां ज्ञाताऽभूत्। कर्ण अत्युदारः

सत्यवाक् पराक्रमी बुद्धिमाञ्चाऽऽसीत्। सः प्रतिदिनं सन्ध्योपासनादिकं करोति स्म। तस्मिन् समये संप्राप्ता ब्राह्मणास्तं यद्वस्तु कामयन्ते  तद्वस्तु कर्णस्तेभ्यः नूनं प्रयच्छति स्म। कर्णो बाल्यादेव भीमसेनस्य बलमर्जुनस्य धनुष्कलां युधिष्ठिरस्य बुद्धिं नकुलसहदेवयोस्सहनशीलतां नम्रस्वभावं तथा कृष्णार्जुनयोर्मित्रतां दृष्ट्वा समत्सरो भवति स्म। अतो विद्यार्थिकालादेव दुर्योधनेन सह मित्रतां कृतवान्।

अर्जुनस्य धनुर्विद्यायां पराक्रमं दृष्ट्वैकदा गुरोर्द्रोणाचार्यस्य सकाशात् स ब्रह्मास्त्रविद्यायै गतवान्। कर्णाऽर्जुनयोश्शत्रुताया विषये द्रोणाचार्योऽभिज्ञ आसीत्। अतः शास्त्रविधौ ब्रह्मचर्यव्रतपालको ब्राह्मणः क्षत्रियो वैव ब्रह्मास्त्रज्ञानस्याऽधिकारिणौ भवत इति द्रोणाचार्यः कर्णमुक्तवान्। उदासीनः कर्णो गुरोराज्ञया तत्रतो गतवान्। महेन्द्रपर्वते संप्राप्य स्वं भृगुवंशिब्राह्मणस्य रूपेण परिचाययितवान्। शिष्यभावेन परशुरामस्तं शरणं दत्तवान्। तत्रैवोषित्वा कर्णो विधिवद्रूपेण ब्रह्मास्त्रस्याऽभ्यासं कर्तुमारब्धवान्।(महाभारतस्य प्रसिद्ध प्रसंग) कानीनपुत्रस्य विषये महर्षिभिर्योगीश्वरबौधायनमन्वादिभिर्व्याख्यातम्।

**सहोढपुत्रः**

गर्भवत्यस्तीति ज्ञातेऽज्ञाते वा शास्त्रीयविधिना कस्याश्चन कन्यायाः पाणिग्रहणङ्क्रियते चेत्तस्यां कन्यायामुत्पद्यमानः पुत्रोऽन्यस्य बीजे सत्यपि सहोढ इति कथ्यते।

**'या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती।**

**वोढुः स गर्भो भवति सहोढ इति चोच्यते।' (मनुस्मृति, ९.१७३)**

सति विवाहे यस्य कस्यापि गर्भे सत्यपि जायमानः शिशुर्विवाहितपुरुषस्यैव भवति। एतादृशस्य विवाहस्य प्रसङ्गो महर्षिणा बौधायनेनोल्लिखितं प्राप्यते। 'असंस्कृतामनतिसृष्टां यामुपयेच्छेतस्यां यो जातस्स कानीनः।' (बौ.ध.सू.२-२-३-२४)

**पौनर्भवः**

पतौ पतितेऽपतिते नपुंसके मृते जीविते वा यावति परिस्थितौ गते तं परित्यज्य पत्नी परं पुरुषमुद्वहति चेत् सा पुनर्भूसंज्ञया ज्ञायते। तस्या गर्भतो जातं पुत्रं पौनर्भवं वदन्ति शास्त्राणि।

**'या पत्या वा परित्यक्ता विधवा वा स्वकेच्छया।**

**उत्पाद्यते पुनर्भूत्वा स पौनर्भव उच्यते।' (महाभारतम्, अनुशासन पर्व, ८४)**

**'या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया।**

**उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥' (मनुस्मृतिः, ९.१७५)**

महर्षिणा बौधायनेनेदृशस्य पुत्रस्य विषये स्पष्टतो लिखितम्। विधवयाऽपरे विवाहे कृते तत उत्पन्नं पुत्रमपि पौनर्भवमामनन्ति। यस्य गर्भो वर्तते तस्यैव भवति तादृशः पुत्रः। विवाहसंस्कारहीनया संस्कारपूर्वकं विवाहितया वाऽन्यपुरुषसंयोगेनोत्पादिते पुत्रे तादृशो बालः पौनर्भव इति। अन्ते च विवाहिता नारी पतिं विहाय परपुरुषेणोद्वाहं कृत्वा पुत्र उत्पाद्यते चेत् सः पौनर्भवः।

'अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः।' (याज्ञवल्क्यस्मृतिः व्यवहाराध्यायः, १३०)

**क्रीतपुत्रः**

मातापितरौ धनं दत्त्वा तयोः पुत्रमपत्यार्थं क्रीणीयात् कश्चित्तर्हि तादृशः पुत्रः कृतपुत्र इति। क्रीतश्च यः पुत्रः, सः क्रीतपुत्रः। तादृशं पुत्रं महर्षिर्मनुः सदृशासदृशमिति व्याख्याञ्चकार।

**'क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यं अन्तिकात्।**

**स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥' (मनुस्मृतिः, ९.१७५)**

सदृशासदृशोऽर्थात् क्रीतो यः पुत्रोऽस्ति येन सोऽक्रीयत तत्साम्येन गुणलक्षणेन भाव्यमिति मान्यताऽस्ति। तादृशः पुत्रो यदि पितुर्गुणैर्युक्तश्चेद्ग्राह्योऽन्यथाऽग्राह्यः। मनुबौधायनादिभिर्महर्षिभिर्धर्मशास्त्रप्रयोजकैः क्रीतपुत्रस्य विषये व्याख्यातम्-

**स्वयंदत्तः 'मातापित्रोर्हस्तात् क्रीतोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते, स क्रीतः।' (बौ.ध.सू., २.२.३.२६)**

मातापितृभ्यां हीनोऽकारणात् त्यक्तो वा बालक आत्मानम् 'अद्यतोऽहं तव पुत्रः' इति पूर्णरूपेण अन्यौ मातापितरौ स्वीकुरुते चेत्तदा सः स्वयंदत्त इति कथ्यते। यस्तं स्वीकरोति तस्यैवाऽधिकारस्तस्मिन्। योगीश्वरैर्मनुबौधायनादिभिर्महर्षिभिरेतस्मिन्विषये स्वस्मृतिग्रन्थेषूल्लिखितमस्ति -

**'मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्।**

**आत्मानं अर्पयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ॥' (मनुस्मृतिः, ९.१७५)**

**शौद्रः**

ब्राह्मणः कस्याँश्चिद्विवाहितायां शूद्रायां स्त्रियां अविवाहितायामपि वा कामात् पुत्रमुत्पादयति चेत् तादृशः पुत्रः शौद्र इति। तादृशं पुत्रं धर्मशास्त्रप्रयोजकाः पारशवं निषादञ्चेति नामकरणमकुर्वन्।

**'यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम्।**

**स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः।।**

**दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्।**

**सोऽनुज्ञातो हरेदंशं इति धर्मो व्यवस्थितः ॥' (मनुस्मृतिः, ९.१७८-१७९)**

विवाहितायामविवाहितायां वा यस्यामप्यवस्थायां शूद्रायारुत्पन्नः शिशुर्ब्राह्मणस्य सजातीयो भवितुं नार्हति। वर्णह्रासस्तदा ज्ञेयः। महर्षिणा याज्ञवल्क्येन तु द्वादशविधेषु पुत्रेषु व्याख्यातेषु शौद्रः पुत्ररूपो नैव स्वीकृतः। महर्षयो मनुगौतमादयः पूर्ववर्णितं द्वादशविधं पुत्रं षट्कद्वयरूपेण भागद्वये विभाजनं चक्रुः।

**'पुत्रान्द्वादश यानाह नृणां स्वायंभुवो मनुः।**

**तेषां षड्बन्धुदायादाः षडदायादबान्धवाः।।**

**औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।**

**गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्।।**

**कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।**

**स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः।।' (मनुस्मृतिः, ९। १५८- १५९-१६०)**

औरजक्षेत्रजदत्तककृत्रिमगूढजाऽपविद्धाः प्रथमषट्के चेत् कानीनसहोढक्रीतपौनर्भवस्वयंदत्तशौद्रास्तु द्वितीयषट्के विभक्ताः। प्रथमषट्के सम्पतिता बन्धुदायादाः कथ्यन्ते चेदन्या अबन्धुदायादाः। द्वितीयषट्के गणिताः पुत्रा मातापित्रोर्धनं भरणपोषणार्थमेव प्राप्नुवन्ति न त्वंशरूपेण। विशेषत औरसपुत्र एव पुत्रो वर्तते। तदतिरिक्तत्वेन सर्वप्रकारकाः पुत्राः केवलं प्रतिनिधिभूताः। तथैवाऽत्मजपरजलब्धयादृच्छिकाश्च पुत्राः चतुर्भागे विभक्ताः। 'एते द्वादशपुत्रास्तु सन्तत्यर्थमुदाहृताः। आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा।' (वीरमित्रोदयः, व्यवहारप्रकाश, १-७१)

औरसपुत्रिकापुत्रपौनर्भवशौद्राश्चाऽत्मजाः पुत्राः सन्ति। आत्मनः स्वस्मात् जायत इति आत्मजः। अन्यजनेन स्वस्य पत्न्यां गर्भं दत्त्वोत्पादितः पुत्रः स्वीक्रियते चेत् सः क्षेत्रजः। तादृशः पुत्रः परजो भवति। दत्तककृत्रिमक्रीतस्वयंदत्ताऽपविद्धाश्च पुत्रा लब्धपुत्राः। गूढजकानीनसहोढाश्च त्रयो यादृच्छिकाः पुत्राः। स्वेच्छया स्वाऽनुमतिं प्रदाय च स्वपत्न्यां जनितो वा ज्ञाताऽज्ञाततया गर्भवत्या नार्या पत्नीरूपेण स्वीकारे तस्यामुत्पद्यमानः पुत्रो यादृच्छिको भवति।

तथा च पुत्रमंशभागिनो रूपे गोत्रभागिनो रूपे च वर्गीकृतं विद्यते। गोत्रभाग् केवलं पितुर्गोत्रं प्राप्नोति न तु सम्पत्तिम्। अंशभाग् पितुर्गोत्रं सम्पत्तिञ्च प्राप्नोति।

तथैवाऽनुलोमजप्रतिलोमजौ च पुत्रौ भवतः। अनुलोमजं पुत्रं सन्तपुत्रं वदन्ति चेत् प्रतिलोमजमसन्तपुत्रम्। (आचार्य, गोविन्दप्रसाद, शास्त्रीय अंशबण्डा...., पृ. ६५) विष्णुस्मृतिग्रन्थानुसारेण विवाहा अष्टविधा भवन्ति। ब्राह्म -दैव - आर्ष - प्राजापत्य - गान्धर्व -आसुर- राक्षस- पैशाचश्चेति। (विष्णुस्मृतिः,२४अध्याय १७-१८) विवाहेषु मध्ये ब्रह्म–आर्ष–प्राजापत्याद्युत्तमविवाहविधिभिरानीतायां पत्न्यामुत्पन्नः पुत्र एवोत्तमपुत्रोऽस्ति।

शास्त्रे एतेषामेतादृशानां वा द्वादशविधानां विभिन्नानां पुत्राणां निर्देशनं विद्यते। परन्तु कलियुगे विशेषत औरसं तथा दत्तकं (धर्मपुत्रं) एव पुत्रं पुत्ररूपेण स्वीकृतम्। ताभ्यामेव गोत्रमंशञ्च दीयते। अन्यप्रकारकान् पुत्ररूपेण नैव स्वीकृतन्तथांऽशगोत्रयोरधिकारो नैव दत्तः।

**निष्कर्षः**

धर्मशात्रेण पुत्रस्य महन्महत्त्वं व्याख्यातम्। पुराणेष्वनेकप्रकारकाणां नरकाणां वर्णनं विद्यते। पुन्नाम नरकोऽपि तत्र वर्णितोऽस्ति। धर्मशास्त्रानुसारेण जीवितस्य पुत्रस्य मुखे दृष्टे मातापितरौ पुन्नरकं नैव गच्छन्ति तत्रत्यानां यातनानां भागिनौ च नार्हतः। यो मातापितरौ पुन्नामनरकात्त्रायते सः पुत्र इति गोपथब्राह्मणग्रन्थे स्पष्टत उल्लिखितमस्ति। एवञ्च नरकत्रातुः पुत्रस्य महत्त्वाऽऽख्यानाद्धर्मशास्त्रे श्रुतिस्मृतिपुराणेषु च पुत्रस्य महन्महत्त्वं प्राप्यते। पुन्नामनरकत्राणं मातापित्रोरेव पुत्रस्य परमं कर्तव्यमस्ति। तदतिरिक्तत्वेन वंशविस्तारक्रमे च पुत्रस्य विशिष्टं महत्त्वं भवति। मृतयोश्च मातापित्रोः पिण्डतर्पणादिकं कार्यमपि पुत्रेण कर्तव्यम्। औरसक्षेत्रजादिना द्वादशप्रकारेण पुत्रा विभक्ता ऋषिभिर्मुनिभिश्च।

जीवितया मातापित्रोर्वाक्यकरणाद् वृद्धावस्थायां पथ्यभोजनादिकं भोजयितवा तथा च मृत्योः पश्चाद्गयादिषु पिण्डदानाच्च पुत्रस्य पुत्रत्वं सिद्ध्यति। कतिपयैर्मुनिभिश्चतुर्षु प्रकारेषु पुत्रस्य विभाजनं कृतम्। विभागव्यतिरिक्तत्वेन पुत्रस्य महत्ता तु विशिष्टैव। गृहस्थिना येन केनोपायेन पुत्रप्राप्त्यै प्रयतितव्यमिति महर्षीणामेकमतम्। अत औरसक्षेत्रजपुत्रिकापुत्रादिद्वादशप्रकारैः पुत्राणां परिकल्पना स्वीकृता। सहस्रेभ्यो दुर्गुणिभ्यः पुत्रेभ्य एको गुणी पुत्र एवोत्तमो यथा सहस्रतारकादिभ्यश्चन्द्रमा श्रेष्ठतम इति नीतिशास्त्रे निश्चप्रचम्। पुत्रशब्दतो न केवलं पुंलिङ्गविशिष्टो बोद्ध्योऽपि तु मातापित्रोरिहलोकपरलोकसंस्कारिका पुत्री च बोद्धव्येति केषाञ्चिद्विदुषां मतम्। एतानेव द्वादशप्रकारकाः पुत्रा महर्षिभिरात्मजपरजलब्धजयादृच्छिकदिशा चतुर्षु प्रकारेषु

विभाजिताः। एवमनुलोमजः प्रतिलोमजश्च पुत्रप्रकारकावेव। एतादृशप्रकारेण धर्मशात्रेण विभिन्नानां पुत्राणां स्वरूपमहत्त्वे व्याख्याते।

**सन्दर्भग्रन्थसूची**


अथर्ववेद एवं गोपथब्राह्मण, अनु. सूर्यकान्त, १६६ सिरिज, चौखम्बा संस्कृत सिरिज, वाराणसी, सन् १९९५।

आचार्य, गोविन्दप्रसाद, शास्त्रीय अंशबण्डा र नेपालमा प्रचलित अंशबण्डाको तुलनात्मक समीक्षा, श्रीमती इन्दिरा आचार्य, २०६९ वैक्रमाब्दे।

गौतम, गौतमधर्मसूत्राणि, चौखम्बा संस्कृत सिरिज, वाराणसी, सन् १९६६।

पन्थी, डा. लक्ष्मीकान्त, हिन्दू संस्कार परिचय र विमर्श, काठमाडौं, रत्न पुस्तक भण्डार, २०७४ वैक्रमाब्दे।

मनु, मनुस्मृति, अनु. शिवराज कौण्डिन्न्यायन, चौखम्बा संस्कृत संस्थान वाराणसी, २०४९ वैक्रमाब्दे।

मित्रमिश्र, वीरमित्रोदय (व्यवहारप्रकाश) अनु. विष्णुप्रसादशर्मा, चौखम्बा संस्कृत सिरिज, वाराणसी, सन् १९९५।

याज्ञवल्क्यस्मृति, ( मिताक्षरा ) याज्ञवल्क्य, निर्णयसागर मुद्रण यन्त्रालय, सन् १९२६।

रामायण, ( मूलमात्रम् ) वाल्मीकि, गीताप्रेस, गोरखपुर, द्वितीय संस्करण,२०२० वैक्रमाब्दे।

व्यास, महाभारत आदिपर्व, गीताप्रेस, गोरखपुर, सन् १९५१।

विष्णुः, विष्णुस्मृति, टीकाकार नन्दपण्डित, दि अड्यार लाइब्रेरी रिसर्च, अड्यार, मद्रास, सन् १९६४।

व्यास, गरुडपुराण, लुईंटेल, तिलकप्रसाद, अनु., विद्यार्थी पुस्तक भण्डार, २०७० वैक्रमाब्दे।

व्यास, श्रीमद्देवीभागवतमहापुराण, १३ औं पुनर्मुद्रण, गीताप्रेस, गोरखपुर, २०७१ वैक्रमाब्दे।

भट्ट, कमलाकर, निर्णयसिन्धु, अनु. प्रा.डा. वेणीमाधव ढकाल, विद्यार्थी पुस्तक भण्डार, २०७१ वैक्रमाब्दे।

शंकराचार्यः, भाष्यकारः, ईशादिदशोपनिषदः, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रण सन् १९७८

# विवाहसंस्कारनिरूपणम्

**डा. नारायणप्रसादबरालः**

सहप्राध्यापकः(शुक्लयजुर्वेदः)

नेपालसंस्कृतविश्वविद्यालयः

वाल्मीकि विद्यापीठम्, काठमाडौँ

**लेखसारः**

*वैदिकसंस्काराणां चिन्तनं मानवानां सर्वतो हिताय एव वर्तते। तेषां संस्काराणां सङ्ख्याविषये गृह्यसूत्राणां धर्मसूत्राणां, स्मृतिपुराणादीनां मतैक्यं नास्ति। तत्र प्रतिपादितानां संस्काराणां सङ्ग्याविषये अस्मिन् लेखे साधु विवेचितम्। संस्काराणां समुचितसंम्पादनेन मनुष्याणामभ्युदयो भवति। इदानीं प्रचलितेषु षोडशसंस्कारेषु गृहस्थाश्रमप्रवेशस्य प्रधानभूतस्य विवाहसंस्कारस्य विवेचनमत्र विधीयमानं वर्तते। तस्मिन् क्रमे विवाहस्य प्रकाराः, वरवध्योर्वयः, स्वयंवरविधिः, वरकन्ययोर्लक्षणपरीक्षणम्, विवाहकर्मणि प्रयुक्ता होमाः, विवाहस्य प्रमुखकृत्यादीनि कर्माण्यत्र प्रतिपादितानि सन्ति। अन्ते सुसंस्कृतो मनुष्य एव राष्ट्रस्य समाजस्य समुदायस्य च निर्माणाय जनान् अग्रे नयतीति हेतोरस्माकं वैदिकधर्मे संस्काराणां नितरां चिन्तनं विहितं विद्यते।*

**विषयपरिचयः**

समुपसर्गपूर्वकाद् डुकृञ् करणे करणार्थककृधातोर्भावे घञि सुडागमे वृद्धौ च संस्कारशब्दो निष्पद्यते। कस्यचित् पदार्थस्य दोषापनयनं विधाय गुणाधानमेव संस्कारपदबोध्यार्थः। संस्कारशब्दस्य चिन्तनं धर्मशास्त्रेषु, पुराणेषु मीमांसा शास्त्रेषु च विविधस्थानेषु विभिन्नार्थेषु प्रयोगो दृश्यते। मीमांसादर्शने यज्ञस्याङ्गभूतस्य हवनीयपुरोडाशादौ विद्यमानस्य दोषस्य निराकरणार्थे प्रयोगो विहितः। अस्माकं धर्मस्य मूलं तु वेदा एव। अस्माकं शास्त्रे वर्णाश्रमव्यवस्थायां जन्मतः मृत्युपर्यन्तानां संस्काराणां निरूपणमाचार्यैः सूत्रादिग्रन्थेषु विहितम्। ब्राह्मणादीनां चतुर्णां वर्णानां जन्मकालदारभ्य मृत्युकालपर्यन्तानां संस्काराणां वर्णनं गृह्यसूत्रादिषु ग्रन्थेषु समुपलभ्यते। तेषां संस्काराणां सङ्ख्याविषये गृह्यसूत्रेषु, धर्मसूत्रेषु स्मृत्यादिग्रन्थेषु चाचार्याणां मतैक्यं नास्ति। केचन त्रयोदशसंस्कारान् प्रतिपादयन्ति केचन दशसंस्कारान् प्रतिपादयन्ति, केचनषोडशसंस्कारान् प्रतिपादयन्ति। एवं रीत्या अष्टाचत्वारिंशद्यावत् संस्काराणां वर्णनं

वैदिकसूत्रादिषु ग्रन्थेषु समुपलभ्यते। मुख्यतया वैदिकसंस्कारेषु षोडशसंस्काराणां वर्णनं लोकव्यवहारेष्वपि दरीदृश्यते। ते च संस्काराः –१.विवाहः २ गर्भाधानम् ३.पुंसवनम् ४. गर्भरक्षणम् ५. सीमन्तोन्नयनम् ६..जातकर्म ७.नामकरणम् ८.उत्थानकर्म ९.निष्क्रमणम् १०. अन्नप्रशनम् ११. कर्णवेधः १२. चूडाकर्मः १३.गोदानम् १४.उपनयनम् १५.समावर्तनम् १६. अन्त्येष्टिश्चेति षोडशः।

एषु संस्कारेषु गृहस्थाश्रमप्रवेसस्य मुख्यसंस्कारो विवाह एव। वेदाध्यनं व्रतादिकञ्च समाप्य गुरोराज्ञया स्नानं विधाय गृहस्थाश्रमप्रवेशार्थं सर्वप्रथमं विवाहः कर्तव्यः। षोडशसंस्कारेषु प्रधानभूतस्य विवाहसंस्कारस्य वर्णनं गृह्यसूत्रादिषु समुपलब्धप्रमाणानामनुशीलनञ्चात्र समुपस्थापितम्। विवाहस्य प्रयोजनं विवाहस्य मुख्यानि कर्माणि विवाहस्य भेदा इत्यादिविषयाणां गृह्यसूत्रादिग्रन्थाधारेणात्र विवेचनमस्ति।

**शब्दकुञ्जी–** ब्राह्म्यः, प्राजापत्यः,उत्थानकर्म, आर्षः, आवसथ्याधानः, राष्ट्रभृद्धोमः, अभ्यातनहोमः, लाजाहोमः, परिष्करणम् इत्यादीनि।

**समस्याकथनम् उद्देश्यञ्च**

गृहस्थाश्रमप्रवेशस्य प्रमुखत्वेन विवाहः संस्कारः सम्पाद्यते। तस्यामवस्थायां कदा विवाहः सम्पादनीयः? कया रीत्या कन्यायाः वरस्य वा ग्रहणम्। केन सह करणीय इत्यादिविभिन्नाः समस्या दृश्यन्ते। विवाहानन्तरमेव गृहस्थाश्रमप्रवेशो जायते। विवाहस्य प्रमुखोद्देश्यं किमस्ति केन प्रकारेण विवाहः सम्पाद्यते? विवाहस्य विषये गृह्यसूत्राणां मतैक्यं अस्ति नवेतीत्यादीनां समस्यानां निराकरणय गृह्यसूत्रधर्मसूत्रस्मृत्यादीनामधारेण एतासानां समस्यानां परिपूर्तये शास्त्राणामन्वेषणमेवास्य लेखस्य प्रमुखोद्देश्यं वर्तते।

**शोधविधिः**

अस्मिन् लेखे निगमात्मको विधिर्विष्लेशणात्मकविधिश्च प्रयुक्तो वर्तते। संस्काराणां वर्णनं कल्पशास्त्रेषु सूत्रात्मकत्वात् सूत्रात्मको विधिरप्यवलम्वितो वर्तते। संस्काराणामध्ययनक्रमे पुस्तकालयानामप्युपयोगो विहितः।

**संस्काराणां स्वरूपम्**

समुपसर्गात् कृधातोर्घञ्प्रत्यये सुडागमे कृते सति निष्पन्नस्य संस्कारशब्दस्य अनेकार्थाः शास्त्रकारैः प्रतिपादिताः सन्ति। संस्काराणामर्था आभूषणम्,परिष्करणम्,शोभा, पवित्रता शुद्धता एवं कस्यापि वस्तुनः परिष्करणं विभिन्नशास्त्रे प्रतिपादिताः। परं वैदिकसंस्काराणां प्रयोजनं दोषस्यापनयनं विधाय गुणाधानमेव विद्यते। अतः संस्कारेण संस्कृतो मनुष्यः स्वस्य परिवारस्य समाजस्य राष्ट्रस्य

समुन्नतिं करोतीति वैदिकसंस्काराणामभिप्रायो वर्तते। संस्काराणां सङ्ख्याविषये गृह्यसूत्राणां मतैक्यं नास्ति। पारस्करगृह्यसूत्रे विवाह–गर्भाधान–पुंसवन–सीमन्तोनयन–जातकर्म–नामकरण–निष्क्रमणान्नप्राशन–चूडाकरणोपनयन–केशान्त–समावर्तनान्तेष्टयस्त्रयोदशनिरूपिताः।

परं कात्यायनगृह्यसूत्रे कर्णवेधस्याऽपि विधानं प्राप्यते। एवमेव बौधायनगृह्यसूत्रे त्रयोदश संस्काराः प्रतिपादिताः। विवाहः, गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, उपनयनम्, गोदानम्, समावर्तनञ्चेति। एवं प्रकारेण आश्वलायनगृह्यसूत्रे द्वादशसंस्काराणां वर्णनमस्ति। ऋग्वेदस्य शाङ्ख्यायनगृह्यसूत्रे विवाहः, गर्भाधानम्, पुंसवनम्, गर्भरक्षणम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, अन्नप्राशनम्, चूडाकरणम्, उपनयनम्, अध्ययनविधिः, गोदानम्, समावर्तनमित्यादयः त्रयोदश संस्काराः परिगणिताः विद्यन्ते।

ऋग्वेदस्य कौषीतकिगृह्यसूत्रेऽपि षोडश संस्काराः परिवर्णिताः सन्ति। सामवेदस्य द्राह्यायणगृह्यसूत्रे दश संस्कारा विवेचिताः सन्ति। अथर्ववेदस्य कौशिकगृह्यसूत्रे विवाहगर्भाधानाद्यन्त्येष्टिपर्यन्ताः त्रयोदश संस्काराः निरूपिताः सन्ति। न केवलं गृह्यसूत्रादिषु अपि तु स्मृतिधर्मशास्त्रेषु च संस्काराणां सङ्ख्याऽ पि अन्वेषणीया। व्यासस्मृतौ षोडशसंस्काराः — “गर्भाधानं पुंसवनं सीमन्तो जातकर्म च। नामक्रियानिष्क्रमणोऽन्नाशनं वपनक्रिया। कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः। केशान्तस्नानमुद्वाहो विवाहाग्निपरिग्रहः। त्रेताग्निसंग्रहश्चेति संस्काराः षोडशस्मृताः” (व्यासस्मृतिः१.१३–१५)। इति षोडशः संस्काराः प्रतिपादिताः। एवं गौतमधर्मसूत्रेषु अष्टाचत्वारिंशत् संस्काराः प्रतिपादिताः। एतावता संस्काराणां सङ्ख्याविषये गृह्यसूत्रणां धर्मसूत्राणां स्मृत्यादीनां मतैक्यं नास्ति। भिन्न भिन्न स्थानेषु संस्काराणां सङ्ख्याऽपि भिन्नभिन्नत्वमेव प्राप्यते।

एषु संस्कारेष्वत्र विवाहसंस्कारस्य विषये सर्वतोभावेन चिन्तनं विश्लेषणं च सर्वथा समुचितमेव। विवाह संस्कारादेव गृहस्थाश्रमस्य प्रवेशो जायते। ब्रह्मचर्यगृहस्थवानप्रस्थसन्यासा इति चत्वाराश्रमा वैदिकाः समाचरन्ति। मनुष्यस्य आयुश्चतुर्षु विभागेषु स्मृतिकारैः विभक्तम्। “ चतुर्थमायुषो भागं वसित्वाद्यं गुरोः कुले। द्वितीयमायुषो भागं कृतदारो गृहे वसेत्। वनेषु च विहत्यैव तृतीयं भागमायुषः। चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत् ” ( मनु.४.१–२)। मनुष्यस्य जीवनस्य चतुर्षु भागेषु विभज्य तत्र प्रथमभागे गुरुकुल उपविश्य ब्रह्मचर्यं चरन् विद्याध्ययनं कर्तव्यम्।

द्वितीयभागे वेदं वेदान्वा समाप्य स्नातको भूत्वा समावर्तनं कृत्वा गृहस्थाश्रमः सेवनीयः। सर्वेषां स्नातकानां गृहस्थाश्रमप्रवेशस्तु विवाहादेव जायते। गृहस्थाश्रमप्रवेशस्य प्रस्थानविन्दुर्विवाहसंस्कार एव। विवाहं विना तु समाजस्य परिकल्पनमपि कर्तुं न शक्यते। अतो विवाहसंस्कारस्य वर्णनमेवात्र विहितम्।

**विवाहसंस्कारः**

वहधातोः प्रापणार्थकाद् वहधातोर्भावे घञ्प्रत्यये आदिवृद्धौ विवाहशब्दो निष्पद्यते। वहनं वाहो वा विवाहः। विशिष्टो वाहो विवाहः। तदर्थवाचकाः उद्वाहः, पाणिग्रहणम्,परिणयः, उपयाम इत्यादयः शब्दा दृश्यन्ते। संस्कारोऽयं षोडशसंस्कारेषु समावर्तनोत्तरकालिकसंस्कारत्वेन मन्यते। गुरोः समीपे स्थित्वा वेदाध्ययनादिकं विधाय उभयविधं व्रतञ्च समाप्य स्नातको भूत्वा गुरोराज्ञया स्नानादिकं विधाय विवाहार्थं गृहस्थाश्रमं स्नातकः प्रविशति। ज्ञानव्रताभ्यां निपुणः पुरुषः एव समाजस्य पथप्रदर्शको भवेदिति धियाऽध्यनसमाप्त्यनन्तरमेव विवाहस्य व्यवस्था अस्माकं वैदिकपरम्परायां विधीयते। विवाहस्य समग्रस्य पक्षस्य सूक्ष्मरीत्या गवेषणं आवश्यकं भवति। विवाहसंस्कारः वेदादेव प्रचलितोऽस्ति। विवाहसंस्कारसम्बद्धाः अनेके मन्त्राः ऋग्वेदे समुपलभ्यन्ते। ऋग्वेदे कतिचिन्मन्त्रा विवाहसम्बद्धाः सन्ति।

अथर्ववेदस्य तु चतुर्दशकाण्डे विवाहस्य प्रकरणे काव्यात्मकस्य विवाहस्य परिकल्पनायामनेके मन्त्राः पठ्यन्ते। "तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह। स नः पतिभ्यो जायां वा दग्ने प्रजया सह। पुनः पत्नीमग्निरदायुषा सह वर्चसा। दीर्घायुरस्या यः पतिर्जीवति शरदः शतम" (अथर्ववेद, १४.२.१-२)। अत्र केवलं सूर्याया विवाहस्य वर्णनमस्ति न केवलं तस्याः वर्णनमपि तु विवाहानन्तरं पतिपत्न्योः कीदृशः सम्बन्धः? तयोः कल्याणं केन प्रकारेण जायेद्? इत्यादिविविधविषयाणां दीर्घायुष्यकरं कल्याणकारकं चिन्तनमपि प्राप्यते। अत्र विवाहसंस्कारस्य अनेके पक्षा आलोडिताः सन्ति। अस्माकं जीवनपद्धतौ परस्परस्नेहस्य पारिवारिकजीवनयापनस्य विधौ पितापुत्रयोः सम्बन्धः, पुत्रपौत्रादीनां पालनपोषणदिकर्माण्यपि तदन्तर्गतत्वेन प्रतिपादिताः सन्ति।

ऋग्वेदेऽपि विवाहस्य प्रसङ्गे वहवो मन्त्राः समाम्नाताः "त्वमर्यमा भवसि यत् कनीनां नाम स्वधावन् गुह्यं विभर्षि। अञ्जन्ति मित्रं सुदितं न गोभिर्यद् दम्पती सुमनसा कृणोषि" (ऋग्वेद, ५.३.२.)। इत्यादिषु मन्त्रेषु विवाहस्य वर्णनं पतिपत्न्योः सम्बन्धः, तेषां विविधकर्तव्याकर्तव्यादिविषयाणां निरूपणं विहितम्। अतो वैदिकमन्त्रादेव विवाहसंस्कारस्य सर्वविधान् पक्षान् अवगन्तुं शक्यते। पत्न्या विना न कान्यपि

वैदिककर्माणि सफलानि भवन्ति। यज्ञाः सपत्निकेनैव पुरुषेण संसाध्यन्ते। "अयज्ञीयो वा एष योऽपत्नीकः। न पूजा प्रजयेरन् (तैत्ति. ब्रा.२.२.२.६.)। एकाकी पुरुषः सम्पूर्णत्वं न प्राप्नोति। सम्पूर्णतायै तु विवाहस्यावश्यकता तु भवत्येव। "अथो अर्द्धो वा एष आत्मनः यत् पत्नी "(तै.ब्रा.२.९.४.७) अथ च लोकेऽपि जनैरर्धाङ्गिनीशब्देनाऽपि व्यवह्रियते। अत एव लोके शास्त्रादौ च अर्धनारीश्वरस्य परिकल्पना शिवशक्त्योर्वर्तते। सम्बोधनमपि लक्ष्मीनारायणः, सीतारामः, राधाकृष्ण इत्यादिभिर्नामभिः क्रियते व्यवह्रियते च। विना पत्नीं कान्यपि धार्मिकृत्यादीनि नैव फलोत्पादिकानि भवन्ति। तस्मात् यज्ञयागादिषु कर्मसु सपत्नीकेन भवितव्यम्।

विवाहस्य परमप्रयोजनं तु धर्मार्थकाममोक्षप्राप्तिरेव। विवाहस्तु अस्माकं वैदिकानां कृते एक यज्ञ एव। अतो वैदिकानामवैदिकानामन्येषां वा मानवानां विवाहस्तु सर्वथा आवश्यक एव। यस्माद् वैदिकाः संस्कारस्य रूपेण समाचरन्ति। अन्ये च स्व स्वपरम्परानुसारेण समाचरन्ति। तस्मात् संसारस्य गतिः विवाहानन्तरमेव दृश्यते। यदि विवाहो न स्यात्तदा कथं सन्तानोत्पत्तिर्भवेत्? अतो प्रजातन्तुसंरक्षणाय संवर्धनाय च वर्णाश्रमव्यवस्थायां महर्षिभिः समाजस्य सुव्यवस्थापनार्थमेव विवाहः परिकल्पितः। पुराऽमाकं वैदिकसमाजे स्त्रीपुंसम्बन्धव्यवस्था कथमासीदित्यपि ज्ञातुं संस्कारस्याध्ययनमपरिहार्यमेव। वैदिककाले स्त्रीपुरुषयोः सम्बन्धः परिष्कृतं सुव्यवस्थितञ्च द्रष्टुं शक्यते। न केवलं वैदिके पुराणदिष्वपि स्त्रीपुरुषयोः सम्बन्धः सुसंस्कृतं सुव्यवस्थितञ्च प्राप्यते। परन्तु महाभारतस्याध्ययनेन महाभारतादिसमये स्त्रीपुरुषयोरेक व्यवस्थितः सम्बन्धो नासीदिति ज्ञायते। तत्र महाभारतस्य विभिन्नभागेषु स्वेच्छया सम्बन्धस्थापिता विषया अपि नरूपिताः दृश्यन्ते। ( महाभारत .आदिपर्व, १२२.४-७)। स्त्रीपुरुषयोर्मिथुनादेव सृष्टिर्जायते तस्य च निर्धारणं शास्त्रेणैव विहितम्। समग्रशास्त्राणामन्वेषणेन विज्ञायते यत् मानवानां हिताय स्त्रीपुरुषयोः सुव्यवस्थित यौनसम्बन्धेनैव समाजस्योन्नतिः प्राप्यते इत्यस्माकं शास्त्राणां सिद्धान्त एव। अत एव विवाहादिसंस्काराणां चिन्तनं शास्त्रे दृश्यते। विवाहः कतिविधः? तेषां समययश्च कः? विवाहे प्रमुखकृत्यानि च कानि इत्यादीनां समग्राणां पक्षाणां विश्लेषणमत्र समुपस्थापितम्।

**विवाहस्य भेदाः**

विवाहस्य भदानां विषये गृह्यसूत्रे धर्मसूत्रे स्मृत्यादिषु का व्यवस्था इत्यस्य चिन्तनमावश्यकम्। आश्वलायनगृह्यसूत्रे विवाहस्याष्टौ भेदा निरूपिताः। ब्रह्म,दैव,

प्राजापत्य,आर्ष,गान्धर्व, पैशाच, राक्षस इत्यष्टौ भेदाः। अष्टप्रकाराणां विवाहस्य परिचिन्तनं पुराणस्मृतिग्रन्थेषूपलभ्यते। परमाश्वलायनादि कतिचिद् गृह्यसूत्रेषु विवाहस्य प्रकारा निगदिताः। लौगाक्षिगृह्यसूत्रे तु ब्राह्म आसुरश्चैव द्वावेव प्रदर्शितः "अथ ब्राह्मदेयायाः प्रधानविधिं वक्ष्यामः" (लौ.गृ.सू.१५.१.)। लौगाक्षिगृह्यसूत्रस्य पञ्चदश्यां कण्डिकायां ब्राह्मविवाहस्य विर्धिनिरूपितः। षोडश्यां कण्डिकायामासुरविवाहस्य विवेचनं विद्यते। अन्येषु गृह्यसूत्रेषु विवाहस्य भेदा नैव निरूपिताः। ब्राह्मः आर्षः, दैवः, गान्धर्वः, आसुरः, राक्षशश्चेति षड्विवाहा आपस्तम्बधर्मसूत्रे निगदितः। एषु षट्षु त्रयः प्रशस्ताः तत्रापि पूर्वपूर्वतर एव श्रेष्ठः।

अन्ते निगदिताः त्रयः निन्दिताः (आप.धर्म.सू.२.१२.१-३)। गौतमेनापि षट्प्रकारका विवाहा निगदिताः। गौतमेन मनुना याज्ञवल्क्येन च ब्राह्मः, दैवः, आर्षः, प्राजापत्यः, गन्धर्वः, आसुर, पैशाचः, राक्षसश्चेति षड्विवाहाः निगदिताः। याज्ञवल्क्येन ब्राह्मः, दैवः, आर्ष, प्राजापत्यः, आसुर, गन्धर्वः, राक्षसः पैशाचश्चेति प्रकारेण षड्विवाहो निगदितः। मनुना- "ब्राह्मो दैवस्तथावाऽर्ष प्राजापत्यास्तथाऽसुरः। गन्धर्वो राक्षसश्चैव पैशाचश्चाऽष्टमोऽधमः" (मनु.३.२१)। तत्र ब्राह्मः, प्राजापत्यः, आर्षः, दैवः, गन्धर्वः, आसुरः, राक्षसः, पैशाचश्चेति गौतमेन वर्णितः। एतेषां परिचय एवं प्रकारेण विद्यते।

**ब्राह्मः**

ब्राह्मविवाहस्य विषये "ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृतः। तज्जः पुनात्युभयतः पुरुषानेकविंशतिम्" (याज्ञ.स्मृ.१.५८.)। अस्यां कन्यायां जातायां पुत्रेण दशावरान् दशापरान् पुरुषान् आत्मनः सहितान् एकविंशति पुरुषान् पुनातीति याज्ञवल्क्यः। मनुना तु "आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्। आहूय दानं कन्यायाः ब्राह्मो धर्मः प्रकीर्तितः" (मनु.३.२७.)। यथाशक्त्यलङ्कारपूर्वकं कन्याप्रदानमेव ब्राह्मः। "अलङ्कृत्य कन्यामुदकपूर्वां दद्यादेषा ब्राह्मो विवाहः" (आश्व.गृ.सू.१.६.६.)। द्वादशावरान् द्वादशापरान् पुनातीत्याश्वलायनः। सच्चरित्रयुक्ताय श्रुतिशीलसम्पन्नाय वराय कन्या प्रदानमिति ब्राह्मो विवाह इति गौतमधर्मसूत्रे निगदितम् (गौ.ध.सू..४.४.)। सर्वेषामााचार्याणां यथाशक्त्यलङ्कारसहितां कन्यां श्रुतिकुलानुमोदितवराय प्रदानमेव ब्राह्मविवाह इति तु निष्कर्षः।

**दैवः**

सम्यक् श्रौतयज्ञसम्पादनं कुर्वते ऋत्विजे सालङ्कृतकन्याप्रदानमेव दैवः। "दैवे यज्ञन्त्रत ऋत्विजे प्रतिपादयेत्" (आप.ध.सू.२.५.११.१९)। दैवे विवाहे यज्ञस्य मण्डपे एव

कन्यादानं प्रदीयते। "ऋत्विजो वितते कर्मणि दद्यालङ्कृत्य स दैवः" (आश्व.गृ.सू.१.६.६.) इति। अस्यां भर्यायां जातायां पुत्रेण एकविंशति पुरुषान् पुनातीत्याश्वलायनः। "यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते। अलङ्कृत्य सुतादानं दैवं धर्म प्रचक्ष्यते" (मनु.३.२८)। यज्ञवितते ऋत्विजे सालङ्कृतां कन्याप्रदानमेव दैवः। बौधायनस्य मते तु श्रौतयज्ञे दक्षिणात्वेन दीयमानो विवाह एव दैवः (मिश्र, २०४४, पृ.८४९.)। प्रायेणाचार्याणां मते दैवविवाहस्य विषये वरस्य श्रौतयज्ञविधिज्ञातृत्वं पाण्डित्यञ्च लक्षणं समानमस्ति।

**आर्षः**

वराद् गोमिथुनमेकं वा गृहीत्वा धर्मार्थयागादिसिद्धये कन्यायाः प्रदानमार्षः। "एकं गोमिथुनं द्वे वा वरादादाय धर्मतः। कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते" ( मनु.३.२९)। द्वे गावौ वरादादाय कन्यायाः दानमार्ष इत्याश्वलायनः। "गोमिथुनं दत्वोपयच्छेत् स आर्षः" (आश्व.गृ.सू.१.६.६)। एवमेव वीरमित्रोदये गोमिथुनग्रहणञ्च स्वयं कन्योपकरणदानसमर्थस्य तद्दानार्थं वेदितव्यम् (मिश्र २०४४,पृ.८२२)। धर्म निमित्तो ह्यसौ कर्म न लोभनितित्तकः इति। तज्जः सप्तपूर्वान् सप्तपरान् कुलान् पुनातीति। परं याज्ञवल्क्यस्तु आर्षविवाहजः त्रीन् पूर्वान् त्रीन् परान् षट् पुनाति। परमापस्तम्बस्तु "आर्षे दुहितृमते मिथुने गावौ देयौ" (आप.ध.सू.२.५.११.१८)। आपस्तम्बस्य मते गोमिथुनं धर्मार्थसिद्धये वरादादाय स्वकन्यां तस्मै योग्यतमाय वराय प्रदानमेव आर्ष इति। गोमिथुनादानञ्चार्हणार्थं न तु कन्याविक्रयार्थमिति तु विवेकः। "धर्मनिमित्तो ह्यसौ सम्बन्धो न लोभनिमित्तकः। कन्योपकरणदानसमर्थस्य तद्दानार्थं वेदितव्यमिति" (मिश्र २०४४,पृ.८२२) इति।

**प्राजापत्यः**

कन्यार्थिने वराय सह धर्मं चरतामित्युक्त्वा कन्यायाः प्रदानमेव प्राजापत्य इति आचार्याः प्रवदन्ति। "इत्युक्ता चरतां धर्म सह वा दीयतेर्थिने। सकायः पावयेतज्जः षट्षड्वंश्यात्सहात्मना" (याज्ञ.स्मृ.१.६०)। आश्वलायनगृह्यसूत्रे तु "सह धर्मं चरत इति प्राजापत्योऽष्टापरानष्ट परान्पुनात्युभयतः" (आश्व.गृ.सू.१.६.६.)। मनुरपि याज्ञवल्क्यवदेव निगदितः – "सहोभौ चरतां धर्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः" (मनु.३.३०.)। कन्यादानकाले सहधर्मे चरतामित्युक्त्वा वाचां दत्त्वा कन्याप्रदानं प्राजापत्य इति। अस्या जातायाः तनयेन षट् षट् पुरुषान् आत्मनश्च सहितान् त्रयोदश कुलान् यावत् पुनातीति याज्ञवल्क्यादयः। परं गौतमस्तु पञ्च पञ्च पुरुषानिति।

**आसुरः**

आपस्तम्बस्य मते “शक्तिविषयेण द्रव्याणि दत्त्वाऽवहेरन् स आसुरः” (आप.ध.सू.२.१२.१.)। यथाशक्ति धनानि दत्त्वा अवहरेदित्याशयः। विवाहोऽयं समाजे शास्त्रे उभयत्र निन्द्यत्वेन निगदितः। कन्यापित्रे धनदानेन यो विवाहो सम्पाद्यते स आसुरः। “धनेनोपोष्योपयच्छेत् स आसुरः (आश्व.गृ. सू.१.६.६.)। आश्वलायनेन गन्धर्वविवाहादग्रे निर्दिष्टात् तदपेक्षया श्रेष्ठतर एव अवगम्यते। यथाशक्ति धनप्रदानेन सद्भावेन स्वेच्छया विवाहासुरः। आसुरो द्रविणादानादिति याज्ञवल्क्यः स्मृतौ। अन्ये तु राक्षसाभिधानेनैव संज्ञापयन्ति। “क्रीतद्रव्येण या नारी न सा पत्नी विधीयते। न सा दैवं न सा पित्रे दासीं तां कश्यपोऽब्रवीत् ”(मिश्र, २०४४, पृ.८५४.)। इति कश्यपस्य वचनानुसारेण क्रीतद्रव्ययाः कन्यया दासीत्वेन सा पत्नीत्वं नैव प्राप्नोति अतः आसुरकोटौ निक्षिपति। एवं प्रकारेण क्रीतद्रव्येणानीता स्त्री दास्येव भवति सा पत्न्याः स्थानं न प्राप्नोति। शास्त्राकारैः एतादृशी स्त्री दैवकर्मणि पितृकर्मणि चायोग्यां मत्वा सर्वथा बहिष्कृता।

**गान्धर्वः**

मनुना स्पष्टीयते यत् परस्परसंयोगेन मैथुनादिना एव गन्धर्वो विवाहः सम्भवतीति। “इच्छयाऽयोऽन्यसंयोगः कन्यायाश्च वरस्य च। गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः” (मनु.३.३२.)। परस्परं प्रेम्णा जायमान गान्धर्वो विवाह इति आश्वलायनः। “मिथः समयं कृत्वोपयच्छेत् स गन्धर्वः” (आश्व.गृ.सू.१.६.६.) इति। त्वं मम भार्या भव अहं च तव भर्ता भवामीति वदित्वा मुख्यतया कन्ययाः वरस्य च सामञ्जस्येन प्रेम्णा च क्रियमाणविवाहो गन्धर्वः। गन्धर्वविवाहो वरकन्ययोः प्रमाणैनैव जायते नात्र कस्याप्यन्यस्यापेक्षा। “मिथः कामात्सांवर्तते स गन्धर्व”(आप.ध.सू.२.११.२०.)। आपस्तम्बधर्मसूत्रे तु परस्परं रागान्मिथुनी भवतः इति। विवाहेऽस्मिन् कन्यादानादिकं न भवति। अत एव गौतमेन आह “इच्छन्त्या स्वयं संयोगो गान्धर्वः”(गौ.ध.सू.४.८.)। अत्र कन्या स्वयं वराय आत्मानं समर्पयति वरश्च कन्यायै स्वात्मानं समर्पयति। तथाविधो विवाहो गान्धर्वविवाहेनोच्यते। याज्ञवल्क्यस्तु परस्परानुरागेन विवाहः, मुनिकन्यकादीनां पुराकाले ईदृशो विवाहः दृश्यते स्म। इदानीमपि ईदृशविवाहाःसमाजे भूयांसो जायन्ते। आधुनिकसमाजे कन्या स्वात्मानं वराय वरश्च आत्मानं कन्यायै समर्प्यायं विवाहो क्रियन्ते। अतः गान्धर्वविवाहस्य प्रभाव सांप्रतिके पाश्चात्यशैलीप्रभावेण समाजे दृश्यते। विवाहोऽयं

समानवर्णे एव कर्तव्यः। परमाधुनिकविवाहेषु जातिवर्णादिकमविचार्यैव तथाविधविवाहं कुर्वन्ति।

**राक्षसः**

राक्षस विवाहे तु कन्याया अनिच्छयामपि युद्धं कृत्वा कन्याया अपहरणं कृत्वा विवाहो भवति स च राक्षसः। "हत्वा भित्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः"(आश्व.गृ.सू.१.६.६.)। अत्र कन्यया राक्षसस्य प्रसङ्गे मनुः "हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात्। प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते"(मनु.३.३३.)। वलात्कारेण कन्याया हरणम्, तस्या मातापितरौ हत्वा कन्यापक्षान् सर्वान् विनाश्य क्रन्दन्तीनां कन्यानां हरणं राक्षसः। मतापित्रोश्च अनिच्छायामपि युद्धहरणाद् राक्षसः। अस्य विवाहस्य परिचर्चा पुराणमहाभारतादिग्रन्थेष्वपि दृश्यते। क्षत्रियस्य कन्याया इच्छासत्त्वेऽपि मातापित्रादीनामनिच्छायां तयोः परस्परयुद्धं कृत्वा जायमानकन्याहरणादिकं क्षात्रविवाह एव। यथा श्रीमद्भागवतस्य श्रीकृष्णेन रुक्मिणीहरणं, अर्जुनेन सुभद्राया हरणमपि प्रमाणत्वेनोपस्थापयितुं शक्यते। अत्रोदाहरणद्वये कन्याया इच्छासत्त्वेऽपि पित्रोरनिच्छावशादद् युद्धं विधाय कन्याया अपहरणं कृत्वा पाणिग्रहणम् विहितम्। अत्र वरकन्ययोः परस्परानुरागसत्त्वेऽपि सपरिवारस्यासम्मतित्वेनाधुनिकसमाजे विवाहोऽयं निन्द्य एव।

**पैशाचः**

पैशाचो विवाहोऽप्रशस्तो निगदितः। सुप्तावस्थायां कन्यायाः बलादपहरणं पैशाचः। "सुप्तानां प्रमत्तानां वाऽपहरेत्स पैशाचः" (आश्व.गृ.सू.१.६.६.)। सूप्तावस्थायां कपटपूर्वकेनानिच्छायां हरणं पैशाचः। यद्यपि हरणं तु पैशाचराक्षसयोः समानमेव इति शाङ्खायनगृह्यसूत्रे निगदितम् (शाङ्खखायनगृह्यसूत्रम्,१.५.६.)। पैशाचे तु निद्रावस्थायां कन्यायाः तस्य चाभिवाकस्य च निदर्शनाद् न च समानत्वं दृश्यते। तथा च मनुः "सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचः प्रथितोऽधमः"(मनु.३.३४)। सुप्तावस्थायां मद्यपानादिना विह्वलां भूत्वा कन्यागमनपूर्वकं हरणं पैशाचः। एषो विवाहः सर्वथा निन्द्यः सर्वत्र गर्हितो वहिष्कृतश्च। याज्ञवल्क्यस्तु छलपूर्वकेन छद्मना स्वापवस्थायां हरणमिति। नास्मिन् विवाहे शास्त्रसम्मतिः।

एतेषामष्टप्रकाराणां विवाहानां चर्चाऽश्वलायनप्रभृतिभिराचार्यैः प्रतिपादिताः। ब्रह्म, दैव, प्राजापत्यः, असुरः, आर्षः, गान्धर्वः, इति षट् विवाहा ब्राह्मणनां प्रशस्या इति मनुः। क्षत्रियाणां प्राजापत्यासुरगान्धर्वराक्षसाः शुभाः स्युरित्येकपक्षः। ब्राह्मदैवार्षप्राजापत्याः

प्रथमपठिताः चत्वारो विवाहाः ब्राह्मणनां प्रशस्ताः। क्षत्रियाणां राक्षस एक एव, आसुरस्तु वैश्यशूद्रयोः प्रशस्य इति द्वितीयपक्षः। तृतीयपक्षो ब्राह्मदैवार्षप्राजापत्यगन्धर्वाः। पञ्चप्रकारका विवाहाः प्रशस्ता एव। पैशाचासुरौ न कर्तव्यौ निषिद्धत्वात् (मनु.,३.२३–२५)। एषु अप्रशस्तः प्रशस्त्वेन द्विधा विभागो दृश्यते।।

तत्र ब्राह्मदैवार्षप्राजापत्याः चत्वारः प्रशस्ताः। शेषा अप्रशस्ता इत्यपि एकपक्षः। प्रशस्तेष्वपि पूर्वपूर्व एव श्रेष्ठः। अप्रशस्तेषु चतुर्षु गान्धर्वासुरौ कुत्रचिद् प्रशस्तत्त्वेन ग्रहणीयौ। राक्षसपैशाचौ सर्वथा वर्ज्याविव। अस्माकं समाजे एते सर्वे प्रचलन्तः सन्ति न वेत्यपि विचारणीयः पक्षः। वैदिकाः ब्राह्मविवाहः सर्वाधिकरूपेण समाचरन्ति। गान्धर्वप्राजापत्यौ च प्रकारान्तरेणापि प्रचलितौ दृश्येते। वर्तमानभारतीयसमाजेऽस्माकं देशस्य मधेशप्रदेशे (तराई मधेश) केषुचित् स्थानेषु च आसुरविवाहस्यापि प्रचलनं दृश्यते।

**वरकन्ययोर्लक्षणम्**

कन्याया लक्षणप्रसङ्गे कन्या च मृदुभाषी अरोगिणी भ्रातृमतीत्यादि लक्षणसम्पन्ना ग्राह्या सैव वरणीया। “या लक्षणसम्पन्नाः स्यात्, यस्या अभ्यात्मङ्गानि स्युः” (शाङ्खायनगृह्यसूत्रम्,१.५.६.)। अभ्यात्मङ्गानि विकलाङ्गरहितत्त्वं केशेषु समानत्वम्, मनोरमात्वञ्च तस्या लक्षणानि। तामेव कामयेदित्याह शाङ्खायनः। अत्र कन्याया एव लक्षणं प्रदर्शितं वरस्य लक्षणं नैव दर्शितम्। परमाश्वलायनगृह्यसूत्रे तु वरस्यापि लक्षणमभिहितम् “बुद्धिमते कन्यां प्रयच्छेत्”(आश्वलायनगृह्यसूत्रम्,१.६.२.) इति। नारदेन वरस्य दोषा अपि निर्धारिताः– “उन्मत्तः पतितः क्लीबो दुर्भगस्त्यक्तबान्धवः। कन्यादोषौ च यौ पूर्वविष दोषगुणो वरे” (मिश्रः, २०४४, पृ.७५८.) इति। उन्मत्ताय पतिताय भाग्यहीनाय, बन्धुबान्धवेन त्यक्तपुरुषाय कन्या न देया। वस्तुतः कुलशीलविहीनाय नपुंसकाय पतिताय रुग्णाय सगोत्राय सपिण्डाय दत्तामपि कन्यां हरेदिति वशिष्ठः (मिश्रः, २०४४,, पृ.७५९.)। शास्त्रे गुणादिकं निर्दिष्टं तत्रापि दोषा अपि निर्दिष्टा गुणवते, दोषरहिताय कन्यां यच्छेदित्याशयः।

पूर्वं योग्याय बुद्धिमते वराय एव कन्यां प्रयच्छेदित्युक्त्वा पश्चात् कन्यालक्षणमाह “बुद्धिरूपशीललक्षणसम्पन्नामरोगामुपगच्छेत्” (आश्वलायनगृह्यसूत्रम्,१.६.३.)। पुनर्बुद्धिरूपगुणवयश्शीलादिसम्पन्नां रोगरहितां कन्यामेव उपयच्छेदिति। पुराकाले वरस्य कन्यायाश्च योग्यतां परीक्ष्यैव विवाहः सम्पाद्यते स्म। अस्य प्रमाणनि धर्मशास्त्रेषु पुराणादिषु चोपलभन्ते।

**विवाहस्य प्रमुखकृत्यानि**

विवाहस्य प्रमुखकर्माणि इमानि भवन्ति– स्वयंवरविधिः, मधुपर्कः, वस्त्रपरिधानम्, कन्यादानम्, परस्परसमीक्षणम्, राष्ट्रभृद्धोमः, जयाहोमः, अभ्यातानहोमः, गुप्ताहुतयः, लाजाहोमः, सप्तपदानिः प्रक्रमणम्, वधूमूर्धाभिषेचनम्, सूर्यमुदीक्षणम्, रात्रौ चेत् ध्रुवदर्शनम्, हृदयालम्भनम्, सिन्दूराभिमन्त्रणमित्यादीनि एतेषां प्रमुखमङ्गानि भवन्ति। विवाहस्य चतुर्थदिवसे चतुर्थी कर्म संपाद्य विवाहः पूर्णतामेति।

**स्वयंवरविधिः**

स्वयंवरविधिस्तु कस्मिंचिदपि गृह्यसूत्रेषु नोपलभ्येते परन्तु महाभारतपुराणादिषु स्वयंवरविधेः प्रसङ्गोपलभ्यते। यथा सीतारामयोः, शिवपार्वत्योः, अर्जुनद्रौपद्योः स्वयंवरविधिः तत्र तत्र पुराणसन्दर्भे प्राप्यते। ब्राह्मणानां स्वयंवरस्य चर्चा शास्त्रादिषु नैव दृश्यते। "इदं सज्यं धनुः कृत्वा सज्जैरेभिश्च सायकैः। अतीत्य लक्ष्यं यो वेद्धा स लब्धा मत्सुतामिति" (महाभारत स्वयंवर.,१८४.११) द्रुपदेनेत्थं स्वतनयायाः स्वयंवरार्थं घोषितम्। तदनन्तरं तत्र स्वयंवरं द्रष्टुकामा दूरदेशाद् ब्राह्मणः, जनपदवासिनः, सभ्याश्च समागत आसनित्यस्य प्रसङ्गश्चेत्थं माहाभारतस्य स्वयंवरपर्वणि प्राप्यते। "इति स द्रुपदो राजा स्वयंवरमघोषयत्। तत् श्रुत्वा पार्थिवाः सर्वे समीयुस्तत्र भारत। ऋषयश्च महात्मानः स्वयंवरदिदृक्षवः। दुर्योधनपुरोगाश्च सकर्णा कुरवो नृप। ब्राह्मणाश्च महाभागा देशेभ्यः समुपागमन्। तत्रोपविष्टा मञ्चेषु द्रष्टुकामा स्वयंवरम्" ( महाभारत, स्वयंवर.१८४.११.)।

तत्र स्वयंवरकर्मण्यनेके राजकुमारादयो निमन्त्रिता आसन्। दुर्योधनप्रभृतयोऽनेके राजकुमाराः, कर्णप्रभृतयो वीरपुरुषास्तथा च पौरजनाश्च समागता आसनिति दर्शनात् द्वापरयुगेऽपि राजानः स्वयंवरं सम्पादयन्ति इत्यस्य अनेनैव प्रमाणेन अवगम्यते। न केवलं द्रौपद्या अपि तु देवव्रतभीष्मेन अम्बाअम्बिका–अम्बालिकाः स्वयंवरादेव अपहृत्यानीता इत्यादयोऽनेके प्रसङ्गा महाभारतादौ प्राप्यन्ते। रामायणेऽपि राजर्षिजनकेन स्वतनयायै योग्यवरचयनार्थं स्वयंवरार्थे धनुष्टङ्कनात्मको यज्ञो विहितः। सत्ययुगे शिवपार्वत्योः स्वयंवरविषये इत्थं दृश्यते "मालां प्रगृह्य देव्या तु स्थितायां देवसंसदि। शक्राद्यैरागतैर्देवैः स्वयंवर उपागते (ब्रह्मपुराण, ३४.२७)। इयं परम्परा चतुर्षु युगेषु आसीदिति शास्त्राणामध्ययनेन अवगम्यते। पुराणेषु महाभारतेषु रामायणादिष्वपि स्वयंवरस्याख्यायिका प्राप्तत्वादियं परम्परा अधुनापि आधुनिकसमाजे सर्वत्रैव द्रष्टुं शक्यते।

**सप्तपदीक्रमः**

सप्तपदीप्रकरणमित्यनेन वैवाहिकजीवनस्य सप्तप्रकारकमैश्वयादीनां परिशुचयति। प्रथमेनान्नादेरिषणम्, द्वे उर्जे, तृतीयेन धनसमृद्धिः, चतुर्थेन सुखम्, पञ्चमेन, सन्तानोत्पत्तिः, षष्ठेनारोग्यम्, सप्तमेनोभयोर्मित्रतां सूचयति। अयञ्चोपक्रमः गृह्यसूत्रकास्य "एकमिषे,द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षड्तुभ्यःसखे सप्तपदा भव सा मामनुव्रता भव" (पारस्करगृह्यसूत्रम् १.८.१) इत्यादिमन्त्रेण प्रतिपाद्यते।

हृदयालम्भनमित्यनेन वरबध्वोः प्रीतिः स्नेहश्च ज्ञायते। उभयोः सुरक्षादायित्वं परस्परसंयोजनं भावनात्मकसन्तुलनञ्च जायते। "मम व्रते ते हृदयं दधामि" (पारस्करगृह्यसूत्रम् १.८.८) इत्यनेन मन्त्रेण हृदयालम्भनं क्रियते। एवमन्येषामपि विवाहसंस्कारान्तर्भूतानां होमादिकर्मणामपि विशेषप्रयोजनं शास्त्रेषु दृश्यते। ऋषीणां चिन्तनं मानवानां सर्वतो हिताय कल्याणाय एव विद्यते। शास्त्रनिर्दिष्टविधिना सम्यक् सम्पादितेन संस्कारेण सामजिक-शारीरिक-मानसिक-आध्यात्मिकलाभो जायते। तेन परमं प्रयोजनं धर्मार्थकाममोक्षोऽपि विन्दते। एतानि कर्माणि न केवलं धार्मिकदृष्ट्यापि तु वैज्ञानिकदृष्ट्याधुनिकसमाजेऽपि महदुपयोगीनि सन्तीति निष्कर्षः।

**उपसंहारः**

अस्माकं धर्मस्य मूलं वेद एव। वैदिकवर्णाश्रमव्यवस्थायां जन्मतः मृत्युपर्यन्तानां संस्काराणां चिन्तनं विश्लेषणं विभिन्न कल्पादि ग्रन्थेषु प्राप्यते। तेषां संस्काराणां सङ्ख्याविषये गृयसूत्रेषु धर्मसूत्रेषु स्मृत्यादिग्रन्थेषु आचार्याणां मतैक्याभावेऽपि प्रतिपादितानां संस्काराणां सङ्ख्यानाञ्च चिन्तनं विधाय विवाहसंस्कारस्य सर्वतोभावेन विवेचनं विहितम्। तत्र धर्मशास्त्रे गृह्यसूत्रे च प्रायेण ऋषीणां विहासंस्कारस्य चिन्तनं मानवानां सर्वतो हितं कल्याणमेवोद्देश्यं वर्तते। तत्र सामाजिकदृष्ट्या वैज्ञानिकदृष्ट्या अपि विवाहसंस्कारद्वारा धर्मसंरक्षणम्, सन्तानोत्पत्तिः, सामाजिकस्थिरता, संस्कारस्य संक्रमणम्, गृहस्थाश्रमस्याधारत्वं, समानाधिकारभावनायाः प्रबोधनमपि भवति। तेनोभयोः सामजिकं शारीरिकं, मानसिकं, आध्यात्मिकञ्च लाभो जायते। तेन परमं प्रयोजनं धर्मार्थकाममोक्षपि विन्दते। यतः क्रमप्राप्तेषु प्रचलितेषु षोडशसंस्कारेषु गृहस्थाश्रमप्रवेशस्य प्रधानभूतोऽतो विवाहसंस्कारस्यैव विवेचनमस्मिन्नालेखे निर्वचनप्रसङ्गे विवाहस्य प्रकाराः, वरकन्ययोर्लक्षणम्, विवाहस्य प्रमुखकृत्यादीनि कर्माण्यत्र प्रायेण व्यासेन समासेन च प्रपञ्चिता।

<u>**सन्दर्भग्रन्थाः**</u>

*अथर्ववेदः* . (१९९४इ.). दिल्ली : नाग प्रकाशन।

आपस्तम्बः, (२०४९), आपस्स्तम्ब–धर्मसूत्रम् (उमेशचन्द्र पाण्डेय हि.व्या.). वाराणसी : चौखम्भा संस्कृत संस्थान।

*आश्वलायनगृह्यसूत्रम्.* (१९३६इ.), (नारायभाष्यसहितम्, पुरुषोत्तम शास्त्री रानाडे सम्पा.). पुणे : आनन्दाश्रम मुद्रणलये।

*ऋग्वेदसंहिता.* (१९९४ इ.). दिल्ली : नाग प्रकाशन।

*स्मृतिसन्दर्भ.* (२००९) (मनसुखराय मोरसम्पा.), (तृतीय भाग). कलकत्ता : ५ क्लाइब रोड।

*ताण्यब्राह्मणम्.* (१९७४इ.), (आनन्दचन्द्र वेदान्तवागीश सम्पा.). कलकत्ता : एसियाटिक सोसाइटी।

तैत्तिरीयब्राह्मणम्. (१९२१ इ.). मैसूर : गवर्मेन्ट आरियन्टल लाइब्रेरी।

*तैत्तिरीयसंहिता.* (१८९८ इ.).मैसूर : गवर्मेन्टओरियन्टल।

पारस्करः, (१९९१इ.), पारस्करगृह्यसूत्रम् (ब्रह्मानन्द त्रिपाठी सम्पा.). वाराणसी : चौखम्बा सुरभारती।

मनु,(२००७ इ.), मनुस्मृति (शिवराज आचार्य कौण्डिन्न्यायन अनु.). वाराणसी : चौखम्बा विद्याभवन

मिश्र, मित्र (२०४४), वीरमित्रोदय (परिभावाप्रकाशःसंस्कारप्रकाशश्च). (नित्यानन्द पर्वतीय, सम्पा.). वाराणसी : संस्कृत सीरीज आफिस।

व्यासः, (२०१७ इ.). ब्रह्मपुराणम् दिल्ली : नाग प्रकाशनम्।

व्यास, (२०४५), महाभारत (रामनारायण शास्त्री सम्पा., षष्ठ संस्क.). गोरखपुरः : गीताप्रेस।

याज्ञवल्क्य, (२०५०). याज्ञवल्क्यस्मृतिः (उमेशचन्द्र पाण्डेय हि.व्या.). वाराणसी : चौखम्बा संस्कृत संस्थन।

लैगाक्षि, (१९२८). लौगाक्षिगृह्यसूत्रम् . श्रीनगर : काश्मीर संस्कृत ग्रन्थावलिः।

शाङ्खायन, (२०६९), शाङ्खायनगृह्यसूत्रम् (नारायणप्रणीतं गृह्यप्रदीपभाष्यसंवलितम्). वाराणसी : कृष्णदास अकादमी।



# ज्योतिषशास्त्रे दिक्-साधनम्

**डा. नारायणप्रसाद निरौला**

उपप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयस्य

**शोधसारः**

*दिशति निर्दिशति इत्यर्थेन दिक् शब्दस्य व्याख्यानं समुपयुज्यते। दशसंख्यका दिशा सन्ति, पूर्वापरयाम्योत्तरईशानाग्नेयनैर्ऋत्यवायव्यऊर्ध्वाधः। मानवसमूदायानां व्यवहारप्रवर्तनाय दिग्ज्ञानमावश्यकम् भवति। सामान्यतया यज्ञमण्डपकुण्डादिसिद्धौ सूक्ष्मदिग्ज्ञानस्यावश्यकता जायते, इत्येव दिक्साधनस्य प्रयोजनम्। सूर्योदयास्ताभ्यां पूर्वापरयोर्दिग्ज्ञानानुराद्धेन सामान्यव्यवहारकार्यं प्रचलति। ज्योतिषशास्त्रे दिक्साधनं सूर्यस्य छायावशात् ध्रुवतारावलेकनवशाद् तथा च चुम्बकवशाद् साधितमस्ति। मानवीयकार्यसम्पादनाय यज्ञसम्पादनाय च दिग्ज्ञानस्यावश्यकं भवति। वैदिककालादेव दिग्ज्ञानमासीदिति वैदिक सूक्तादेव ज्ञातुं शक्यते।*

**शब्दकुञ्जी :** आशा, शङ्कुः, शुक्लाङ्गुलम्, क्रान्तिः, लम्बज्या, त्रिज्या।

**आमुखः**

दिक्छब्दो दिश् अतिसर्जने इत्यस्माद्धातोः कर्तरि क्विप् प्रत्ययेन व्याख्यायते। अतिसर्जनं दानम्। तत्र दिशति ददाति इत्यर्थेन दिश् शब्दस्याभिधेयार्थः दानम्। किन्तु व्यवहारे निर्देशपरक एव। अतः दिशति निर्दिशति इत्यर्थेन दिक् शब्दस्य व्याख्यानं समुपयुज्यते। दिश् धातोः क्विन् (ऋत्विग् ददृगिति ३।२।५९) प्रत्यये दिक् शब्दः निष्पद्यते। दिक् भूपृष्ठस्थखस्थ-प्रदेशानां पिण्डानाञ्च निर्देशायैव परिकल्प्यते। दशसंख्यका दिशा सन्ति। पूर्वापरयाम्योत्तरईशानाग्नेयनैर्ऋत्यवायव्यऊर्ध्वाधः/ मानवसमूदायानां व्यवहारप्रवर्तनाय दिग्ज्ञानमावश्यकम् भवति। प्रचीनाचार्याः दर्शने ज्योतिषे च दिशां स्वरूपं प्रतिष्ठापयामासुः। तत्र दार्शनिकाः दिक् स्वरूपं द्रव्यत्वेनैवाङ्गीकृतवन्तः। दार्शनिकाः भुवः कन्दुकाकाररूपत्वमनङ्गीकृत्यैव सर्वेषामेव वर्षाणां मेरोरुत्तररतः स्थितः इति प्रतिपादयन्तिस्म (कारिकावली, कारिका ४७ टीकायाम्)।

सामान्यतया यज्ञमण्डपकुण्डादिसिद्धौ सूक्ष्मदिग्ज्ञानस्यावश्यकता जायते, इत्येव दिक्साधनस्य प्रयोजनम्। सूर्योदयास्ताभ्यां पूर्वापरयोर्दिग्ज्ञानानुराद्धेन सामान्यव्यवहारकार्यं प्रचलति। यथा — सन्ध्यावन्दनार्घ्यादिकम्, देवार्चनादिकञ्च। दशसंख्यका दिशाः सन्ति। मुख्याः दिशः प्राचीप्रतीच्यवाच्युदीचीति चतस्रः। मध्ये विदिशः,यासां संज्ञा ऐशानीआग्नेयीनैऋतीवायव्या इति। इतः परम् ऊर्ध्वमधोऽपि दिग्द्वयम्। एवं मिलित्वा दिशः संख्या दश भवति। श्रीमद्भागवतमहापुराणेऽपि मेरोः कल्पना उत्तरस्यामेव विहिता (श्रीमद्भागवतमहापुराणम् ५।२१।६-७) तत्र सर्वे ग्रहाः, नक्षत्राणि च मेरोः प्रदक्षिणं कुर्वन्ति। भागवतकल्पना भूगोलं कन्दुकाकारमेवाङ्गीकरोति। तत्रत्य ग्रहगतिकल्पनया स्फुटी भवति। न्यायशास्त्रे दूरान्तकादिधीहेतुरेका नित्या दिगिति (कारिकावली, कारिका ४२)। मानवीय कार्यसम्पादनाय यज्ञ सम्पादनाय अकाशीयग्रहावलेकनाय च दिग्ज्ञानस्यावश्यं भवति। वैदिककालादेव दिग्ज्ञानमासीदिति वैदिक सूक्तादेव ज्ञातुं शक्यते। ज्योतिषशास्त्रे दिक्साधनविषये अनेकविधिरुपपत्तिश्च निगदितमस्ति।

**प्रकल्पः** प्रस्तुतलेखे दिक्साधनविषये अनेकविधिनिरूपणं कृत्वा निष्कर्षः कृतः अस्ति।

**समस्या :** दिक् साधनं कथं क्रियते? ज्योतिषाशास्त्रे दिक्साधनस् के विधयः प्रयुज्यन्ते ?

**उद्देश्यम् :** दिक् साधनविधि प्रतिपदानमस्य शेधस्य उद्देश्यमस्ति।

**सीमाङ्कनम् :** अयं लेखः दिक् साधनविषये केन्द्रीभूतोऽस्ति। मूलतः वैदिककालात् अद्यपर्यन्तज्योतिषग्रन्थे दिक्साधनसम्बद्धाः विषया अत्र सीमाङ्कताः सन्ति।

**शोधपद्धतिः** अस्मिन् लेखे वर्णनात्मकशोधपद्धतिः प्रयुक्ता अस्ति। अस्यान्तर्गतं ज्योतिषाशास्त्रे दिक् साधनधिनिनिदर्शितग्रन्थाः तथ्यत्वेन संगृहीताः सन्ति। प्राप्ततथ्यानां विश्लेषणं कृत्वा निष्कर्षाः प्रदत्ताः सन्ति। अस्मिन् लेखे निम्नलिखितम् अध्ययनपद्धतिः स्वीकृता अस्ति।

**शोधनिर्माणम् :** एतत् गुणात्मकं शोधनम् अस्ति। कार्यात् प्राप्ततथ्यस्य उपयोगेन निष्कर्षं प्राप्तुं तस्य उपयोगः कृतः, विश्लेषितः च अस्ति।

**तथ्यं नमूनाचयनं च :** प्रस्तुते लेखे सम्बन्धितपुस्तकेषु व्यक्तसूत्राणाम् आधारेण तथ्यानि संगृहीताः सन्ति। कालक्रमेणप्रतिनिधिग्रन्थानां नमूना चयनं कृतम् अस्ति।

**तथ्यसङ्कलनसाधनानि :** अस्मिन् अध्ययने प्राथमिकस्रोतग्रन्थानां विश्लेषणं कृतम् अस्ति। आंशिकरूपेण गौणस्रोतानां अपि उपयोगः कृतोऽस्ति। तदर्थं

प्रकाशितपुस्तकानां, टिप्पण्याः, पुस्तकानां व्याख्यानां च उपयोगः कृतः अस्ति। एवं प्राप्ततथ्यस्य विश्लेषणं कृत्वा निष्कर्षं निष्सयितुं प्रयत्नः कृतः अस्ति।

**तथ्यविश्लेषणप्रक्रिया :** प्राप्ततथ्यस्य विश्लेषणं कृत्वा, तस्य वर्णनं कृत्वा, तस्य पुष्ट्यर्थं उदाहरणानि दत्त्वा निष्कर्षं प्राप्तुं कार्यं कृतम् अस्ति।

**सैद्धान्तिक रूपरेखा -** दिक्साधनपद्धतिं सैद्धान्तिक-पर्याधारेण गृहीतमस्ति। वर्तमान लेखे वैदिकग्रन्थादारभ्य अद्यपर्यन्तज्योतिषसम्बद्धग्रन्थेषु दिक्साधनविषये प्रतिपादितसिद्धान्ता उपपादिता सन्ति।

**संवाद विश्लेषणम् च -** का अशा? दिशायाः उपयोगः कथं करणीयः? केन केन प्रकारेण दिक्साधनं भवति? दिग्प्रयोगः कथं समीचीनः सूक्ष्मश्च इति विश्लेषणं कृतम्। तथैव दिशानां व्यावहारिकसमाधानानामपि चर्चा कृता।

**वैदिकवाङ्मये दिग्ज्ञानम् -** विश्वस्य सर्वप्रचचीन पौरुषेयग्रन्थस्तु वेद एव। वैदिकवाङ्मये दिक् विषयी चर्चा भूरि प्राप्यते। ऋग्वेदेसंहितायां पुरुषसूक्ते दिशामुत्पत्तिः विराट् पुरुषस्य श्रोत्राभ्यां वर्णिता वर्ततते तद्यथा—

***नाभ्याः आसीदन्तरिक्षं शीर्ष्णोः द्यौः समवर्तत।***

***पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयत्।। (ऋग्वेद, १०/९०/१४)***

अत्र सामान्येन दिशां निर्देशः विद्यते। उषा पूर्वस्यां सूर्यपथमेवानुगच्छतीति लिखितम्। उषा सकलानि भुवनानि स्वस्मात् प्रतीच्यामेव स्थापयति। तद्यथा —

**"एषा प्रतीची दुहिता दिवो नृन्योषेव निरिणीते अप्सः।**

**व्यूर्णवती दाश्रुषे वार्याणि पुनर्ज्योति युवतिः पूर्वचार्कः।।" (ऋग्वेदः, ५।८०।६)**

एवम् ऋग्वेदे प्राचीप्रतीच्योर्निर्देशः चतसृणां दिशानाञ्च व्यवहारे प्रवर्तनमुपलभ्यते। यतो हि दिङ्निर्देशं विना स्थानद्वयस्य स्थितिः ज्ञातुं न शक्यते। अतः दिङ्नियमनमतीवावश्यकमभवत्। तैत्तिरीयारण्यके स्पष्टमेव निर्दिष्टं यत् यत्र सूर्योदिते सा प्राची दिक्। एवं सर्वासां दिशां स्वरूपं भिन्नभिन्नोपादानप्रभवत्वेन वर्णितम्। तद्यथा —

**"त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमासु।**

**पूर्वामनु प्र दिशं पार्थिवानामृतून् प्रशासद्विदधावनुष्ठु।" (ऋग्वेदः, १।९५।३)**

**"उदगादयमादित्यो विश्वेन सहसा सह।**

**द्विषन्तं मह्यं रन्धयन् मो अहं द्विषतो रधम्।।" (ऋग्वेदः, १।५०।१३)**

**"पूर्वापरं चरतो माययैतौ शिशू क्रीलन्तौ परि यातो अध्वरम्।**

**विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः।।" (ऋग्वेदः, १०।८५।१८)**

अतः वैदिक दिग् विषयी चर्चा वैदिकमस्तीति वक्तुं शक्यते। दिक्साधनविषये यजुअथर्ववेदेऽपि वर्णनमस्ति। एवमेव ब्राह्मणादि ग्रन्थेषु अपि दिग्विषयी चर्चा प्राप्यते। विशेषतः यज्ञसम्पादनाय दिङ्निर्धारणं कृतमस्ति वैदिकवाङ्मये। दशसंख्यका दिशाः सन्तीति कथितमस्ति शतपथब्राह्मणे तद्यथा —

"*अथ यानि दश। सा दशाक्षरा विराड्विराग्निर्दशदिशो दिशोऽग्निर्दशप्राणाः प्राणा अग्नर्यावाग्निर्यावित्यस्य मात्रा तावत्तद्भवति।*" **(शतपथब्रह्मणः,६।२।२।३४)**

एवमेव कृत्तिका नक्षत्रवेधेन दिक्साधननिर्देशनमपि प्राप्यते —

***कृत्तिकास्वादधीत। एता ह वै प्राच्यै दिशो न च्यवन्ते सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्यै दिशच्यवन्ते तत् "प्राच्यामेवास्यै तद्दिश्याहितौ भवतस्तस्मात् कृत्तिकास्वादधीत।।" (शतपथब्राह्मणः,२।१।२)***

अतः वैदिककालादेव दिक्प्रचलनसाधनोपपत्तिश्चासीदिति उपर्युक्तमन्त्रादेव ज्ञातुं शक्यते।

### ज्योतिषशास्त्रे दिक्-साधनम्

दिक्-साधनं विना ज्योतिषीयाध्ययनं न सम्भवति। दिक्देशकालमेव ज्योतिषमस्ति। ज्योतिषशास्त्रस्य आर्यभटीग्रन्थे दिक्साधनोपपत्तिः नोपलभ्यते। वराममिहिराचार्यकृतपञ्चसिद्धान्तिकायां पौलिशसिद्धान्तवचनं उल्लेखितोऽस्ति।

**शङ्क्वङ्गुलविस्तारे वृत्ते छायाप्रवेशनिर्गमनात्।**

**अपरैन्द्रीदिक्सिद्धिर्यवैश्च याम्योत्तरे कार्ये।। (करणाध्यायः, श्लो. १९)**

अस्य सुधाकरी व्याखयनुसारेण द्वादशाङ्गुलविस्तारे वृत्ते केन्द्रे द्वादशाङ्गुलशङ्कुः स्थाप्यः। तस्योदयकाले छाया पश्चिमदिशि वृत्ताद्बहिर्दूरं याति ततो यथा यथा रविरुन्नतो भवति तथा तथा छायापचयिनी भवति। एवं यत्र छाया वृत्ते प्रविशति तत्र प्रवेशचिह्नं कार्यम्। ततो मध्याह्ने यावच्छायापचयिनी भवति ततः पश्चिमकपाले रविर्याति, छाया चोपचयिनी पूर्वतो याति एवं यदा छाया बहिर्निगच्छति तत निर्गमचिह्नं कार्यम्। एवं प्रवेशनिर्गमचिह्नाभ्यां क्रमेण अपरैन्द्री दिक्सिद्धिः, पश्चिमपूर्वदिक्सिद्धितो यवैर्यवाकारैर्वृत्तद्वयक्षेत्रैर्याम्योत्तरसाधनं भवति।

### सूर्यसिद्धान्ते दिक्-साधनम्

सूर्यसिद्धान्ते रवेस्थितिवशादेव दिक् साधितोऽस्ति। समतलभूमौ वज्रलेपं कृत्वा वृत्तपरिधिं कृत्वा केन्द्रे द्वादशाङ्गुलशङ्कुस्थाप्यम्। ततः पूर्वापराद्ध्योर्दिनस्य प्रथमद्वितीयभागयोस्तच्छायाग्रं स्थापितशङ्कोः छायान्तप्रदेशो मण्डलपरिधौ यस्मिन् विभागे स्पृशेत् तत्र निर्गमप्रवेशस्थानयोरुभौ द्वौ विन्दूं पूर्वापरसंज्ञकौ क्रमेण वृत्ते परिधिरेखायां कृत्वा तन्मध्ये तिमिना मत्स्येन रेखा कार्या सा दक्षिणोत्तररेखा भवति। तत्र विन्दोः सव्यं रेखाग्रं दक्षिणादिक्। पश्चिमविन्दोः सव्यं रेखाग्रमुत्तरादिक् स्यात्। यथा —

**"शिशलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे। तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत्।।**

**तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्वादशाङ्गुलम्। तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापराद्धयोः।।**

**तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ। तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोत्तरा।।**

**याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा। दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि।।"** (सूर्यसिद्धान्तः, ३।१-४)

अस्योपपत्तिस्तु रविक्रान्तिं स्थिरां प्रकल्प्य सममण्डलअहोरात्रमण्डलयोरन्तरमवलोक्यता तदा यावन्मितमन्तरं पूर्वाह्णे तावदेवापराह्णेऽपि। स्थिरक्रान्तेः अग्रायाश्च साम्यात् छायाकर्णयोस्तुल्यत्वाच्च छायाया प्रवेशनिर्गमकालिकौ छायाग्रपूर्वापरान्तराख्यौ ज्या रूपौ भुजावपि तुल्यौ। अतो भुजाग्रोपरिगता रेखा वास्तवपूर्वापरायाः समानान्तरा पूर्वापर रेखा एव। पूर्वापर रेखाया उपरिगता मत्स्येन निर्मिता लम्बरूपा दक्षिणोत्तरा वास्तवयाम्योत्तरासमान्तरा वास्तविकी याम्योत्तरा रेखा। अनयो सकाशाद् विदिशां ज्ञानं भवति। अतः ज्योतिषशास्त्रे प्राचीनसिद्धान्तपञ्चकादेव दिक्साधनोपपत्तिः प्राप्यते।

**ब्रह्मगुप्तोक्त दिक्साधनम्**

ब्रह्मगुप्तस्तु स्थुलरूपेण दिक् साधनं करोति। यथा कथयति ब्रह्मगुप्तः—

**"पूर्वापरयोर्विन्दू तुल्यच्छायाग्रयोर्दिगपराद्यः।**

**पूर्वान्यः क्रान्तिवशात्तन्मध्याच्छङ्कुतलमितरे।। " (ब्रह्मस्फुटसिद्धान्तः, त्रिप्रश्नाधिकारः, श्लो. १)**

जलादिसमीकृतायां भूमाविष्टदिने तन्मध्यच्छायाव्यासार्धेन वृत्तं विलिख्य तत्केन्द्रे द्वादशागुलः शङ्कुः स्थाप्यः। पूर्वकपालस्थे सूर्ये तस्य शङ्कोश्छायाग्रं तद्वृत्तपरिधौ यत्र लगति स विन्दुः स्थूलपश्चिमादिक्। पश्चिमकपालस्थे रवौ तस्यैव शङ्कोश्छायाग्रं पूर्वभागे तद् वृत्तपरिधौ यत्र निर्गच्छति स बिन्दुः स्थूलपूर्वदिक्, स्थूल पूर्वपश्चिमबिन्दुगता रेखा स्थूला पूर्वापरा, तस्यां तयोश्छायग्रयोर्मध्यं यत्तस्माच्छङ्कुमूले गता रेखा दक्षिणोत्तरा भवति।

अस्योपपत्तिस्तु पूर्वापरयोः कपालययोर्बिन्दू कार्ये तुल्यछायाङ्गुल्योः एतदुक्तं भवति। समायावनौ द्वादशाङ्गुलं विनयसेदभीष्टप्रमाणं वा। ततः कित्यपि गते दिवसस्याभीष्टे काले छायाग्रे बिन्दुर्देयः स आद्यः। ततो यावति विगते काले छायाग्रे बिन्दुर्दत्तः तावति दिवसस्य शेषे च छायाग्रे द्वितीया बिन्दुर्देया तदन्यसंज्ञकः। ततो विवस्वति प्राक्कपालस्थे य आद्योबिन्दुदत्तः साऽपरादिग्भवति। अपरकपालस्थे च सवितरि योऽन्यो बिन्दुर्दत्तः सा पूर्वदिक् भवति। क्रान्तिवशात् तन्मध्यात् तयोश्छायाग्रयोर्मध्यं तन्मध्यं तस्मात् शङ्कुतलं भवतः। शङ्कुमूलं यावद्या रेखा तत्र इतरे दक्षिणेत्तरे ककुभौ भवतः।

**प्रथमभास्करोक्त लल्लोक्तमतम् च**

प्रथमभास्कराचायेण स्वमहाभास्करीय ग्रन्थे दिक्साधनं यथा प्राप्यते —

**"अद्भिः समत्वमवगम्य धरातलस्य वृत्तं लिखेत् स्फुटतरं खलु कर्कटेन।**

**सूत्रैश्चतुर्भिरवलम्बकसन्निवद्धैर्ज्ज्ञातार्जवोरुसमवृत्तगुरुर्नरः स्यात्।**

**छायाप्रवेशनिर्गमविन्दुभ्यां मीनमालिखेद् व्यक्तम्। तद्वक्त्रपुच्छनिःसृतं सूत्रं याम्योत्तरं शङ्कोः।।**

**विन्दुस्त्रिभिरतुल्यकालजैः संलिखेच्छफरिके विधानतः।**

**सूत्रयोर्मुखसमप्रयातयोर्योगतः कुजबुधाशयोर्विधिः।।" (महाभास्करीयम्, त्रि.प्र.अ. श्लो. १ )**

तथा च लघुभास्करीये—

**"इष्टमण्डलमध्यस्थशङ्कुच्छायाग्रवृत्तयोः।**

**योगाभ्यां कृतमत्स्येन ज्ञेये याम्योत्तरे दिशौ।।" (लघुभास्करीयम्,त्रि.प्र.अ. श्लो १ )**

दिक्–साधनविषये प्रथमभास्कराचार्यस्यापि मतं नवीनं तु नास्ति परन्त्वत्र चतुर्भिः सूत्रैः शङ्कोः स्थिरीकरणं युक्तमुक्तम्। अन्यश्च पूर्वोक्तएव प्रकारः। न काऽपि नूतना (पाण्डेय,१९९० : ५३)। आचार्यलल्स्यापि इदृशमेवमतमस्ति यथा कथयति —

**"छायात्रयाग्रभवयोर्मुखपुच्छरज्ज्वोर्योगो यामस्य दिगुदग् द्युदलप्रभाग्रे।**

**यत्र ध्रुवो धनपतेर्दिगसौ भवेद्वा तन्मत्स्यपुच्छमुखरज्जुरसिद्धसिद्धौ।।**

**यो मत्स्यपुच्छमुखनिर्गतरज्जुयोगस्तस्मात्प्रभात्रितयचिह्नशिरोवगाहि।**

**वृत्तं लिखेन्न विजहाति च तस्य रेखा छाया कुलस्थितिमिवामलवशजास्त्री।।"**

(शिष्यधीवृद्धितम्, त्रिप्र.अ. २.३)

**द्वितीयआर्यभटीयकृतं दिक्साधनम्**

महासिद्धान्तौ द्वितीयआर्यभटेन यथा निगदितमस्ति –

**"उदितो यत्रार्कः सा पूर्वाऽस्तं याति पश्चिमा तत्र।**

**सर्वत्र तद्विचिन्त्यं दिक् सिद्ध्ये मेरुरुत्तरवान्।।" (महासिद्धान्तः, त्रिप्रश्नाधिकारः, श्लो १२)**

अर्थात् यत्र सूर्य उदेति तत्रैव पूर्व। यत्र च अस्तं याति तत्रैव पश्चिमदिक्। एवमेव उत्तरदिशौ तु मेरु वर्तते। तस्य अपर दिक्दक्षिणमिति। एवमेव अनेन जलसाधितसमभुमौ द्वादशाङ्गुलशङ्कोश्छायाज्ञानदपि दिग्ज्ञनं निगदितमस्ति। उदितो यत्रार्क पूर्वेति कथनं द्वितीयार्यभटस्य नवीनं मतमस्ति।

**श्रीपितकृतं दिक्साधनम्**

छायाया वृत्तनिर्गमकालीनस्यार्कस्य या क्रान्तिजीवा या च प्रवेशकालीनस्य क्रान्तिजीवा तयोरन्तरे यच्छिष्टं तदन्तरं स्वश्रवणेन स्वदेशविषुवच्छाया द्वादशङ्गुलङ्कोश्च वर्गयोगमूलेन हत्वा लम्बकेन द्वादशाङ्गुलशङ्कुना हृतं कृत्वा यल्लब्धं तदङ्गुलाद्यं फलं स्यात्। अनेनाङ्गुलेन तावत्येवान्तरे पश्चाद् विन्दूः प्रवेशविन्दुः रव्यायनवशात् संचालयेत्। तभ्यां पूर्वापरविन्दुभ्यां सूत्रं प्रसार्य रेखां कुर्यात् सा प्राची,अपरा प्रतीचि भवति (सिद्धान्तशेकरः, त्रिप्रश्नाध्याये श्लो १–३)। श्रीपतेर्मतमपि पूर्वोक्ताचार्यप्रकारएवास्ति।

**भास्करीय(द्वितीय) दिक्साधनम्**

भास्कराचार्येण विविध प्रकारेण दिक् साधनं विहितमस्ति। द्वितीयआर्यभटवचनस्यापि अत्र पुनरुक्तं दृश्यते यथा —

**"यत्रोदितार्क किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठाम्।**

**तन्मत्स्यतोऽन्ये च ततोऽखिलानामुदक्स्थितो मेरुरिति प्रसिद्धम्।।"**

***(सिद्धान्तशिरोमणिः, गोलाध्यायः, भुवनकोशः, १)***

भास्कराचार्येण सूक्ष्मरीत्या दिग्ज्ञानकृतमस्ति। उदकेन समीकृतायां भूमाविष्टप्रमाणं वृत्तं विलिख्य तस्य केन्द्रे द्वादशाङ्गुलशङ्कुः निवेश्य तस्य छाया तस्मिन् वृत्ते यत्र प्रविशति,पूर्वाह्णेऽपराह्णे यत्र निर्गच्छति तत्र पश्चिमपूर्वदिशौ किल भवतः। परन्तु यस्मिन् काले छायाप्रवेशो यातो यस्मिन् काले च निर्गमस्तात्कालिकयोरर्कयोः क्रान्तिज्ये साध्ये। तयोरन्तरात् तस्माश्छायाः कर्णेन गुणिता लम्बज्यया भक्ताद्यल्लब्धमङ्गुलादिफलं तेनैन्द्री दिगुत्तरश्चलिता स्फुटा भवति। तद्युत्तरेऽयने रविर्वर्तते। यदि दक्षिणे तदा दक्षिणतः। एवं स्फुटा प्राची। तन्मत्स्याद्याम्यसौम्ये दिशौ। यथा श्लोके —

**"वृत्तेऽम्भः सुसमीकृतक्षितिगते केन्द्रस्थशङ्कोः क्रमाद्-भाग्रं यत्र विशत्यपैति च यतस्तत्रापरैन्द्रयो दिशौ।**

**तत्कालापमजीवयोस्तुविवराद्भाकर्णमित्याहता-**

**ल्लम्बज्याप्तमिताङ्गुलैरयनदिश्यैन्द्री स्फुटा चालिता।।**

**तन्मत्स्यादथ याम्यसौम्यककुभौ सौम्याध्रुवे वा मवे-देकस्मादपि भाग्रतो भुजमितां कोटीमितां शङ्कुतः।**

**न्यसेद्यष्टिमृजुं तथा भुवि यथा यष्ट्यग्रयोः संयुतिः। कोटिः प्राच्यपरा भवेदिति कृते बाहुश्च याम्योत्तरा।। "**

***(सिद्धान्तशिरोमणिः, त्रिप्रश्नाधिकारः, श्लो. ८-९)***

अस्योपपत्तिस्तु अहोरात्रवृत्तं इष्टानामुन्नतघटिकानामग्रे पूर्वाह्णे सममण्डलेन यावदन्तरं तावदेवापराह्णे तावतीनामिष्टघटीनामग्रे भवति। अतः तच्छायाग्रविन्दुभ्यां दिग्ज्ञानमुपपद्यते। परं तत्कालान्तरेण यदर्कक्रान्त्यन्तरं तेनान्तरितो भवति। अतस्तत्सन्धेयम्। तच्चैवम्। तस्मिन् काले यानि कर्णवृत्ताग्राङ्गुलानि पूर्वाह्णे,यानि चापराह्णे तेषामन्तरं कार्यम्। यदि लम्बज्योकोट्या त्रिज्याकर्णस्तदा क्रान्तिज्यान्तरेण किमिति। अत्र लब्धमग्रान्तरम्। ततोऽन्योऽनुपातः यदि त्रिज्या व्यासार्धे एतावदन्तरं तदा कर्णव्यासार्धे किमिति। अत्र तुल्यत्वाद् गुणकभाजयोस्त्रिज्यानाशे कृते सत्युपपन्नम् भवति।

**मुनीश्वरकृतं दिक्साधनम्**

सिद्धान्तसार्वभौमे त्रिप्रश्नाधिकारे(श्लो.५८-६२) मुनीश्वरेण दिक् साधितमस्ति। भूबिम्बतो रविविम्बस्य महत्वाद् यदा किल रविबिम्बकेन्द्रं गर्भभुजे समुदितं भवेत्तदा तद्विम्बोध्वप्रदेशस्य पृष्ठक्षितिजादुपरि गतत्वाद् सूर्यबिम्बस्य तेजोगोलकत्वाच्च केन्द्रजनितायाश्छायाया अभावेऽपि बिम्बोर्ध्वप्रदेशानां पृष्ठक्षितिजोपरिगतानां

किरणप्रसरणत्वतस्तत्र छाया भवत्येव। अत एव रविबिम्बीयनतांशेषु रविबिम्बार्धकलामूनीकृत्य तन्नतांशवशेन या छाया स्यात्सैव रविबिम्बोर्ध्वप्रदेशस्य दर्शनीया भा भवतीति मुनीश्वरोक्तिः। अयमपि प्रकारः पूर्वाचार्यवदेव। किन्तु प्रकारेस्मिन् बिम्बार्धकलायुतोनिता क्रान्तिः स्वीकृता। परन्तु एतावता किमपि वैशिष्ट्यं नायाति (पाण्डे, १९९० : ६३)।

रात्रौ अपि दिक् साधनं मुनीश्वस्य नवीनोपपत्तिरस्ति। अनेन रात्रौ ध्रुववेधेन दिक् साधितमस्ति। स यथा —

**"दक्षिणापाङ्गसंसक्तमूलयट्यग्रसदृशाः पश्येन्न ध्रुवभं तस्मिन् क्षणे यष्ट्यग्रमूलयोः।**

**लम्बपातौ भूमिभागे तद्रेखासौम्यदक्षिणम्। सूत्रं व्यक्षात्सौम्यभागे याम्ये याम्योत्तरं क्रमात्।।**

**पूर्वपराख्यं तन्मत्स्यात्सूत्रमर्कोदयास्ततः। एवं रात्रौ दिशःसाध्याः शेषां पूर्वौदितं भवेत्।। "**

**(सिद्धान्तसार्वभौमः, त्रिप्रश्नाधिकारः, ६३–६५)**

दक्षिणनेत्रान्तलग्नमूलायाः यष्ट्या अग्रे संदृष्ट्या ध्रुवतारायां वेधकः पुरुषः पश्येत्। तस्मिन् क्षणे एव तादृकसंस्थितयष्ट्या अग्रमूलयोर्लम्बयोः पातः भूमि भागे कार्यः। तद्रेखालम्बपातान्तररेखाक्रमेणोत्तरदक्षिणं दिक्सूत्रम्। निरक्षदेशादुत्तरभागे तु अग्रमूलक्रमाद्दक्षिणोत्तरं दिक्सूत्रम्। तन्मस्यात् सिद्धदक्षिणोत्तरसूत्रजातमत्स्यात् मुखपुच्छसूत्रं मत्स्यमध्यगतं पूर्वापराख्यं सूत्रम्। सूर्योदयो यस्मिन् भागे तद्भागीयसूत्राग्रं पूर्वादिक्। सूर्यास्तो यस्मिन् भागे तद्भागीयभाग्रं पूर्वदिक्। सूल्वसूत्रौ अपि ध्रुववेधेन दिक् साधितमस्ति।

**दिक्साधने कमलाकरस्य मतम्**

चुम्बकज्ञानेन दिग्ज्ञानं सर्वप्रथमं कमलाकरेणैव प्रदर्शितमस्ति। कस्यामपि दिशि धृतस्य चुम्बकस्य पुनः पुनः स्वशक्त्या परिवृत्य ध्रुवाभिमुखमेव स्थिरीभूतस्यावलोकनात् तद्वशेन दिग्ज्ञानं भवति। यथाऽऽश्लोके —

**"सचुम्बकादेव सुशिल्पविज्ञाः कुर्वन्ति दिग्ज्ञानमिहान्यथैव।**

**पूर्वापरा याऽत्र कृता प्रकारैर्ज्ञेया बुधैः सा**

**सममण्डलीया।।" (सिद्धान्ततत्वविवेकः, त्रिप्रश्नाधिकारे, ३७८ )**

अन्यस्तु पूर्वाचार्यवदेव कमलाकरेणपि साधितमस्ति। विशेषतया भास्कराचार्योक्तएव कमलाकस्याऽपि मतमस्ति।

**दिक्साधने गणेशदैवज्ञमतम्**

गणेशदैवज्ञेन ग्रहलाघवकरणम् विरचितमस्ति। अनेन दिगंशानाधारीकृत्य तुरीययन्त्रद्वारा सूक्ष्मदिग्ज्ञानविधिः प्रदर्शितम्। तद्यथा —

**"समभुवि निहिते तुरीययन्त्रे स्पृशति यथा च दिगंशकाग्रकेन्द्रे।**

**अवलम्बविभोत केन्द्रसंस्थेषीकाभाऽथ दिशोऽत्र यंत्रगाः स्युः।।"**

**(ग्रहलाघवकरणम्, त्रिप्रश्नाधिकारः, २४)**

वृत्तपादरूपमेव तुरीययन्त्रम्। वृत्ताङ्घ्रिरूपश्च दारुमयं वा लौहमयं वा विरच्य। नेम्यां नवत्यंशाः कालाश्चाङ्क्याः। इष्टकालिकसाधितदिगंशाः नेम्यां देयाः। तच्च भूमौ निधाय केन्द्रस्थशङ्कोः शलाकायाः वा छाया दिगंशकाग्रे यथा पतेत् तथा यन्त्रं धार्यम्। एवं सति दृक्कुजसूत्रे एव छायासंभवात् स्थापितयन्त्रं यथार्थरूपेण अवस्थितं जायते। तथात्वे यन्त्रगपूर्वापरा याम्योत्तरेति स्फुटम्। यन्त्रीय पूर्वविन्दुरेव वास्तविकपूर्वविन्दुः भवति।

**सुधाकरस्य दिग्ज्ञानम्**

सुधाकरेण पूर्वप्रतिपादिततसिद्धान्तानामालोडनपूर्वक तत्रस्थ अभावपूर्तिद्वारा दिग्ज्ञाने पूर्णता प्रदत्तमस्ति। दिग्मीमांसाया अनेन दिग् विषये शोधकार्यकृतमस्ति। तथा च पूर्वाचार्यप्रतिपादितनि मतानि समालोच्य स्वप्रतिभाया स्वकृतदिग्मीमांसाग्रन्थे दिग्ज्ञानविधौ बहवः प्रकाराः प्रदर्शिताः। सुधाकरीय दिक्साधनं सर्वस्वीकृतञ्चास्ति।

रात्रौ आकाशीय तारावलोकनद्वारा दिग्ज्ञानं भवति। ध्रुवतार सदा उत्तरदिशि तिष्ठति। भूमध्यप्रदेशात् ध्रुवं नवत्यंशे खमध्ये दृश्यत्। ध्रवतार सदा उत्तरदिश्येव भवति। तदनन्तरा मत्यूयतार वलोकनात् तद् विपरीतदिग्ज्ञानं भवति। याम्योत्तरदिग्ज्ञानात् पूर्वापरमपि याम्योत्तरबिन्दुस्थानानुपातद्वा ज्ञातुं शक्यते। ध्रुवतारतावलोकनाद् दिग्ज्ञानं भवतीति यथा कथयति नागेन्द्रपाण्डेमहाभागाः ध्रुवतारावलोकनात् उत्तरदिग्ज्ञानं सुखेनेत्यत्रापि प्त्यक्षदृष्टध्रुवतारायाश्चलनात् कथं तावदेतद्युक्तमिति युक्ता शङ्केत्पद्यते, अतएव कालत्रये मूलमिलितयष्टियन्त्रेण पृथक् पृथक् ध्रुवतारां विध्वा तत्तद्यष्ट्यग्रगतसूत्रजनितत्रिभुजोपरिवृत्तं भवेत् तत्केन्द्रं ज्ञात्वा तं ध्रूवं मत्वा तद्वसात्कृतं दिग्ज्ञानं वास्तवमिति। *(पाण्डेय, २०४७, पृ. ६८) ध्रुवतारावलोकनात् उत्तरदिग्ज्ञानं सुखेनेत्यत्रापि प्रत्यक्षदृष्टध्रुवतारायाश्चलनात् कथं तावदेतद्युक्तमिति युक्ता शङ्केत्पद्यते, अतएव कालत्रये मूलमिलितयष्टियन्त्रेण पृथक् पृथक्*

*ध्रुवतारां विध्वा तत्तद्यष्ट्यग्रगतसूत्रजनितत्रिभुजोपरिवृत्तं भवेत् तत्केन्द्रं ज्ञात्वा तं ध्रूवं मत्वा तद्वसात्कृतं दिग्ज्ञानं वास्तवमिति। (पाण्डेय, २०४७, पृ. ६८)*

**निष्कर्षः**

*दशसंख्यकाः* दिशाः सन्ति। व्यवहार प्रवर्तनाय दिग्ज्ञानस्यावश्यकं भवति। वैदिककालादेव दिक्साधनविधि निदर्शितमस्ति। ब्रह्मगुप्तात् पूर्वं प्रायः सामान्यरूपेण दिग्ज्ञानपद्धतिः नक्षत्रवशतः रविच्छायावशतो वा आसीत्। ब्रह्मगुप्ताचार्येण सर्वप्रथममग्रन्तरं संसाध्य निर्गमचिह्नादयनदिशि चालनद्वारा स्फुटा प्राची साधिता। सर्वप्रथमः सूक्ष्मदिग्ज्ञानोद्भावकः ब्रह्मगुप्त एवास्ति। द्वितीयभास्कराचार्येण ब्रह्मगुप्तपद्धतिमाश्रित्यैव छायाप्रवेशनिर्गमकालिकछायाग्रीयभुजान्तरस्य निर्गमचिह्नादयनदिशिचालनद्वारा सूक्ष्मार्थ प्रयासो विहितः। किन्तु चालनविधौ भुजान्तरस्य चापे दाननौचित्यात् न स्फुटा प्राची जायते। चालनविधेः अनुपपत्तिविषये कमलाकरेण किञ्चिदपि नोक्तम्। किन्तु विषयेऽस्मिन् चालनं कथं देयं येन स्पुटा प्राचीसिद्ध्येत्, तदर्थं सुधाकरोक्त चालनविधिप्रकारः श्लाध्यः।

भास्करोक्तपद्धतिं विज्ञायैव छायाप्रवेशनिर्गमकालिकदिगंशान्तरस्य अयनदिशि चालनद्वारा पूर्वापेक्षया सूक्ष्मदिग्ज्ञानं दर्शितं कमलाकरेण। अत्र दिगंशान्तरस्य चापरूपस्य निर्गमचिह्नादयनदिशि चापे दानस्यौचित्यम्। अतः परं गणेशदैवज्ञः पूर्वाचार्यपद्धतिमाश्रित्यपि दिगंशसाधनं विधाय तुरीययन्त्रद्वारा सूक्ष्मदिग्ज्ञानविधिः प्रदर्शितः। सुधाकरेण पूर्वाचार्याणां मतानि समालोच्य स्वप्रतिभया दिग्ज्ञानविधौ बहवः प्रकाराः प्रदर्शिताः। मूलतः दिवा सूर्यस्य छायाद्वारा तथा च रात्रौ ध्रुवतारावेधेन दिग्ज्ञानं भवति।

**सन्दर्भग्रन्थसूची**

आचार्यः, भास्करः (ई.सं.१९९८), सिद्धान्तशिरोमणिः, मुरलीधरचतुर्वेदः (व्याख्या.), द्वि.संस्क., वाणरसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

आचार्यः, लगधः (२००५), वेदाङ्गज्योतिषम्, शिवराज आचार्यः कौडिन्यायनः(व्याख्या.), वाराणसी : चौखम्बाविद्याभवनम्।

आचार्यः, ब्रह्मगुप्तः(१९६६), ब्रह्मस्फुटसिद्धान्तः (भाग १,२,३), रामस्वरूप शर्मा (सम्पा.), प्र. संस्क., दिल्ली : इन्डियन इन्स्टिट्युट अफ अस्ट्रानोमिकल एण्ड संस्कृत रिसर्चः।

आचार्यः, लल्लः (१९८१), शिष्यधीवृद्धिदम्, भास्कराचार्यः(व्याख्या.), सम्पा. चन्द्रभानपाण्डेयः, वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

आचार्यः, वराहमिहिरः (१९६८), पञ्चसिद्धान्तिका, सुधाकर द्विवेदी तथा जी. थिब्बुट (सम्पा.), द्वि.संसक. वाराणसी : चौखम्बा संस्कृत सिरिज अफिसः।

आर्यभट (प्रथमः) (२०१३), आर्यभटीयम्, सत्यदेवशर्मा (सम्पा.), वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।

आर्यभट (द्वितीय) (१९७०), महासिद्धान्तः, सुधाकरद्विवेदी (सम्पा.), वाराणसी : ब्रजभूषणदास एण्ड कं।

आथर्वज्योतिषम् (२००३), वाराणसी : भारतीयविद्याप्रकाशनम्।

ऋग्वेदसंहिता (भाग १ –५) (सन् १९७२), सायणव्याख्या, पुणे : वैदिकसंशोधकमण्डलम्।

कमलाकरभट्टः (१९९६), सिद्धान्ततत्त्वविवेकः (भागः १,२,३), कृष्णचन्द्रद्विवेदी (सम्पा.), वाराणसी : संम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

गणेशदैवज्ञः (२०५२), ग्रहलाघवं करणम्, तृतीय संस्क. वाराणसी : चौखम्भासंस्कृतसंस्थानम्।

जगन्नाथः (१९६७), सम्राट्सिद्धान्तः (भाग १,२), रामस्वरूपशर्मा (सम्पा.), दिल्ली : इन्डियन इन्स्टीट्युट ऑफ अष्ट्रोनोमिकल एण्ड संस्कृत रिसर्च।

द्विवेदी, सुधाकरः (१९३३), गणकतरङ्गिणिः, पद्माकर द्विवेदी (सम्पा.), वाराणसी : वि. के. शास्त्री।

दीक्षितः, शङ्करवालकृष्णः (२००२), भारतीय ज्योतिष, शिवनाथ झारखण्डी (अनु.), तृ. संस्क., लखनऊ : उत्तरप्रदेश-हिन्दी-संस्थानम्।

पाण्डेय, नागेन्द्र (१९९०), ज्योतिषशास्त्रे दिग्देशकालज्ञानमन्, वाराणसी : सम्पूर्णनन्द-संस्कृत-विश्वविद्यालयः।

भास्करः (प्रथमः) (ई.सं. १९४५), महाभास्करीयम्, पुना : आनन्दाश्रमः।

भास्करः (प्रथमः) (वि.सं. २०२०), लघुभास्करीयम्, लखनऊ : कृपाशंकरशुक्लः।

भट्टाचार्यः, विश्वनाथः (१९९१) न्यायसिद्धान्तमुक्तावली, द्वि.संस्क. सम्पा. ढुण्डीराजशास्त्री, वाराणसी : चौखम्बासंस्कृतप्रतिष्ठानम्।

मुनीश्वरः (शक. १९००), सिद्धान्तसार्वभौमः (भाग १,२,३), भागीरथप्रसाद त्रिपाठी, मीठालालौझाः (सम्पा.), वाराणसी : सम्पूर्णनन्दविश्वविद्यालयः।

व्यासः (वि.सं.२०६५), श्रीमद्भागवतमहापुराणम्, द्वात्रिंश संस्क. गोरखपुरः : गीताप्रेस।

शतपथब्रह्मणः (१९६४), अलवेतरेन वेवर (सम्पा.), चौखम्बासंस्कृतसीरिज।

शास्त्री, नेमिचन्द्रः (१९८१), भारतीयज्योतिषः, नवम संस्क., दिल्ली : भारतीयज्ञानपीठम्।

शुक्लयजुर्वेदसंहिता (१९७८), जगदीशलाला शास्त्री (सम्पा.), दिल्ली : मोतीलाल बनारसीदास।

श्रीपतिः (१९३२), सिद्धान्तशेखरः, बबुआजीमिश्रः (सम्पा.), कलिकता : वि. वि. मुद्रणालय।

शर्मा, प्रेमकुमारः (२००५), सिद्धान्तशिरोमणेगोलाध्यायस्योपपत्तिः, दिल्ली : नाग पब्लिसर्स।

सूर्यसिद्धान्तः (वि.सं.२०४४), वाराणसी : सम्पूर्णनन्द-संस्कृत-विश्वविद्यालयः।

ज्ञानराजः (शक.१४२५). सिद्धान्तसुन्दरम्, सदानन्दशुक्लः (सम्पा.), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।






समुद्घाटनसमारोहः
आयोजकाः



# धर्मशास्त्रदृष्ट्या विवाहस्य भेदाः

**दामोदरः रेग्मी**

..............

..............

**लेखसारः**

वैदिकसत्यसनातनधर्मे षोडशसंस्काराः सन्ति। तेषु अन्यतमः विवाहसंस्कारः। विवाहसंस्कार आदररूपेण पवित्रसंस्काररूपेण च गृह्यते। एषः संस्कारः गृहस्थाश्रमं प्रविविक्षतैः नरैरनुष्ठीयते। अस्य संस्कारस्य विषये विभिन्नेषु ग्रन्थेषु चर्चा प्राप्यते। विवाहाद्वंशपरम्परा सिद्धा भवति, सम्पत्तये च उत्तराधिकारिणः समस्यायाः समाधानं भवति, पितृ–ऋणाच्च मुक्तिर्भवति, तथैव कस्यापि वंशच्छेदः न स्यात्, इति धिया अस्माकं परम्परायां विधिरयं क्रियते। अयं संस्कारः गृहस्थाश्रमपरिपालनाय आवश्यको भवति। धर्मशास्त्रदृष्ट्या ब्राह्म–दैव–आर्ष–प्राजापत्य–आसुर–गान्धर्व–राक्षस–पैशाचश्चेति कृत्वा अष्टौ भेदाः सन्ति। तेषु केचन भेदा एव अधुना प्रचलिताः सन्ति। लेखेऽस्मिन् षोडशसंस्कारेषु विवाहसंस्कारस्य स्थाननिर्धारणं तथा धर्मशास्त्रदृष्ट्या विवाहसंस्कारस्य भेदानां विश्लेषणमस्ति।

**प्रमुखाः शब्दाः** :– आर्षः, गान्धर्वः, प्राजापत्यः, ब्राह्म, संस्कारः।

**विषयप्रवेशः**

षोडशसंस्काराणां मध्ये प्रमुखसंस्कारो विवाहसंस्कारोऽस्ति। गृहस्थाश्रमं प्रविविक्षता विवाहसंस्कारोऽनुष्ठीयते। अयं संस्कारः गृहस्थाश्रमपरिपालनाय आवश्यको भवति। गृहे गृहिणी आवश्यकी अस्ति। अतः स्त्रीपुरुषयोः सौन्दर्यं पौरुषं नारीत्वं चरित्रं कुलञ्चेति बाह्याभ्यन्तरदृष्ट्या उद्वाहः परिणयनं विवाह इति वा अभिधीयते। इहामुत्र च नारीणां परमा हि गतिः पतिः, भर्तृमार्गानुसरणं स्त्रीणां हि परमं व्रतम्, न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते, इति च कथ्यते। पुरुषः विवाहेन हि पुनश्च पूर्णो भवति। पुत्रलाभेन पितृ–ऋणाद् मुक्तिः इत्यादिभिः सुभाषितैः अस्य विवाहसंस्कारस्य महत्त्वमवगम्यते। तत्र वरेण वध्वाः पाणिग्रहणेन तस्याः तदायत्तीभावो व्यज्यते। अश्मनि तस्याः पादारोहणेन अश्मन इव तस्याः स्थैर्यापादनमुद्दिष्टम्। दृढअश्म इव त्वं स्थिरा भवेति। अपि च eqf{ सह तस्याः

(ज) भारतीय विद्यासार २.१.२. भाग, सम्पा- शशिवाला, भारतीय विद्याभवन

पुनरपि एतद्विषयकं वैदिकज्ञानं गहनगवेषणापेक्ष्यं वर्तते। अग्नेः प्रथम आविष्कर्ता अथर्वा ऋषिः विद्यते।[13] आधुनिकभौतिकविज्ञाने शक्ति-Force, गति-Motion, ऊर्जा-Energy, सामर्थ्य-Power, ताप-Heat, ध्वनि-Sound, प्रकाश- Light, चुम्बकत्व-Magnetism, विद्युत्-Electricity, नाभिकीय-ऊर्जा-Nuclear Energy इत्यादिविषयेषु अध्ययनं क्रियते। वैदिकवाङ्मये अग्निविषये शतशः रहस्यं वर्णितं विद्यते। अग्निः अविनाशी विद्यते- **अग्निरमृतोऽभवद् वयोभिः**। यजुः १२/२५

एकैवाग्ने विविधरूपेण रूपान्तरणं विविधाभिधानैश्च तस्य विविधशक्तीनां वर्णनं दृश्यते, यथा-

(क) **यो देवानां नामधा एक एव। ऋक् १०/२२/०३**

(ख) **अग्ने त्मना शतिनं पुरुरूपम्। ऋक् २/२/९**

(ग) **स्तीर्णा अस्य सहतो विश्वरूपा। ऋक् ३/१/७**

(घ) **शतिनं पुरुरूपम्। ऋक् २/२/९**

वेदेषु वैश्वानर-अग्नेः (universal energy) विस्तृतं वर्णनं विद्यते-

(क) **वैश्वानरो विश्वकृत्। अथर्व- १/४७/१**

(ख) **वैश्वानरो नाभिरसि क्षितीनाम्। ऋक् १/५८/१**

(ग) **वैश्वानरो महिम्ना विश्वकृष्टिः वैश्वानरः विश्वस्य आकर्षणकेन्द्रो विद्यते। ऋक् १/५८/७**

ऊर्जायाः सर्वस्य विश्वस्य। अग्नेः विराट् स्वरूपम् इन्द्र-विष्णु-ब्रह्मा-धाता-मित्र-वरुण-अर्यमा-त्वष्ट्रा-रुद्र-मरुत्पूषादि विविधरूपेण चित्रणं विद्यते।[14] वैदिकसाहित्यानन्तरं महर्षिकणादादेः यथार्थवाद-कारणवाद-परमाणुसिद्धान्तानां सर्वप्रथमं प्रतिपादनं कृतम्।[15] अगस्त्यसंहितायाः विद्युन्निर्माणादिविद्या नूनं परिशीलनीया। रसायनशास्त्रम् संस्कृतवाङ्मये रसायनविज्ञानविषयं सविस्तरं प्रतिपादितम्। जलस्योत्पत्तिः, जलस्य विविधं

---

13 त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः। ऋ० ६/१६/१३

14 (क) त्वमग्नः इन्द्रः त्वं विष्णुः त्वं ब्रह्मा। ऋग्० २/१/३

(ख) त्वं वरुणः त्वं मित्रः त्वं अर्यमा। ऋ० २/१/४

(ग) त्वं रुद्रः त्वं मारुतं त्वं पूषा। ऋ० २/१/६

(घ) त्वमदितिः त्वं भारती त्वम् इडा त्वं सरस्वती। ऋ० २/१/११

15 प्राचीन भारत के वैज्ञानिक कर्णधार। पृ० २५७-३१४

स्वरूपं तन्महत्त्वविषये च अनेकरहस्यात्मकं तथ्यं दृश्यते। जले अग्नीषोमयोः उभयोरस्तित्वं विद्यते।

**अग्नीषोमौ विभूति आप इत् वाः। अथर्व० ३/१३/०५**

**अप्सु आसीत् मातरिश्वा प्रविष्टः। अथर्व० १०/०९/४०**

**मित्रावरुणौ त्वा वृष्टेः निमित्ते। यजुः२/१५**

**मित्रावरुणौ त्वा वृष्ट्यावताम्। शतपथ १/८/३/१२**

वैदिकसाहित्ये निघण्टौ जलस्य शतनामानि जलस्य विविधमहत्त्वप्रतिपादकानि वर्तन्ते।

**अकार्ननिकरसायन, धातुजरसायनविषयो विस्तरेण विवृतः।**[16]

**यो विभर्त्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः।**

**लवणेन सुवर्णं सदध्यात् सुवर्णेन रजतं रजतं रजतेन त्रपुः।**

**त्रपुणा सीसं सीसेन लौहं लोहेन दारु दारुणा चर्म।**[17]

सुश्रुतचरकादिसंहितासु विविधरसायनानाम् आसवानां निर्माणं विदितमेवास्माकम्। रसरत्नाकरादिग्रन्थेषु महत्त्वपूर्णानि तथ्यानि विद्यन्ते तेषां गवेषणापेक्ष्यते। यथा-

**ताम्रेण स्वर्णनिर्माणम्-**

**किमत्र चित्रं रसको रसेन, क्रमेण कृत्वाऽम्बुधरेण रञ्जितः।**

**करोति शुल्बं त्रिपुटेन काञ्चनम्॥**[18]

**रजतेन स्वर्णनिर्माण्-**

**किमत्र चित्रं दरदः सुभावितः पयेन मेण्या बहुशोऽम्लवर्गैः।**

**सितं सुवर्णं बहुधर्मभावितं, करोति साक्षाद् वरकुंकुमप्रभम्।।**[19]

अस्मिन् विषये नागार्जुनप्रणीतरसरत्नाकरम्, गोविन्दभगवत्पादरचित-

---

16 संस्थाप्य मृण्मये पात्रे ताम्रपत्रं सुसंस्कृतम्। छादयेच्छिखिग्रीवेन चार्द्राभिः काष्ठपांशुभिः।
दस्तालोष्टो निधात्वयः पारदाच्छादितस्ततः। संयोगाज्जायते तेजो मित्रावरुणसंज्ञितम्॥
(अगस्त्यसंहिता)
तत्रैव- तडित्-कौशेयवस्त्रसंघर्षणजा, सौदामिनी-रत्नघर्षणजा, अशनीविद्युत्- मेघजा, शतकुम्भी (सैल से उत्पन्न) चुम्बकदण्डजा, ह्रदनि-ह्रदोत्पन्ना संग्रहिता वा वर्णिता।

17 छान्दोग्य० ४/१७/७

18 रसरत्नाकरः- अ.१.३.वै.वि.पृ. १५९, वेदों में विज्ञान पृ. ५५

19 रसरत्नाकर अ. १.४, वै.वि.पृ. १६०

रसहृदयतन्त्रम्, रसेन्द्रचूडामणिः, रसप्रकाशसुधाकरः, रसार्णवः, रसराजलक्ष्मी, रसेन्द्रसारसंग्रहः, रसरत्नसमुच्चयादिग्रन्थाः विवेच्याः।।[20]

वैदिकलौकिकसंस्कृतसाहित्ये वनस्पतिविज्ञानविषये विपुलं तथ्यं विवृतम्। वराहमिहिरकृतवृक्षायुर्वेदप्रकरणं संस्कृतज्ञैरवश्यं परिशीलनीयम्। तत्र वृक्षाणां सद्यः उत्पत्तिः फलपुष्पागमविधिश्च प्रतिपादितो।[21]

वृक्षवनस्पतीनां हरितिमाविषये लिखितम्-

अविर्वै नामदेवता ऋतेनास्ते परीवृता।

तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः।[22]

अस्मिन् मन्त्रे- Chlorophy LL- अवितत्त्वनाम्नोक्तम्।

वनवृक्षाणां संरक्षणस्य महत्त्वं प्रतिपादयतोक्तम्-

**मा ओषधी हिंसीः। यजु. ६.२२**

**अपः पिन्व ओषधीर्जिन्व। यजु. १४.८**

**आप ओषधीरुत नोऽवन्तु धौर्वना गिरयो वृक्षकेशाः। ऋक् ५.४१.१**

**ओषधयो वै पसुपतिः। शतपथः ६.१.३.९२**

**वनानां पतये नमः, वृक्षाणां पतये नमः ओषधीनां पतये नमः। यजु. १६.१७-१९**

महाभारतस्य शान्तिपर्वणि वृक्षेषु चैतन्यं प्रतिपादयन् वर्णितम्-

**घानानामपि वृक्षाणाम् आकाशोऽस्ति न संशयः।**

**म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते।**

**सुखदुःखयोश्च ग्रहणात् छिन्नस्य च विरोहणात्।**

**जीवं पश्यामि वृक्षाणां अचैतन्यं न विद्यते॥**[23]

एतत्तथ्यं जगदीशचन्द्रवसुमहोदयः बहुधा परीक्ष्य वृक्षेषु जीवनसिद्धान्तं सविस्तरं प्रतिपादयामास।

**शिल्पविज्ञानम्-** अस्मिन् विषये संस्कृतसाहित्ये अनेके ग्रन्थाः विद्यन्ते- समराङ्गसूत्रधारः अपराजित-पृच्छा, युक्तिकल्पतरु- यन्त्रसर्वस्व इत्यादयः प्रमुखाः।

---

20 संस्कृत शास्त्रों का इतिहास- श्री बलदेव उपाध्याय

21 बृहत्संहिता- वृक्षायुर्वेदप्रकरणम्

22 अथर्व १०.८.३१

23 महा०शान्तिः १८४, १०-१८

वैदिकवाङ्मये, धनुर्वेदसंहिता-रामायण-महाभारतादिग्रन्थेषु विविधदिव्यास्त्र-शस्त्रास्त्ररासायनिकास्त्रादीनामपि वर्णनं विद्यते। ब्रह्मास्त्रविषये वर्णयन् अथर्ववेदे उक्तम्-

**ब्रह्मणो हेते तपसश्च हेतेः येन्या मेनिरसि। अथर्व. ५.६.९**

**सम्मोहन-अस्त्रम्-अग्निः ससेना मोहयतु परेषां निर्हस्तान् च कृणवत्। अथर्व. ३.१.९**

**तामस-अस्त्रम्-विविध्मत तमसापव्रतेन यथैषामन्यो अन्यं न जानात्। अथर्व. ३.२.६, यजु. १७.४७**

**यन्त्राणि विमानशास्त्रञ्च**

राज्ञा भोजेन समराङ्गण-सूत्रधारस्य यन्त्राध्याये बहूनां यन्त्राणां- मन्त्रमानव (रोबोट) लिफ्ट विमानादीनां वर्णनं विहितम्। लघुदारूमयं महाविहंगं दृढ़सुश्लिष्टतनु विधाय तस्य उदरे रसयन्त्रमादधीत ज्वलनाधारमधोऽस्य अग्निचूर्णम्, सुप्तस्यान्तः पारदस्यास्य शक्त्या चित्रं कुर्वन् अम्वरे- यातिदूरम्।[24]

यन्त्र सर्वस्वग्रन्थे भारद्वाजो मुनिः प्रतिपादयति, वेदेभ्य एव तेन विमान विद्या अधिगतः।[25] तत्र विमानस्य स्वरूपं वर्णयन् उक्तम्-

**पृथिव्याप्स्वन्तरिक्षेषु खगवत् वेगतः स्वयम्,**
**य समर्थो भवेद्गन्तुं स विमान इति स्मृतः।**
**देशाद् देशान्तरं तद्वद् द्वीपाद् द्वीपान्तरं तथा।**
**लोकात् लोकान्तरं चापि योऽम्बरे गन्तुमर्हति**
**स विमान इति प्रोक्तः खेटशास्त्रविशारदैः। (पृ. ७)**

बृहद्विमानशास्त्रे विमानविषयकाणि चमत्कारकाणि तथ्यानि प्रतिपादितानि। अन्यच्च विमानचालकस्य गुणाः आकाशीयमार्गज्ञानं आकाशीयावर्त्तज्ञानं सौर ऊर्जा, विमानस्योपरि अशनिपातनिरोधयन्त्रम् इत्यादिकम् विवेचितम्।[26]

तत्र नारायणकृतविमानचन्द्रिका, शौनककृतव्योमयानतन्त्रम् गर्गकृतयन्त्रकल्प वाचस्पति-कृतयान-बिन्दुः, चाक्रायणीकृत खेटयानप्रदीपिका, धुण्डीनाथकृत व्योमयानार्थप्रकाश इत्यादीनां ग्रन्थानां वर्णनमवाप्यते। आधुनिकविमानाविष्कार- १९३०

---

24 समराङ्गणसूत्रधार- अध्याय-३१

25 निर्मथ्यो वेदाम्बुधिं भरद्वाजो महामुनिः। नवनीतं समुद्धृत्य यन्त्रसर्वस्वरूपकम्। ५.२.३

26 बृहद् विमानशास्त्रम्- पृ. ७.१८.२०.२४.११३ इत्यादिकम्

वर्षे समये राइटभ्रातृभिः कृतः। महर्षिभारद्वाजप्रणीतस्य यन्त्रसर्वस्वस्य कालं तु आधुनिकाः विद्वांसः १०००BC निर्धारयन्ति। तत्र विमानानां चालनाय शिखितैलस्य, पारदस्य, सौरोर्जायाः वातावरणात्शक्तिसंगृह्य च चालनस्य निर्देशः


अन्ताराष्ट्रियं नेपाल-भारत-संस्कृत
चैत्रमासस्य १४-१६, २०८० । मार्च २७-२९, २०२४ ।
परिचर्चासत्रम

# नेपालभारतयोरात्मीयसम्बन्धस्य मूलं संस्कृतम्

**प्रकाशतिवारी 'विद्यावारिधिः'**

सहप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः।

**१. विषयप्रवेशः**

नेपालभारतयोर्मैत्रिपूर्णसम्बन्धस्य संयोजने सुदृढतरनिकषोपमं देशद्वयस्य विशिष्टविदुषां सहभागित्वे इतः पूर्वमपि नेपालभारतान्ताराष्ट्रियसंस्कृतसम्मेलनं वारत्रयं[27] नेपाले समायोजितमित्यस्माकं कृते महतो हर्षस्य विषयः। सम्प्रति च तस्यैव शृङ्खलारूपेण सम्मेलनमिदमत्र नेपाले सम्पत्स्यमानमस्तीति च वयं संस्कृतविद्याविनिर्मितप्रगाढसम्बन्धसुदृढीकरणविधौ नवीनसोपाने समारूढाः स्मः। एतादृशं सम्मेलनं भारते नेपाले भारतवर्षे वा यत्र कुत्राऽपि भवेत् तस्य योगदानं संस्कृतविद्यायाः संरक्षणेन तत्रस्थानां ज्ञानविज्ञानसम्बद्धानां विषयाणामनुसन्धानेन समग्रतः संस्कृतवाङ्मयस्य समुन्नत्यै भवितुमर्हतीति नात्र कोऽपि विसंवादः। तदेव हृदि निधाय भारतस्य संस्कृतविद्यापरम्परयाऽनुप्राणिता नैपालिकी संस्कृतविद्यासरणिः संमृद्धिमधिगतेति नेपाले सञ्चालितां तामेव परम्परामभिलक्ष्य मध्ये मध्ये भारतीयैर्विद्वद्भिः कथं महनीयं योगदानं प्रापितमिति सन्दर्भं संयोज्य साम्प्रतं यावन्नेपाले प्रचलितायाः संस्कृतविद्यापरम्पराया विषये यथाक्रमं सङ्क्षेपेण प्रस्तुतिपूर्वकं विद्याविद्योतितदेशद्वयसम्बन्धोपरि किञ्चित् प्रकाश्यते।

**२. संस्कृतविद्यायाः महत्त्वम्**

संस्कृतविद्या प्राचीनवैदिकसंस्कृतेः पौरस्त्यदार्शनिकचिन्तनस्य च स्रोतोऽस्ति। संस्कृतं न केवलं भाषायामेव निहितम् अपि तु विश्वस्य जीवनाधायकं वस्तु वर्तते। सा संस्कृतभाषा परिष्कृता, परिमार्जिता, वैदिककालादेव सर्वत्रामरभाषा गीर्वाणवाणी सरस्वतीत्यादिभिर्नामभिर्व्यवहृताः। उक्तञ्च– भाषासु मधुरा मुख्या श्रेष्ठा गीर्वाणभारती। अत्र मानवजीवनेऽत्यन्तमुपयोगिनो व्यावहारिकज्ञानप्रदायका बहवो विषयाः प्राप्यन्ते।

---

27 वैक्रमाब्दस्य २०२४ तमे चैत्रमासस्य १–३ दिनाङ्के दाङजनपदान्तरगतविजौरीनामकग्रामे,
वैक्रमाब्दस्य २०५१ तमे कार्तिकमासस्य ९–११ दिनाङ्के काठमण्डपनगरे,
तथैव वैक्रमाब्दस्य २०७५ तमे चैत्रमासस्य ५–७ दिनाङ्के काष्ठमण्डपनगरे ।

वेदपुराण–महाभारत–रामायण–धर्मशास्त्र–नीतिशास्त्र–ज्यौतिषायुर्वेद–सङ्गीतशास्त्र–वास्तुशास्त्रादयो दर्शन–सम्बद्धाः शतशो ग्रन्थाः सन्ति। दैनन्दिनजीवनेऽवश्यं परिपालनीयस्य नैतिकता–सद्गुणादेः शिक्षणञ्च संस्कृतशिक्षाया अपरं वैशिष्ट्यम्।

यतो हि संस्कृतशिक्षा शान्तिसंस्थापनायाहर्निशमुद्घोषयति – ओम् द्यौः शाान्तिरन्तरिक्ष शान्तिः। पृथिवी शान्तिरापः शान्ति....... इति। तथैव वैदिकसाहित्ये निबद्धानि आत्मा खलु विश्वमूलम्, कृण्वन्तो विश्वमार्यम्, यत्र विश्वं भवत्येकनीडम्, वसुधैव कुटुम्बकम्, स्वदेशो भुवनत्रयम्, सर्वे भवन्तु सुखिनः इत्यादीन्यार्षवचांसि मानवसभ्यताया उत्कर्षं प्रकटयन्ति। एतादृश्या महनीयभावनया नेपालदेशोऽयं भारतराष्ट्रमिवाप्लावितं वर्तते।

**३. संस्कृतशिक्षायाः योगदानम्**

देशोन्नतये संस्कृतशिक्षायाः कियती भूमिका कीदृशञ्च योगदानमिति विषये विचारिते सति शिक्षाकलाकौशलवाणिज्यस्वास्थ्यादिक्षेत्रेषु संस्कृतशिक्षाया योगदानं न केनापि विस्मर्तुं शक्यते। विश्वस्याद्यं ऋग्वेदाख्यं ग्रन्थरत्नं संस्कृतभाषायामेव विरचितं वर्तते। विश्वस्यैकं विशालकायं महाभारतमपि संस्कृतशिक्षाया गौरवं समेधयति। विश्वसाहित्यवाङ्मये यानि शास्त्राणि दर्शनानि सन्ति तेषामुद्भवभूमिः संस्कृतविद्यैव। सा च सर्वेषां दर्शनानां शास्त्राणां समासां कलानाञ्च रत्नाकरूपा यतो विश्वस्य संस्कृतिसभ्यतादेरुदयः सञ्जातः। के न जानन्ति विज्ञानस्योद्भवभूमिरपि संस्कृतमासीत्। आधुनिकचिकित्सा (मेडिकल-साइन्स) विज्ञानस्य विकासोऽप्यायुर्वेदादजायत। संस्कृतवाङ्मयाद् विज्ञानस्य प्रादुर्भावः कथमभवत् इति जिज्ञासायामुच्यते यत्–

**घटिकावच्छिन्नकाले योजनाञ्च चतुश्शतम्।**
**विमानो वेगतो याति नात्र कार्या विचारणा।। इति।**

विचारयन्तु भवन्तोऽपीदानीं नैतिकशिक्षाया अभावेन युवानो युवतयो दिग्भ्रान्ताः सन्ति। पाश्चात्यसंस्कृतेः प्रभावेण अस्माकं समाजो विकृतिमापन्नः परिलक्ष्यते। अतः पूर्वं तु नैतिकचरित्रनिर्माणाय राष्ट्रोन्नतये चरित्रशिक्षाया नैतिकमर्यादायाश्चावश्यकता भवत्येव। संस्कृतं सर्वविधस्य ज्ञानविज्ञानादेर्मूलं विद्यते। इदं न केवलं पारस्परिकविचारविनिमयस्य माध्यमभूता सामान्यभाषा परन्तु वेदादिशास्त्राणां दर्शनानां धर्मशास्त्र–मीमांसा–स्मृति–पुराण–साहित्येतिहासादीनाञ्चाधाररूपेति सर्वविद्यानां प्रधानस्रोतोरूपाऽस्ति। यतश्चेदं संस्कृतं ज्ञानविज्ञानविद्यादिनिधानभूतं समृद्धं वाङ्मयं मन्यन्ते विद्वांसः।

**४. संस्कृतवाङ्मयस्य सनातनसाधनाभूमिर्नेपालः**

प्रारम्भिककाले वसिष्ठविश्वामित्रजैमिनिव्यासपराशरकौशिकादयो मुनयोऽस्मिन् प्रदेशे वेदमन्त्राणां साक्षात्कारं कृतवन्तः। वेदानां बहवो मन्त्राः वर्तमाननेपालस्य मिथिलाप्रदेशेन कौशिकीनद्याः गण्डकीनद्याः च क्षेत्रेण सह सम्बद्धाः सन्ति। दुग्धप्रभागण्डकीसमीपे जातो वेदव्यासो विशालं वैदिकसाहित्यं विविधशाखासु विस्तारितवान्। पुनश्च गुरुकुलव्यवस्थायाः माध्यमेन पैलः, वैशम्पायनः, जैमिनिः, सुमन्तुः इत्यादीन् शिष्यान् प्रशिक्षितवान्। अतो गुरुकुलशिक्षा नेपालस्य स्वकीया मौलिकशिक्षाव्यवस्थाऽस्ति या चिरकालादेतादृशी संस्कृतभाषा साहित्यञ्च संरक्षति। अस्माकं राष्ट्रं परोपकाररतानां व्यास-वाल्मीकि-पराशर-कौशिक-याज्ञवल्क्य-जैमिनिप्रभृतीनां महर्षीणामनुपमैर्योगदानैराप्लावितम्। बुद्ध-जनक-गुरुगोरक्षनाथसदृशानां समाजोन्नायकानामादर्शपुरुषाणां जनुषा गरिममयं महिममण्डितञ्च संवृत्तमस्ति।

व्यास-वाल्मीकि-पराशरादिमनीषिणां तपोभूमिरूपेण प्रतिष्ठिते नेपालराष्ट्रेऽनादिकालात् संस्कृतवाङ्मयस्य साधना प्रचारः प्रसारश्च सञ्जातः सम्प्रत्यपि जायमानो वर्तते। नगाधिराजपरिपालितेयं भूमिः, भगवतो बुद्धस्य जन्मभूमिः, भगवत्याः सीतायाः जन्मना परिपूता क्रीडास्थली, राजर्षिजनकस्य साधनाभूमिश्चेत्यादिभि विशेषणैर्भूषिता विश्वब्रह्माण्डे प्रसिद्धाऽस्ति। वैदिकसाहित्ये विश्वसमुदायस्यैकीकरणाय विकीर्णसमुदायानामेकत्रीकरणाय च सूत्ररूपेण मन्त्रेष्वादर्शप्रतिरूपाणि तत्त्वानि प्रदर्शितानि सन्ति। मानवसभ्यतायाः विकासः पौरस्त्यसभ्यतायाः एव जातः। उक्तञ्च–

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**[28] इति।

**५. संस्कृतविद्यायाः कालक्रमिकविकासस्य दिग्दर्शनम्**

संस्कृतविद्यायाः केन्द्ररूपेण भारतवर्षे नेपालभारतदेशौ महत्त्वपूर्णकेन्द्रभूतौ वर्तेते। हिमालयपालिताया अस्या धराया वैशिष्ट्यमेव संस्कृतविद्यया विद्योतितमस्तीति सर्वैरप्यस्माभिर्विदितचरमेतत्। संस्कृतविद्यया गुरुकुलपरम्परायाश्च महत्त्वप्रख्यापनपुरस्सरं नेपाले सम्प्रति जायमानस्य संस्कृतविद्याविकासस्य दिग्दर्शनविषये चाऽत्र प्रकाशनं

28 मनुस्मृतिः २।२०।

कर्तव्यमस्ति। अतश्चोभयदेशगतं संस्कृतविद्यावैशिष्ट्यं विहङ्गमदृशा निभाल्य संक्षेपेण प्रस्तूयते।

**५.१ वैदिककालः**

वेदोऽखिलो धर्ममूलम् इत्युक्तत्वादस्माकमार्यसंस्कृतेः मूलं वेदाः। वैदिकशिक्षा आन्तरिकप्रज्ञाशक्त्या च सम्बद्धा अस्ति, यस्य माध्यमेन मानवानाम् शारीरिक-मानसिक-बौद्धिकाध्यात्मिक-पक्षाणां सन्तुलित-विकासः सम्भवति। यतो हि प्रत्येकं राष्ट्रस्याभ्युदये वैदिकवाङ्मयमहर्निशं चिन्तयति, उद्घोषयति च- आब्राह्मन् ब्राह्मणो ब्रह्मवर्चसी **.......**। एवमेव राष्ट्रसंरक्षणतत्परान् जनान् यजुर्वेदोऽपि सततमित्थं प्रेरयति- वयं राष्ट्रे जागृयाम पुरोहिताः। पुनश्चावशिष्टेषु वेदेषूपनिषत्सु च पदे पदे राष्ट्रस्य राष्ट्रियतायाश्च चर्चा विहिता अस्ति। ब्राह्मणकालादुपनिषत्कालपर्यन्तमस्याः शिक्षायाः क्रमेण विकासो जातः। भिन्नभिन्नचिन्तनव्यवस्थाभिः सह वेदानां विभिन्नाः शाखाः चरणाः च विकसिताः।

**५.२ स्मृतिकालः / पौराणिककालः**

गुरुकुल-शिक्षा-व्यवस्थाया आधारेणाश्रमशिक्षा-व्यवस्था स्मृतिकालेऽत्यन्तं विकसिता दृश्यते। धार्मिक-शिक्षाया अपि च गैरधार्मिकविषयाणां शिक्षण-प्रशिक्षणस्य च मञ्चरूपेण गुरुकुलं विकसितमस्ति। रामायण-महाभारत-पुराणादेरध्ययनाज् ज्ञायते यद् राजपुत्रा अपि गुरुकुले स्थित्वाऽध्ययनं कुर्वन्ति स्म। सामान्यतया चतुर्दशविद्याः[29] चतुःषष्टिः कलाश्चाध्ययनस्य प्रधानविषया भवन्ति स्म। एवं प्रकारेण प्रारम्भिककालात् स्मृतिकालपर्यन्तं शिक्षाया उद्देश्यमीश्वरभक्तिः, धार्मिकभावना, चरित्रनिर्माणं, व्यक्तित्वविकासः, नागरिकसामाजिककर्तव्यानां पालनं, तथैव राष्ट्रियसंस्कृतेः संरक्षणं प्रसारणं चासीत्। एषाऽध्ययनाध्यापनपरम्परा पाणिनीकालपर्यन्तं प्रचलति। पाणिनीयकालानन्तरं बौद्धकाले शिक्षा संघाधीना जाता। तस्मिन् काले उच्चशिक्षायाः केन्द्राणि बौद्धमठाः, विहाराश्चासन्। अस्य कालस्य मुख्यशिक्षणसंस्था आसीत् नालन्दाविश्वविद्यालयविहारः देशे विदेशे च प्रसिद्धेश्वरमसीमायामासीत्। एषा संस्था त्रयोदश शताब्द्याः आरम्भे वख्तियार् खिलजी इत्यनेन सम्पूर्णतया विनाशितेति श्रूयते।

---

29 पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।। याज्ञवल्क्यस्मृतिः, १-१-३ ।

अस्मिन् समये नेपालदेशस्य बौद्धमठाः, मठाश्च उच्चशिक्षायाः प्रवर्धनार्थं महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म।

संस्कृतशिक्षायाः, शास्त्रीयविषयाध्ययनाध्यापनयोरेतिहासिकक्रमं प्रति दृष्टिप्रक्षेपण विहिते किरात–लिच्छवि–मल्ल–शाहकालादधुनापर्यन्तमविच्छिन्नपरम्परा संरक्षिता दरीदृश्यते। नेपालदेशे सम्प्रति जायमानस्य संस्कृतविद्याविकासस्य दिग्दर्शनविषये चाऽत्र संक्षेपेण किञ्चित् प्रस्तूयते।

**५.३ किरातकालः**

नेपाले संस्कृतविद्यायाः प्रचलनस्याध्ययनाध्यापनस्य चेतिहासं ज्ञातुं तत्सम्बद्धशैक्षणिकेतिहासस्यान्वेषणं कर्तव्यम्। किरातकाले सामान्यसंस्कृतपाठनातिरिक्तत्वेन शास्त्रीयविषया अपि पठिताः पाठिताश्चेति ज्ञायते। यतः, तस्मिन् काले मञ्जुश्रीः 'स्वस्तिवादविनयः', 'मञ्जुश्रीकल्पम्' च लिखितवान् आसीत्। श्रीशान्तिपादोः पूर्वमेव 'बोधिचार्यावतारः' नामक संस्कृतस्य प्रौढग्रन्थं प्रणीय शास्त्रीयविषयशिक्षायाः सूचनां दत्तवान्। यतः, शास्त्रीयविषयाणामध्ययनं विनैतादृशानां प्रौढग्रन्थानां लेखनं न सम्भवति।

**५.४ लिच्छविकालः**

संस्कृतभाषायाः संरक्षणस्य विकासस्य च दृष्ट्या लिच्छविकालः स्वर्णयुगं मन्यते। यतो हि तदानीं राजकीयकार्याण्यपि संस्कृतभाषामाध्यमेनैव निर्वाह्यन्ते स्म। अस्मिन् काले कालिदास–भारविप्रभृतयो भारतीया महाकवयो नैपालीयाः संस्कृतकवयश्च पूर्वमेव साहित्यिककाव्यानि विरचितवन्त आसन्। एतस्मिन् समये भिक्षुः प्रभाकरपादो 'बोधिचर्यावतारस्य भाष्यं' लिखितवान्। मञ्जुघोषः 'मञ्जुश्रीज्ञानतन्त्रम्', मानदेवः 'नारायणस्तुतिः', अंशुवर्मा 'व्याकरणकौस्तुभम्' इत्यादीनि पुस्तकानि लिखित्वा तस्मिन् समये अपि संस्कृतस्य शास्त्रीयविषयाणां शिक्षणविषये सूचनां दत्तवन्तः। प्रौढदार्शनिकग्रन्थानामध्ययनं विना जनानां विषयबोधे प्रौढता नागच्छति, लेखनं चासम्भवम्। एतेन पारम्परिका विद्यालयाः गुरुकुलानि च तस्मिन् समये सुचारुरूपेण प्राचलन्निति तथ्यं प्रकाशमायाति।

सूर्यवंश्येन विशालेन[30] निर्मितायां वैशाल्यां लिच्छवीनां गणराज्यस्य चर्चा प्राचीनवाङ्मयेषु लभ्यते। स्कन्दपुराणस्य हिमवत्खण्डे[31] पशुपतिपुराणे[32] गोपालवंशावल्यां[33] च सूर्यकुलोद्भवानां लिच्छवीनां वैशालीं विहाय नेपालमागत्य किरातशासननिराकरणपूर्वकं लिच्छविशासनप्रवत्र्तनस्य सङ्केता लभ्यन्ते। अभिलेखेषु प्रयुक्ताः किरातभाषासम्बद्धाः कतिपये शब्दाश्च तदेव साधयन्ति। नेपालस्येतिहासे किरातशासनकालो नाम नेपालस्य प्राच्येतिहासस्य द्वारायितः कालः। महाभारतानुसारेण[34] मिथिलोपरिस्थभूभागे सप्त किरातराज्यानि प्रचलितानीति ज्ञायते। कौटिल्यस्यार्थशास्त्रे[35] निरूपितानि नेपालसम्बद्धानि कम्बलादिवस्तूनि सम्भवतः किरातकालिकानीति कथयितुं शक्यते। वैदेशिका नैपालकाश्चैतिहासिकाः समयनिर्धारणविधौ मिथो विभेदवादिनोऽपि किरातकाले लिच्छवीनां नेपालागमनं साधयन्ति निजनिजेषु ग्रन्थविशेषेष्वैकमत्येन। भगवानलाल–इन्द्राजीव्यूह–हितनारायणझा–प्रभृतयो भारतस्य मागधमहीपतेश्चन्द्रगुप्तप्रथमस्य समयेऽपहृतराज्याः

---

30 सूर्याद् ब्रह्मप्रपौत्रान् मनुरथ भगवान् जन्म लेभे ततोऽभूद् इक्ष्वाकुश्चक्रवर्ती नृपतिरपि ततः श्रीविकुक्षिर्बभूव ।

जातस्तस्माद् ककुत्स्थः पृथुरिति विदितो भूमिपः सार्वभौमो

भूतोऽस्माद् विश्वगश्वः प्रबलनिजबलव्याप्तविश्वान्तरालः ।।

झा, डा. हितनारायणः, द लिच्छविज, चौखम्बा संस्कृत सिरीज अफिस वाराणसी १,

प्रथमसंस्करण, ईं १९७०, पृ. ८ ।

31 निर्जित्यासौ किरातान् वै तत्र राज्यं करिष्यति । विशालनगरीं कृत्वा तपोबलात् सुधार्मिकः ।।

वैशाल्यधिपतिस्तस्माद् भविष्यति नृपोत्तमः । पाशुपतीं पुरीं प्रेक्ष्य तत्र हेतुं करिष्यति ।

आराध्य पशुपेशानं निर्जित्य सकलान् सुरान् । पाशुपत्यां ततः पुर्यां सुराज्यं स करिष्यति ।।

हिमवत्खण्डे, १६२।५५–५७।

32 जित्वा कैरातराजानां वाक्येन प्रत्ययेन च । करिष्यति तदा राज्यं वैशाल्यधिपतिर्बली ।। पशुपतिपुराणे, १७।६।।

33 ततः सूर्यवंशप्रभावाद् नेपाले किरातराजान् निर्जित्य लिच्छविवंशः प्रवर्तते ।

गोपालवंशावली, नेपालः, ज्ञानमणिः, नेपालनिरुक्त, रा.प्र.प्र. काठमाडौं, पृ. २७ ।

34 भागीरथ्या उत्तरस्यां दक्षिणस्यां हिमालयात् । गण्डकीकौशिक्योर्मध्ये प्राक्प्रत्यङ् मिथिला स्मृता ।। (महाभारते, सभापर्वणि ३०।१५)

35 अष्टप्लोतिसङ्घात्या कृष्णा भिङ्गिसी वर्षवारणमपसारक इति नैपालकम् । (कौ.अ.२ अधिं १ अ.२८ प्रकरणे)

सुपुष्पप्रमुखा लिच्छवयो नेपालं प्रापुरिति तथ्यं प्रकाशयन्ति। नेपालराष्ट्रस्याभिलेखानामनेकेषामन्वेषकेषु भारतीयो विद्वान् भगवान्लालचन्द्रः, ब्रिटिशनागरिकः सेलिसः, फ्रेञ्चनागरिकः सिलवनः, नेपालदेशीयाः बाबुरामाचार्यः, योगीनरहरिनाथः, नयराजपन्तश्चैते विद्वांसः प्रसिद्धाः सन्ति। विद्वद्भिरेतैरन्विष्य सङ्गृहीता अभिलेखा नेपालदेशस्यैतिहासिकं रहस्यं काव्यशास्त्रीयं महत्त्वञ्च प्रकटयन्तीति वेणीमाधवढकालमहाभागो लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनमिति नामके शोधमूलकग्रन्थे[36] प्रकाशयति।

**५.५ मल्लकालः**

संस्कृतसाहित्यस्य संरक्षणस्य विकासस्य च दृष्ट्या मल्लकालोऽपि सुदृढतरो विलोक्यते। अस्मिन् कालखण्डे संस्कृतस्य स्थितिरधिकं दृढा व्यावहारिकी च दृश्यते। तेषु राज्ञो नान्यदेवस्य 'सरस्वतीहृदयालङ्कारः', धर्मवल्लभस्य 'देवीमाहात्म्यम्', अभयमल्लस्य 'विष्णुधर्मः', 'पञ्चरक्षा' (तन्त्रम्), जयस्थितिमल्लस्य 'मानवन्यायशास्त्रम्', 'गुह्यसिद्धिशास्त्रम्', 'रामायणनाटकम्' च समायान्ति। जगज्ज्योतिर्मल्लस्य 'नरपतिजयचर्याटीका' तथा 'शिवस्वरोदयटीका', तदतिरिक्ता अन्ये मौलिक-टीकाग्रन्थाश्च शास्त्रीयविषयाध्ययनस्य परम्परां प्रकाशयन्ति। जगत्प्रकाशमल्लस्य 'पद्यसमुच्चयः', 'मदनचरितनाटकम्' इत्यादीन्यपि तत्रानुबद्धाः सन्ति।

**५.६ शाहकालः**

अस्य कालस्य राजानो विद्वांसश्च संस्कृतस्योपयोगे, संरक्षणे, समृद्धये च महतीं भूमिकां निर्व्यूढवन्तः। तथैव संस्कृते ग्रन्थविरचनद्वारा संस्कृतसाहित्यस्य भाण्डागारमपि ते पूरितवन्तः। अस्मिन् कालखण्डे वंशमणि-काशिनाथ-सुकृतिदत्तपन्त-शक्तिल्लभप्रभृतयो महाकाव्यकारा विद्वांसः सुप्रसिद्धा आसन्। तथैव तत्कालीनो राजा द्रव्यशाहः 'चमत्कारसारमञ्जरीं' 'चमत्कारयोगरहस्य'ञ्च लिखितवान्। पृथ्वीनारायणशाहो 'वृत्तरत्नमालाम्', प्रतापसिंहशाहः 'पुरश्चर्यार्णवम्' रणबहादुरशाहो 'भैरविस्तुतिम्' चेति विरचितवन्तः। एतानि सर्वाणि विशष्टिग्रन्थप्रणयनात्मकानि कार्याणि तदापि शास्त्रीय-दार्शनिकविषयाः पाठ्यन्ते इति तथ्यं प्रमाणयन्ति।

**५.७ आधुनिककालः**

---

36 वेणीमाधवढकालः, लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनम्, विद्यावारिधिस्तरीयशोधप्रबन्धः, नेसंवि. २०५० ।

नेपाले राणाशासनस्यारम्भपर्यन्तं केवलं गृहे गृहे, गोष्ठे गोष्ठे, मन्दिरे मन्दिरे, न्यूनसंख्यायां च गुरुकुलेषु एव शिक्षा प्रदत्ता आसीत्। ततः बालगुरुषडानन्दः (१८९२–१९७३) स्वर्गद्वारीमहाप्रभू (१९१६–१९९७) महाभागेन गुरुकुलं स्थापयित्वा संस्कृतविद्याविकासे, संरक्षणे, समृद्धये च महतीं भूमिकां निर्व्यूढवन्तः। १९०६ तमे वैक्रमाब्दे प्रधानमन्त्रिजङ्गबहादुरराणामहाभागेन स्वस्य शासनस्य चतुर्थवर्षे ब्रिटेनदेशस्य भ्रमणात् प्रत्यागत्य १९१० तमे वर्षे थापाथलीप्रासादस्याधस्तले आङ्ग्लविद्यालयस्य स्थापना कृता। तस्य नाम दरबारहाईस्कुल इति अभवत्। वैक्रमाब्दस्य १९३२ तमे वर्षे नारायणहिट्यां संस्कृतविद्यालयस्य स्थापना अपि अभवत्। वर्तमानं रानीपोखरीस्थितं दरबारविद्यालयभवनं १९४८ तमे वर्षे निर्मितम्।

तत्रैव उपर्युक्तयोर्द्वयोर्विद्यालयोः समावेशनं विहितम्। तस्मिन् काले राणाप्रधानमन्त्रिणा धीरशमशेरेण संस्कृताय विलक्षणं कार्यं कृतम्। सः चतुःपञ्चाशच्छात्राणां नित्यभोजनस्य परिधानवस्त्राणां निवासस्थानस्य च व्यवस्थापनं कृतवान्। तदनन्तरं तस्य पुत्रेण वीरशम्शेरेण च पुनः चतुःपञ्चाशच्छात्राणामतिरिक्तानां संयोजनेन भोजनावासादेश्च व्यवस्था विहिता। २००४ तमे वर्षे 'जयतुसंस्कृतम्' इति नामकस्यान्दोलनस्य कारणात् काष्ठमण्डपे एव शैक्षिकस्तरस्य परीक्षा प्रारब्धा। ततः पूर्वं भारतस्य शैक्षिकसंस्थातः परीक्षाप्रणाली सञ्चालिता दृश्यते।

गुरुकुलशिक्षायाः क्षेत्रं बहु विस्तृतं विषयाणां व्यापकतापि सुविस्तृततरास्ति। कालपरिवर्तनेन सह अनेकानि आरोहावरोहाणि व्यतीतानि। एषा गुरुकुल-शिक्षा नेपाल-सर्वकारेण पारम्परिक-शिक्षा-व्यवस्थारूपेण स्वीकृता। अन्य-धर्म-सम्प्रदायानामिव धार्मिक-शिक्षारूपेण संरक्षणाय आरब्धा अस्ति। तत्सङ्गमे गुरुकुलस्यानुमोदनं पाठ्यक्रम-पाठ्यपुस्तक-शिक्षकप्रबन्ध-सम्बद्धं सर्वमपि कार्यजातं सम्पादयितुं शिक्षामन्त्रालयस्याधीने गुरुकुल-आश्रम-प्रबन्धन-परिषत् सुघटिताऽस्ति। अस्माद् वर्षाच्चानुदानसमर्थनं धार्मिकप्रकृतीनां विद्यालयानां कृते मार्गदर्शिका पुस्तिका चानुमोदिताऽस्ति।

एवं प्रकारेण गुरुकुलशिक्षाया रक्षणाय प्रचारार्थं च सर्वकारीयाः संस्था निर्मिता इति प्रशंसनीयं कार्यम्। परन्तु निर्मितनिदर्शिकानुसारेण विचारिते सति ज्ञायते यत् संस्कृतशिक्षायां विद्यमानस्य विपुलज्ञानसञ्चयस्य संरक्षणार्थमन्यधर्मसम्प्रदायानां कृते यथा वित्तादिव्यवस्था निर्दिष्टा तथा नात्र विहिता। यतः कालः परिवर्तमानोऽस्ति। अधुना शाश्वतनित्यधर्मस्य सारं विस्मृत्य धर्मसम्प्रदायरूपेणैव ग्रहणे प्रवृत्तिर्वृद्धिं प्राप्तास्ति। धर्मेऽपि

विविधता कल्पिता। एतादृश्यां विडम्बनात्मिकायां परिस्थितौ सर्वकारेण गुरुकुलशिक्षां धार्मिकशिक्षाया अधीनं कृत्वान्यसम्प्रदायानामिव समुदायशिक्षारूपेण स्वीकृता। एवं कृत्वा सर्वसम्मान्यं व्यापकं च संस्कृतशिक्षायाः महत्त्वमाच्छादितम्। अतो गुरुकुलशिक्षाया अन्तर्गतं सर्वकारेण रक्षितायाः संस्कृतशिक्षायाः प्रवर्धनार्थं पृथग्रूपेण राष्ट्रियस्तरे प्रादेशिकस्तरे च विशेषनीतिः विनिर्मेया।

वैक्रमाब्दस्य २०१६ तमे वर्षे नेपाले त्रिभुवनविश्वविद्यालयस्य स्थापनायाः पश्चात् तत्र संस्कृतविषयस्य पठनपाठनं प्रारब्धम्। त्रिभुवनविश्वविद्यालयस्य संस्कृताध्ययनसंस्थानस्य पाठ्यक्रमेण, छात्रैः, शिक्षकैः, कर्मचारिभिश्च सह महेन्द्रसंस्कृतविश्वविद्यालयस्य विधानं स्वीकृतम्। पश्चात् २०४३ तमे वर्षे दाङमण्डलान्तरर्गतवेलझुण्डीस्थाने नेपालस्य द्वितीयविश्वविद्यालयत्वेन महेन्द्रसंस्कृतविश्वविद्यालयः स्थापितः। सम्प्रति अयं विश्वविद्यालयः नेपालसंस्कृतविश्वविद्यालयः इति नाम्ना प्रसिद्धोऽस्ति। अस्य विश्वविद्यालयस्य चतुर्दश आङ्गिकविद्यापीठानि, सप्त सम्बन्धनप्राप्तविद्यापीठानि च सञ्चालितानि सन्ति।

तेषु एकोनविंशतिशास्त्रीयविषयाणाम् आधुनिकविषयाणाञ्च सम्यगध्ययनमध्यापनञ्च भवति। तथैव आयुर्वेद–शिक्षाशास्त्र–योगप्राकृतिकचिकित्सा–संस्कृतभाषाप्रशिक्षण–कर्मकाण्डप्रशिक्षण–स्थापत्यशास्त्रादि सोपाधिका–निरुपाधिकाश्च शैक्षणिककार्यक्रमाः सुसञ्चालिताः वरीवृत्यन्ते। नेपालसंस्कृतविश्वविद्यालयः पौरस्त्यसंस्कृतेः, सभ्यतायाः, प्राचीनऋषीणाञ्च महोत्सर्गस्य, तपस्यायाश्च संरक्षणाय, संवर्धनाय, विकासाय च समर्पितोऽस्ति।

नेपाले संस्कृतशिक्षां उच्चतमस्तरं यावत् सुव्यवस्थितां कर्तुं, विभिन्नक्षेत्रेषु संस्कृतशिक्षणस्याध्ययनं, अनुसन्धानं, संरक्षणं, प्रचारः प्रसारश्च विश्वविद्यालयस्य प्रमुखं ध्येयं वर्तते। वर्तमानसमये नेपालस्य विविधक्षेत्रेषु द्विशताधिकानि गुरुकुलानि सञ्चालितानि विद्यन्ते। तेषु देवघट्टस्थानि महेशसंस्कृतगुरुकुल–परमानन्दसंस्कृतगुरुकुल–वेदवेदाङ्गसंस्कृतगुरुकुलानि प्रमुखानि सन्ति। तथैव पाशुपतक्षेत्रे नेपालवेदविद्याश्रमोऽपि संस्कृतशिक्षाया विकासाय सञ्चालितो वर्तते। देवघट्टस्थ सीतारामसंस्कृतमाध्यमिकविद्यालयसदृशाः साधारणसंस्कृतविद्यालया अपि सुसञ्चालिता दरीदृश्यन्ते।

त्रिभुवनविश्वविद्यालयेऽपि संस्कृतशिक्षणविभागमाध्यमेनोच्चशिक्षा सञ्चालिता अस्ति। तत्रैव योगशिक्षाया कक्षाऽपि सञ्चालिता विद्यते। तथैव

काष्ठमण्डपविश्वविद्यालयेऽपि संस्कृतशिक्षाया पठनपाठनं सञ्चालितं वर्तते। आधुनिकनिजिविद्यालयेष्वपि संस्कृतभाषाशिक्षणकार्यं सुरुचिपूर्वकं सञ्चालितं दृश्यते। अयं महतो मोदस्य विषयोऽस्ति।

**६. अस्माकं जीवनस्याधारः संस्कृतम्**

विश्वप्रसिद्धाः उदारहृदयप्रपूरिता अस्माकं संस्कृतिः अस्मान् सकरुणं विलोकयति। अस्माकं साहित्यकलाइतिहासधर्मादयस्तु मनोयोगेन परिशील्यन्ते जीवनपद्धतौ नात्मसात क्रियन्ते। मानवेषु न मानवत्वम्, बन्धुषु न बन्धुत्वम्, मित्रेषु न मित्रत्वम्, शासकेषु न शासनक्षमत्वम्, राष्ट्रसञ्चालकेषु न राष्ट्रानुरागः, सर्वेषु क्षेत्रेषु निराशा एव गोचरीभवति। अस्यां विषमायां प्रतिकूलायामवस्थायां राष्ट्रसंरक्षणविधौ संस्कृतशिक्षां विना न काचन गतिरवलोक्यते। अतोऽस्माकं जीवनस्याधारभूतं संस्कृतमेवास्ति। अतः संस्कृतं विना अस्माकं राष्ट्रं निराधारम्। अतः वक्तुं शक्यते यत् –

**शिक्षेयं रक्षिका तत्र सभ्यतायाः निरन्तरम्।**
**तस्मात् प्राचीनकालाद्धि शिक्षेयं सुप्रतिष्ठिता।।**

साँस्कृतिकक्षेत्रेऽपि संस्कृतशिक्षाया अतुलनीयं महत्त्वं दरीदृश्यते। नेपाले वैदिककालादेव सनातनधर्मसंस्कृतिः प्रचलिताऽस्ति। अस्मदीया परम्परा वेदविहिता जन्मतो आरभ्य मृत्युपर्यन्तं यानि यानि कर्माणि सम्पाद्यन्ते तानि सर्वाणि धर्मशास्त्रणामाधारेणैव विधीयन्ते। श्रुतिस्मृतिपुराणादयस्तु संस्कृतभाषायामेव गुम्फिताः सन्ति। संस्कृतम् संस्कृतेर्मूलम् इति कथनेन ज्ञायते यत् संस्कृतस्याभावे संस्कृतिर्नष्टा भविष्यति। संस्कृतिर्नोचेत् समाजोऽपि नामशेषो जायते। यदि समाज एव न स्यात् तर्हि राष्ट्रस्य का कल्पना, जीवनस्य किम् अस्तित्वम्। संस्कृतविद्याया महत्त्वप्रकाशकैः सुधीभिरुक्तम्–

**अनादिनिधना नित्या वागुत्सृष्टा स्वम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।** [37]

संस्कृतशिक्षाया विश्वव्यापियोगदानविषय इतिहासवेत्तारो नेतारः समाजसेवकाश्च कतिपये जानन्ति। इयं भाषा अतीव समृद्धा विस्तृता चास्ति। पाश्चात्यवैज्ञानिकैरपि स्तूयते यत्– **The greatest language (Sanskrit) in the world the most wonderful and tha most perfect.**

---

37 महाभारतशान्तिपर्व.... ।

**७. गुरुकुलपरम्पराया संक्षिप्तमवलोकनम्**

गुरुकुलशिक्षाया आरम्भोऽस्माकं नेपाले एव विद्येश्वरभगवतः शिवात् पर्वतनन्दिनी पार्वतीं प्रति शास्त्रीयज्ञानं प्रदातुं समारब्धमित्यनुमीयते। नेपाले प्राचीनकालात् गुरुकुलशिक्षायाः परम्परा अतीव सुदीर्घा अस्ति, या आधुनिक-इतिहासकाराणाम् दृष्ट्या अपि दशसहस्राणि वर्षपूर्वम् इति वक्तुं शक्यते। वैदिक-पौराणिक-कथानामाधारेण हिमावत्खण्डनेपाल-देशे निवसन्तः बहवः ऋषयः स्वपूर्ववर्तिभ्यः अस्याः गुरुकुलपरम्परायाः आदर्शशिक्षां प्राप्नुवन्ति स्म, ते च एतस्याः शिक्षणपरम्परायाः अनुसरणं कुर्वन्ति स्म।

पाणिनीयव्याकरणानुसारेण निगरणार्थक गृ धातोः कृग्रोरुच्च इति औणादिसूत्रेण उप्रत्यये कृते गुरुशब्दो निष्पद्यते। गु इति अन्धकारं रु इति तन्निवारकतया प्रकाशरूपतां द्योतयति। अतः अविद्यारूपं तमोहरणं ज्ञानरूपं प्रकाशं वा प्रदातुं समर्थो पण्डितविशेषो गुरुः। उक्तञ्च–

**संस्कृतैः प्राकृतैर्वाक्यैर्यः स्वशिष्यानुरूपतः।।**

**देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः।।**

अर्थात् शिष्यस्य सामर्थ्यं यथाधिकारं देश-काल-स्थिति-अनुसारं यः संस्कृते प्राकृते वा आवश्यकशिक्षां व्यवस्थापयति सः गुरुः। तथैव मनुस्मृत्याम् –

**निषेकादीनि कर्माणि यः करोति यथाविधि।**

**सम्भावयति चान्नेन स विप्रो गुरुरुच्यते।।**[38]

यद्यपि अमरकोशकारः कथयति 'निषेकादिकृद्गुरुः'[39] इति गर्भाधानसीमन्तोन्नयनादिसंस्कारकर्ता पिता एव गुरुः। याज्ञवल्क्यस्मृत्याम्- स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति [40] संस्कारसहितवेदाध्यापनकर्ता गुरुः स्यादिति स्मरणीयोऽस्ति।

समूहार्थकात् कुल्धातोः 'इगुपधज्ञाप्रीकिरः कः' इति सूत्रेण कप्रत्यये कुलशब्दस्य निष्पत्तिः। अस्य च गुरुशब्देन सह समासे विहिते गुरुकुलम् इति सिद्ध्यति। कुलशब्दस्य समूहः परम्परा वेत्यर्थः। गुरुपरम्परैव गुरुकुलमुच्यते। सम्प्रति गुरुकुलशब्दः

---

38 मनुस्मृतिः २।१४२ ।

39 अमरसिंहः, अमरकोशः २।७।७ ।।

40 याज्ञवल्क्यस्मृतिः १।३४ ।।

शिक्षाव्यवस्थायाः सह सम्बद्धोऽस्ति। गुरुकुलशिक्षा योग्याचायद्वारा प्रदीयते। जीवने आवश्यकानां लौकिकानां पारमार्थिकानाञ्चोपलब्धीनां बोधाय जीवनजगतोः समग्रपक्षाणां ज्ञानाय च निर्मिता प्राचीनव्यवस्थाऽस्ति।

प्राचीनकाले एको गुरुर्दशसहस्राणि छात्रान्[41] आवासस्य, भोजनस्य च व्यवस्थां कृत्वा पाठयति स्म। एतादृशो गुरुः कुलपतिरित्युच्यते। गुरुकुलतोऽध्ययनं कुर्वन्तः शिष्या आजीवनं स्वनाम्नि गुरुनाम योजयित्वा स्वस्य परिचयं ददति स्म। केषुचित् प्रसङ्गेषु कुलपरम्परा एव गुरुपरम्पराश्रिता इति प्रकाशितं दृश्यते। शास्त्रीयपरम्परानुसारं प्राचीनकाले छात्रैः गुरोराश्रमं गत्वा गुरुसेवया सह ज्ञानं प्राप्तव्यमिति नियमः। एवं प्रकारेण गुरुतः शिक्षां प्राप्तुं गुरुकुलस्य कठोरनियमानामनुसरणं कर्तव्यम्। जीवनस्य प्रत्येकं क्षणं गुरुसन्निधौ व्यतीत्य नित्यं गुरुसेवा, अग्निपूजा, गोसेवा, भिक्षाटनम्, गुरुनिर्देशेन प्राकृतिकवातावरणे जीवनयापनञ्च गुरुकुलस्य दिनचर्या भवति। छात्राः साधनरूपं जीवनं यापयन्त एकाग्रतापूर्वकं साधनायां स्थित्वा स्वकीयामन्तर्निहितशक्तिं विकासयितुं प्रभवन्ति स्म। साधनया रहस्यपूर्णाः शिक्षाः स्वतःस्फूर्ततां समायान्ति स्म। श्रीमद्भागवतमहापुराणे च —

**तयोद्र्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः।**
**प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः।।**
**सरहस्यं धनुर्वेदं धर्मान् न्यायपथांस्तथा।**
**तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम्।।**[42]

शैवतन्त्रे निर्दिष्टचतुष्षष्टिकलानां शिक्षणं गुरुकुले भवत्येव। श्रीमद्भागवतमहापुराणे—

**अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः।**
**गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप।।**[43]

एवं साधनारूपं जीवनं यापयन् एकाग्रतापूर्वकं मानवमस्तिष्कस्यान्तर्निहितशक्तिः विकसिता स्यात्, रहस्यपूर्णाः शिक्षाः स्वयमेव प्रवर्तन्ते स्मेति गुरुकुलशिक्षायाः महत्त्वं

41 मुनीनां दशसाहस्रं योद्न्नदानादिमोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ।।

42 श्रीमद्भागवतमहापुराणम्, १०।४५।३३-३४ ।

43 श्रीमद्भागवतमहापुराणम्, १०।४५।३६ ।

सन्दर्भात् स्पष्टं भवति यत् भगवान् श्रीरामो वशिष्ठाश्रमे गुरुकुलशिक्षायाः माध्यमेन दिव्यज्ञानं प्राप्तवान्। तथा च भगवान् श्रीकृष्णोऽपि सान्दीपनिगुरुकुलं गत्वाधीतवान्।

वैदिक-पौराणिक-कथानामाधारेण हिमवत्खण्डनेपालदेशे निवसन्तो बहवो ऋषयः स्वपूर्ववर्तिभ्यो गुरुकुलपरम्पराया आदर्शशिक्षां प्राप्य वैदिकलौकिकसंस्कृतविद्यापरम्परायाः प्रसारं कृतवन्तः। तदतिरिक्तं अणिमा, महिमा गरिमा, लघिमा इत्यादयोऽष्टसिद्धयः सन्ति या अस्माकं पूर्वजाः आध्यात्मिक-अभ्यासेन प्राप्तवन्तः। एतेषां सर्वेषां ज्ञानप्रवाहस्य मुख्यं स्रोतो गुरुकुलशिक्षैवासीत्। यद्यपि सम्प्रति प्रयुक्तासु गुरुकुलशिक्षाव्यवस्थासु छात्राणां संख्या न्यूना अस्ति तथापि भोजनावासादिसहितमध्ययनव्यवस्था सुसञ्चालिताऽस्ति।

**उपसंहारः**

प्रस्तुतेऽस्मिन् संक्षिप्ते विचारपत्रे नेपालभारतयोः विद्यापरम्पराया दिग्मात्रं प्रकाशितम्। नेपालभारतविद्यापरम्परासम्बद्धस्य विषयस्य व्यापकतां जानन्त्येव भवन्तो विद्वांसः। विषयेऽस्मिन् सूक्ष्मतया विवेचनेऽन्येऽपि महत्त्वाधायकाः पक्षा अनुसन्धातुर्दृग्गोचरतामधिरोहन्तीति बृहतोऽनुसन्धानस्यावश्यकता जागर्ति। तदर्थञ्च केनाऽप्यनुसन्धात्रा साध्यवसायं यत्नो विधातव्यः। तन्निमित्तं बहुवित्तस्य बौद्धिकश्रमस्य, महतः समयस्य च व्यय आवश्यक इति तत्र उभाभ्यामेव देशाभ्यां वित्तीयावसरप्रदानपूर्वकमध्येतारः सम्प्रेरणीयाः। यदत्र पत्रे विवेचितं तेन सुदूरप्राचीनकालादद्यावधि परस्परं श्रेयोऽभिवृद्ध्या साकमुभयतः संस्कृतविद्याविकासाय सम्यग्योगदानप्रापितमिति भविष्यति च काले तथैव परस्परं मिलित्वैव संस्कृतविद्यायाः संरक्षणे विकासे चास्माभिः कार्यं सन्ततं सञ्चालनीयमिति न विस्मरणीयम्। विशेषतः खगोलीय-ग्रहतारादीनां स्थितिगतिविषये योग-ध्यानायुर्वेद-प्राकृतचिकित्सा-वास्तु-भाषाविज्ञानादिक्षेत्रेषु च संस्कृतवाङ्मये किं निबद्धमिति विषये साम्प्रतिकशताब्द्यां विश्वजगत्सकौतुकं तदध्ययनार्थं सप्रश्रयं प्रवर्तमानमस्तीति तत्राऽप्यस्माभिः सम्भूय कथं विशिष्टं योगदानं प्रापयितुं शक्यत इत्यत्राऽपि यत्नो विधेय एव। उभाभ्यामपि देशाभ्यां सौहार्दपूर्णसम्बन्धं पारस्परिकमभिलक्ष्य तत्र प्रधानसंयोजकतत्त्वरूपेण संस्कृतविद्या स्वीकरणीया, तत्राऽपि भारते संस्कृतविद्या बहूनां विश्वविद्यालयानां महाविद्यालयानां गुरुकुलानां मठानां विद्यापीठानामाश्रमाणाञ्च सञ्चालनेनाऽधिकतरं विविधविषयव्यापिनी सुविस्तृततरा च सम्पन्नाऽस्तीति तदनुरूपेण नेपालेऽपि संस्कृतविद्याया विकासाय भारतीयैर्विद्वद्भिः ससौहार्दं ससद्भावञ्च भ्रातृत्वमभिभावकत्वञ्च निर्वहणीयमिति नेपालस्य

पक्षतोऽपेक्षते। तादृश्यामवस्थायामेव वयं संस्कृतविद्यामाध्यमेन साम्प्रतिकस्य आधुनिकविज्ञानप्रदत्तसमुन्नतप्रविधेः प्रयोगार्थं समग्रस्य विश्वस्य कृते महनीयं योगदानं प्रापयितुं समर्थाः स्याम इति निष्कृष्यते।

ओम् शान्तिः।

**सन्दर्भसूची**


आचार्यः शिवराज कौण्डिन्न्यायनः, पाणिनीयशिक्षा, वाराणसी : चौखम्बा विद्याभवन, २००४।

ऋग्वेदसंहिता, श्रीपादशर्मा, (सम्पा.), औन्ध्रनगर : स्वाध्यायमण्डलः, १९४०।

चतुर्वेदी, श्रीरामाधीनः, संस्कृतभाषाविज्ञानम्, वाराणसी : चौखम्बा विद्याभवन २००५।

झा, डा. हितनारायणः, द लिच्छविज, चौखम्बा संस्कृत सिरीज अफिस वाराणसी १, प्रथमसंस्करण, ई १९७०।

दीक्षित, भट्टोजि, सिद्धान्तकौमुदी, बालमनोरमा टीका, भाग १, सम्पादक गोपालदत्त पाण्डेय, वाराणसी : चौखम्वा सुरभारती प्रकाशन, चतुर्थ संस्करण १९९९।

ढकालः, वेणीमाधवः, लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनम्, विद्यावारिधिस्तरीयशोधप्रबन्धः, नेपाल-संस्कृत-विश्वविद्यालयः, वि.सं. २०५०।

नेपालः, ज्ञानमणिः, नेपालनिरुक्त, गोपालवंशावली, राजकीय प्रज्ञा प्रतिष्ठान् काठमाडौं।

पतञ्जलिः, व्याकरणमहाभाष्यम्, नवाह्निक, सम्पादक, मधुसुदन प्रसाद मिश्र, वाराणसी : चौखम्वा विद्या भवन, पुनर्मुद्रित संस्करण २००३।

पाणिनिः, अष्टाध्यायी, सरलव्याख्याटीकालङ्कृत्य, गुरुप्रसाद शास्त्री, वाराणसी : भार्गव पुस्तकालय।

भतृहरिः, वाक्यपदीयम्, (ब्रह्मकाण्डम्) सूर्यनारायण शुक्ल (व्याख्याकारः), वाराणसी : चौखम्बा संस्कृत संस्थान, १९७५ ई।।

भागवतपुराणम्, श्रीमद्भागवतमहापुराणम् गोरखपुर : गीताप्रेस, २०७०।

याज्ञवल्क्यः, याज्ञवल्क्यस्मृतिः, वाराणसी : चौखम्बा संस्कृत संस्थान, २०४७।

यास्कः, निरुक्तम्, (प्रथमोभागः), श्रीसत्यव्रतसामश्रमिभट्टाचार्यः (सम्पा.), कलकत्ता : एशियन सोसाइटि अफ बङ्गाल, सन् १८८२।






आयोजका:
नीति-अनुसन्धान-प्रतिष्ठानम्, नेपालः (नेनाप)





# अथर्ववेदस्य विषयवैविध्यम्

**रूपक अधिकारी**

उपप्राध्यापकः, नेपाल संस्कृत विश्वविद्यालयः

वाल्मीकिविद्यापीठम्, काष्ठमण्डपः

**विषयपरिचयः**

ऋग्यजुस्सामाथर्वनामधेयाश्चत्वारो वेदाः सन्ति। ते वेदाः पूर्वीयार्यधर्मसंस्कृतिसदाचारजीवनयापनादीनां स्कम्भरूपेण अस्माभिः सम्पूजिताः सन्ति। प्रचीनानां जनानां चिन्तनजीवनशैलीनां बहूनि रूपाणि वेदेषु हि सम्यक् रूपेण दृश्यन्ते। विद्याविवेकविचाराः कृषिवाणिज्यादीनां मानवानां मानवीयमूल्यानां परिचयाः राजनीतिकसामाजिकव्यवस्थानां स्वरूपाणि चिन्तनधाराः इन्द्रवरुणसोमादीनां देवानां बहूनि रूपाणि, रागोणां परिचयाः, तेषां निदानधियः, नामकरणविवाहादीनां संस्काराणां पद्धतयः अग्निहोत्राग्निष्टोमादीनां श्रौतयागानां विधिप्रयोगाः, पूर्वजन्मपरजन्मस्वर्गनर्कपापधर्मादीनामनेकाः धारणाः, विविधशान्तिकपौष्टिकाभिचारिकादीनाम् अनुष्ठानानां विधयः, प्राकृतिकभौगोलिकविषयाणामनेकानि सङ्केतचिह्नानि च वेदैरेवावगम्यन्ते। वेदेषु अस्माकं प्राक्तनानामितिहासानां सर्वाणि अङ्गानि निबद्धानि सन्ति। अतः वेदस्य विषये सर्वं लिखितुं न शक्यते। अस्मिन् लघुलेखे अथर्ववेदे समुपलब्धाः केचन विषया एव विश्लेषणाय वर्णनाय च प्रस्तूयन्ते।

**वेदपरिचयः**

वेदशब्दस्य ज्ञानमेकः पर्यायः। विद्लृ लाभे, विद् विचरणे, विद ज्ञाने, विद् सत्तायां येभ्यश्चतुर्भ्यो धातुभ्यो वेदशब्दो निष्पद्यते। ऐहिकामुष्मिकफलं लभ्यमानात् आत्मापरमात्माब्रह्मव्रात्यसृष्टिप्रलयादीनां चिन्तनत्वात्, स्वर्गनर्कधर्माधर्मसदाचारादीनां ज्ञानत्वात्, सामाजिकराजनीतिकस्थूलसूक्ष्मवस्तूनां सत्त्वाच्च चतुर्भ्यो धतुभ्यो निष्पन्नस्य वेदशब्दस्यार्थं फलवत्वं भवति। वेदपरिभाषायां सायणाचार्य तैत्तरीयसंहिताव्याख्याम् एवं कथयति "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः।" अतो ज्ञायते यत् मानवजीवनस्य वैभवसम्मानसुखसंमृद्धयो वेदेभ्य एव लभ्यन्ते। रोगव्याधिदुर्भिक्षापमानहानिसङ्कटादयो दुर्गतयो वेदैरेव उपशम्यन्ते च। तथैव इहलोके

प्राप्तव्यमर्थाः भौतिकोन्नतीनां पारलौकिकाध्यात्मिकोन्नतीनां च बहवो मार्गाश्च वेदेषु एव प्राप्यन्ते। ऋषिभिः स्वज्ञानचक्षुषा दृष्टो ज्ञानशब्दराशिर्वेदः।

एतादृशो वेद ऋग्यजुस्सामाथर्वभेदेन चतुर्धाः सन्ति। मन्त्रब्राह्मणयोर्वेदनामधेयमिति(अपस्तम्बश्रौतसूत्रम्,२४।१।३१) परिभाषया वेदस्य स्वरूपमवगम्यते। सामान्यतया जनमानसे मन्त्रात्मको भाग एव वेदरूपेण परिचितः अस्ति परन्तु अस्माकं ज्ञानपरम्परायां मन्त्र—ब्राह्मण—आरण्यक—उपनिषदां समाहर एव वेदरूपेण ज्ञायते। यागानां स्मारकाणि, यज्ञे प्रयोज्यानि वा वेदवाक्यानि मन्त्राः कथ्यन्ते। ते मन्त्रा ऋग्यजुस्सामस्वरूपात् त्रिविधाः सन्ति। तथैव यागादीनां स्वरूपं विवेचकाः, मन्त्रव्याख्यात्मकाः, विधेयस्य अर्थस्य स्तुतिकारकाः, निषेधस्य अर्थस्य निन्दकाः वेदभागा ब्राह्मणानि कथ्यन्ते। आरण्यकानि उपनिषदश्च ब्राह्मणभागेषु हि गण्यन्ते। मन्त्रभागेषु अपि उपनिषदः सन्ति। अतः मन्त्रब्राह्मणारण्यकोपनिषद्रूपो वेदः।

चतुर्णां वेदानाम् अनेकाः शाखा आसन्। अधुना सर्वाः शाखा नोपलभ्यन्ते। समयान्तरे पठनपाठनक्रमे नैरन्तर्याभावे बहवाः शाखा लुप्ता जाताः। काचन शाखा एव लभ्यन्ते वर्तमाने। पूर्वैः मनीषीभिः शाखानां यानि सङ्ख्यानि परिगणितानि तानि विचार्य प्राचीने काले वैदिकवाङ्मयस्य विराट्स्वरूम् अनुमीयते। आधुनिके कालयपि वैदिकवाङ्मयस्य विस्तृतं क्षेत्रं वर्तते हि। वैदिकपरम्परायां चत्वारो वेदाः प्रचलिताः सम्मानिताश्च सन्ति। ऋग्यजुस्सामरूपा मन्त्राः सन्ति परन्तु ग्रन्थरूपा वेदा अथर्ववेदमपि संयोज्य चत्वारः सन्ति। यागसम्पादने अपि चत्वारो वेदा हि प्रयुक्ताः प्रशंसिताश्च। सामान्यतया वेदनाम्ना मन्त्रसङ्गहात्मक ऋग्यजुस्सामाथर्वनामाश्चत्वारो वेदा एव अभिधीयन्ते।

ऋग्वेदेन हौत्रकर्म सम्पाद्यते श्रौतयागेषु। प्रायशः अस्मिन् वेदे पद्यात्मका ऋचः सन्ति अतः अस्य वेदस्य नाम ऋग्वेदः अभवत्। अयं प्रथमो वेदो गणनायां। गायत्री—उष्णिक्—अनुष्टुपादिषु छन्दसु निबद्धा ऋचः सन्ति वेदेऽस्मिन्। धार्मिकाध्यात्मिकाः भौतिकाः वैज्ञानिकाश्च विषया ऋग्वेदे वर्णिताः सन्ति। ऋग्वेदो न केवलमेकं पुस्तकम् अपितु प्राचीनानां विविधानां विषयाणां विराट्पुस्तकालय एव वर्तते।

अध्वर्युकर्मणां प्रतिपादनाद् अध्वर्युवेद इति नाम्ना यजुर्वेदः परिचीयते। अस्मिन् वेदे श्रौतयागेषु विधेयानां कर्मणां स्मारकाणि तेषु यागेषु प्रयोज्यानि गद्यरूपाणि मन्त्रवाक्यानि सन्ति। 'एकशतमध्वर्युशाखा' इति वचनात् यजुर्वेदस्य व्यापकत्वं ज्ञायते। यद्यपि सर्वाः शाखा न विद्यमानाः। शुक्लकृष्णत्वभेदेन द्विधाः यजुर्वेदः।

कठकपिष्ठलमैत्रायणीयतैत्तिरीयाः शाखा अधिुनापि समुपलभ्यन्ते अस्माकं धर्मसंस्कृतिपरम्परासु यजुर्वेदस्य तत्सम्बद्धानां वाङ्मयानाञ्च अधिकः प्रभावो वर्तते।

सामवेदे गेयात्मका मन्त्राः सङ्कलिताः सन्ति। ऋचमवलम्ब्य विभिन्नानि सामानि गीयन्ते। "ऋच्याध्यूढं साम गीयते" (छान्दोग्योपनिषद्, १।६।१) इत्युपनिषद्वाक्यादपि ज्ञायत इत्थम्। गानप्रधानत्वाद् सामवेदो गान्धर्ववेद इत्युपाधिना च प्रसिद्धः। ऋग्वेदीया गेयात्मका ऋचः समाहृत्य सप्तस्वरान्नधिकृत्य सामवेदे गीयन्ते। गीतिषु सामाख्या इति जैमिनीय परिभाषया अपि ये गानयोग्या मन्त्राः सन्ति ते साममन्त्रा भवन्ति। पाणिनीयव्याकरणभाष्ये पस्पशाह्निके "सहस्रवर्त्मा सामवेदः" इत्युल्लेखात् प्राचीने काले सामवेदस्य व्यापकत्वं कीदृशमासीदिति च ज्ञायते। अधुना सर्वाः शाखा नोपलभ्यन्ते। अधुना मुख्यरूपेण जैमिनीयशाखा तथा कौथुमराणायणीयशाखा च द्वे एव शाखे प्राप्येते। शालिहोत्र—शार्दूल—नैगेय—गौतमादयाः शाखा अपि श्रुतिषु श्रूयन्ते।

**अथर्ववेदस्य परिचयः**

अथर्ववेदस्तु व्यक्तिप्राध्यान्येन प्रसिद्धो वर्तते। ऋग्यजुस्सामवेदाः मन्त्रस्वरूपेण शैल्या वा परिभाषिताः सन्ति। परन्तु अथर्वनाम्ना महर्षिणा विस्तारितः अथर्ववेदः। अथर्वर्षिणा तथा तत्कुलोत्पन्नैर्महर्षिभिर्दृष्टा मन्त्रा अस्मिन् वेदे सङ्कलिताः तेनास्य वेदस्य अथर्ववेद इति संज्ञा जाता। अथर्वशब्दः थुर्वी हिंसायामिति धातोर्निष्पद्यते तेन अ उपसर्गो योजनेन हिंसाभावः, हिंसाराहित्य इति अवगम्यते। "थर्वतिश्चरतिकर्मा। तत्प्रतिषेध" (निरुक्तम्, ११।१८)। इति निरुक्तवचनात् स्थिरः, अचलः, शान्तः, लोभमोहादीनां प्रभावनिरस्त्य आत्मसंयमविधिविधानयुक्तानां मन्त्राणां साङ्कल्येन अथर्ववेद इति संज्ञा समीचिना प्रतिभाति।

अथर्ववेदस्य बहूनि नामानि सन्ति। विषयवैविध्याद्, ऋषिवैविध्याच्च अस्य वेदस्यानेकानि नामानि जातानि। अथर्वदृष्टमन्त्रबाहुल्याद् अथर्ववेदः, अङ्गिरसदृष्टमन्त्रबाहुल्याद् अङ्गिरसवेदः, अथर्वणः अङ्गिरसः द्वयोः समुच्चयाद् अथर्वाङ्गिरसवेदः अभवत्। अथर्ववेदः ब्रह्मवेद नाम्नापि ख्यातः अस्ति। ब्रह्मविद्यासम्बद्धमन्त्रबाहुल्यात्, ब्रह्मदृष्टमन्त्रबाहुल्यात्, श्रौतयागेषु अथर्ववेदविदेव ब्रह्मकर्मसम्पादनाद् वा अस्य वेदस्य ब्रह्मवेद नाम भवितुमर्हति। अनेन प्रकारेण भृग्वङ्गिरोवेदः, क्षत्रवेदः, भैषज्यवेदः, छन्दोवेदः, महीवेदः इत्यादिभिर्नामभिरपि अथर्ववेदस्य प्रख्यातिर्वर्तते।

वेदानाम् अनेकाः शाखाः आसन्। कतिपयाः शाखा लुप्ता जाताः, कतिपयाः अधुनापि प्राप्यन्ते। तथैव दशा अथर्ववेदस्यापि दृश्यते। महर्षि पतञ्जलिः महाभाष्ये, “नवधा—थर्वणो वेदः” लिखितवान् अस्ति। तथैव प्रपञ्चहृदये, चरणव्युह्वे, सायणभाष्ये च अथर्ववेदस्य नवशाखानां चर्चा प्राप्यते। परन्तु तेषु ग्रन्थेषु सङ्ख्याविषये सम्यं नामविषये वैषम्यं दृश्यते। सायणाचर्येण पैप्पलादः, तौदः, मौदः, शौनकीयः, जाजलः, ब्रह्मवदः, देवदर्शः, चारणवैद्यः एतानि नामानि लिखितानि। वर्तमाने काले शौनकीयः, पैप्पलादः नामके केवले द्वे शाखे एव लभ्येते।

पिप्पलादपाठप्राधान्येन एकायाः शाखायाः नाम पैप्पलादसंहिता जातमिति ज्ञातुं शक्यते। काश्मिरे शारदालिप्यां पैप्पलादसंहिताया हस्तलिखितप्रति प्राप्ता आसीत्। ब्लुमफिल्डमहोदयेन इं १९०१ वर्षे अस्याः शाखायाः आङ्ग्लानुवादः प्रकाशितः। पश्चात् रघुवीरमहोदयेन अपि वेदोऽयं प्रकाशितः। या शाखा सम्पूर्णा नास्ति। अद्यापि अथर्ववेदस्य प्रथममन्त्ररूपेण शन्नोदेवी...इति मन्त्रः प्रसिद्धः अस्ति। अयं मन्त्रः शौनकीयशाखाया आदौ नास्ति किन्तु पैप्पलादसंहिताया आदौ वर्तते। अतः प्राचीने काले शाखेयं बहुप्रचलिता आसीदिति कथयितुं शक्यते। अधुना सम्पूर्णा पैप्पलादसंहिता मुद्राप्यमाणा अस्ति। सम्प्रति प्रचलिता सहजोपलभ्यमाना शाखा शौनकीया शाखा अस्ति। अस्यां शाखायां विंशतिकाण्डानि सन्ति। अधिकाः सम्मितपदयुक्ता ऋचः सन्ति। केचनमन्त्रा गद्यात्मकाः सन्ति। अथर्ववेदीयेषु कर्मसु शौनकीयशाखाया मन्त्राः प्रयुज्यन्ते।

**अथर्ववेदे प्रतिपादितविषयाः**

अनुसन्धानकर्तृभिर् विषयविविधतायाः कारणेन विश्वकोष इति उपाधि दत्ता अथर्ववेदाय। ऋग्यजुस्सामापेक्षा अथर्ववेदे सामाजिक—सांस्कृतिकविषयाणां महत् सङ्कलनं दृश्यते। राजनीतिक—दार्शनिक—आभिचारिकविषया अपि अस्मिन् वेदे प्रकीर्णाः सन्ति। विविधा रीतयः, संस्कृतयः, कृत्याप्रयोगाः, वशीकरणदायाः प्रयोगाः, कष्टपापमोचनविधयः, व्याधिपरिचयः, तेषां निवारणोपचाराः, ओषधीनां परिचयप्रयोगाश्च वेदेऽस्मिन्नेव प्राप्यन्ते। ऋगादिषु त्रिषु वेदेषु अपि सामाजिकविषया उपलभ्यन्ते परन्तुं तेषां विकसितरूपाणि अथर्ववेदे दृश्यन्ते। वस्तुतः अथर्ववेदो वैदिकस्य समाजस्य सुस्पष्टो दर्पणो विद्यते। वैदिकानां मानवानां रीतीनां, संस्कृतीनां, विचाराणाम्, आचाराणां, चिन्तनानां, दर्शनानां महन्ति रूपाणि वर्णनेन अथर्ववेदस्य महती उपयोगिता दृष्टिपथमागच्छति।

अथर्ववेदस्य मन्त्रा अपि विविधेषु कर्मसु विनियुक्ताः सन्ति। आचार्येण सायणेन वेदार्थप्रकाशनामके स्वकीये भाष्ये आदौ अथर्ववेदीयानां सूक्तानां मन्त्राणाञ्च विनियोगं प्रदर्शितम्। सायणस्य विनियोगस्य आधाराः कौशिकगृह्यसूत्र—वैतानश्रौतसूत्रादयः अथर्ववेदीया ग्रन्थाः सन्ति। विविधेषु गृह्यकर्मसु, शान्तिकपौष्टिककर्मसु, कृत्याभिचारकर्मसु, शुकुनविचारादिषु कर्मसु मणिबन्धनादिषु कर्मसु यक्ष्मकृमिनाशनादिषु कर्मसु, मणिजलाभिमन्त्रणादिषु कर्मसु च मन्त्रान् नियोज्य मन्त्रेषु दिव्यसामर्थ्यं कल्पितं वर्तते। अथर्ववेदस्य परम्परायां मन्त्रप्रयोगस्य रहस्यमयी स्थितिर्दृश्यते।

अस्मिन् लेखे अथर्वसंहितापश्चात् विकासपथमागतान् विधिपद्धतिग्रन्थान् विहाय केवलं संहिताषु वर्णिता विषया हि प्रस्तुताः सन्ति। उदाहरणरूपेण केचन विषया उपस्थाप्यन्ते च।

**अथर्ववेदे सामाजिकविषयाः**

समाजव्यवस्थायां समाजसुसञ्चालने वा यानि उपकरणानि विधिनियमादीनि आवश्यकानि सन्ति तानि वस्तूनि सामाजिकविषयान्तर्गते परिगणितानि भवन्ति। भाषा, दैनिकव्यवहारः, सहयोगदानादानविषयाः, वस्त्राभूषणानि, जातधर्मवर्णसंस्कारादयश्च सामाजिकविषयाः सन्ति। अथर्ववेदः प्राचीनस्य समाजस्य विशालरत्नागारः अस्ति। जात्याधारेण कीदृशा मानवाः आसन्? ते कीदृशाणि वस्त्राभूषाणि परिधापयन्ति स्म? अन्नपानादीनि कान्यासन्? कृषि उपकरणानि च कान्यासन्? इत्यादिषु जिज्ञासासु मन्त्रा बहूनि तथ्यानि उद्घाटयन्ति।

अथर्ववेदस्य तृतीयकाण्डे पञ्चजनानां चर्चा विद्यते। (३।२१।५) यद्यपि पञ्चजनानां विषये नास्ति मतैक्यं तथापि वैदिके समाजे मानवानां वर्गो निर्मितः आसन् इति ज्ञायते। जन्मकर्मक्षेत्रादिभिः समाजे बहुप्रकारका मानवा आसन्। अधिका वेदमन्त्राः स्तुतिपरकाः सन्ति। देवान्नुद्दिश्य ते स्तुवन्ति परन्तु स्तोत्रान्तर्गते हि विविधा विषया प्राप्यन्ते। विंशतीकाण्डे इन्द्राणि स्तूयते यत् पुराकालादेव नार्यः सुपूजिताः सुवीराश्च आसन्। यज्ञकर्मणि ताषामपि आधिकारः आसीदिति (२०।१२६।१०)। पृथिवीसूक्ते, विवाहसूक्ते, स्त्रीप्रसूतीसूक्ते अन्येष्वपि सूक्तेषु प्राचीनानां नारीजातानां सामाजिकी स्थितिर्द्रष्टुं शक्यते।

अथर्ववेदस्य तृतीयकाण्डस्य द्वादशसूक्तं शालानिर्माणसूक्तम् इत्युल्लिखितमस्ति। अस्मिन् सूक्ते शालानिर्माणस्य विधयः, तस्योपयोगिता, साधनानि च वर्णितानि। शालानाम्ना न केवलं यज्ञशाला ज्ञायते अपितु मानवानां, गवां, मेषानाम्, अश्वानाञ्च निवास अपि ज्ञायते। ताः शालाः सन्तोषकल्याणसमुन्नत्यै च भवितव्याः। गृहं कीदृशं भवितव्यम्?

कया रीत्या सुन्दरं रम्यञ्च गृहं निर्मीयते? ये विषयाः सप्तमकाण्डस्य रम्यगृहसूक्ते वर्णिताः सन्ति। अस्मिन् सूक्ते गृहनिर्माणस्य काष्ठपाषाणपर्णादीनि साधनानि न लिखितानि। गृहस्य सांस्कृतिकम् आध्यात्मिकं स्वरूपं दृश्यते सूक्ते। गृहे बुद्धिमन्तः, शान्तमनाः, दानशीलाः, अतिथिपूजका मानवा स्थातव्याः। तादृशाणि गृहाणि रम्याणि भवन्ति। यस्मिन् गृहे अन्नदुग्धघृतादीनि वस्तुनि भवन्ति तानि गृहाणि रम्यानि भवन्ति। अभ्यागता नैरन्तर्येण आगच्छन्तु, मित्राणि आगच्छन्तु, सङ्कटानिष्टदुर्भिक्षादया दुर्गतयः पलायन्तु, गोबाजिमेषादयः पशवः प्राशस्त्येन वर्धन्तु। तादृशाणि गृहाणि भवन्त्वस्माकमिति चिन्तनं सूक्तेऽस्मिन् प्राप्यते।

अभिनयसङ्गीतकलादीनां प्रकीर्णाः विषया अपि वेदेस्मिन् प्राप्यन्ते। षष्ठकाण्डस्य १२६ सूक्ते दुन्दुभिस्तूयते। भूलोकं, द्युलोकं, स्थावरं, जङ्गमञ्च गतिमानं कर्तुं कथितम्। शत्रुनाशाय, रणभूमौ स्वसेनाया बलवर्धनाय च दुन्दुभिः प्रार्थितः। अतो ज्ञायते यत् वाद्यवादनादीनां विविधाः प्रयोगाश्च वैदिके समाजे आसन्।

**अथर्ववेदे दार्शनिकविषयाः**

अथर्ववेदे अनेकानि दार्शनिकसूक्तानि सन्ति। तेषु सूक्तेषु सृष्टिस्थितिलयानां, प्रकृतिभूमिपर्वतानां, प्राणीनां, वनस्पतीनाञ्च बाह्याभ्यन्तरां पद्धतीनां वर्णनं विद्यते। ब्रह्मचिन्तनस्य प्राथमिकी वाणी अस्मिन्नेव वेदे प्राप्यते। अस्य जगतः स्थूलसूक्ष्मप्रपञ्चानां बहूनि स्वरूपाणि बहुषु सूक्तेषु द्रष्टुं शक्यते। अथर्ववेदस्याष्टमकाण्डे विराट्तत्त्वस्य अर्धभागरूपेण दृश्यमानजगतः अस्ति तथा ह्यर्धभागरूपेण चेतना वर्तते। जडचिद्रूपं जगत् वर्तत इति तस्मिन् सूक्ते चिन्तितम्। चेतना हि भौतिकं स्वरूपं रचयति। चेतनातः सृष्टिर्जायते। सा चेतना एव विराट्स्वरूपा वर्तते। विराट्ब्रह्म हि बृहद् ब्रह्मरूपेण परिचीयते। बृहद्ब्रह्मतः पञ्चप्राणानां, शरीराणां, बृहत्सृष्टेश्च रचना भवतीत्यादयो विषया वेदमन्त्रेभ्य एव ब्राह्मणेषु, उपनिषत्सु, ब्रह्मसूत्रे, विविधासु गीतासु विस्तारिताः सन्ति। ब्रह्मचिन्तनविषया अथर्ववेदस्य दार्शनिकसूक्तेषु प्राशस्त्येन प्राप्यन्ते। अस्मिन् सूक्ते ब्रह्मविद्याविषये अथर्वाण ऋषयः कश्यपं पृच्छन्ति। तत्र अथर्वाकश्यपयोः सुन्दरं संवादं पठनाय लभ्यते।

कश्यपः कथयति, “विश्वं मृशन्तिमभिरूपां विराजं पश्यन्ति त्वे न त्वे पश्यन्त्येनाम्” (अथर्ववेदः, ८।९।९)। अष्टमकाण्डस्य सप्तसु विराट्सूक्तेषु विराट्तत्त्वस्य विवेचना अस्ति। दृश्यजगतः पश्चभागे विराट्पुरुषः तत्त्वं वा कारणरूपेण तिष्ठति। अस्मिन् भूते जगति यानि रूपाणि सन्ति तानि परिवर्तनधर्मेण, विनाशधर्मेण, विकारधर्मेण च परिवेष्टितानि सन्ति किन्तु विराट्तत्त्वं तत् सर्वदैव समानरूपं, समानधर्मश्च अक्षरमविनाशी

तत्त्वरूपेण तिष्ठति। अनेन प्रकारेण अथर्ववेदे बहुषु सूक्तेषु दार्शनिकविषयाः सूत्रिताः सन्ति। अथर्ववेदे ब्रह्ममायाविषये, वाक्तत्त्वविषये, जीवात्मापरमात्माविषये, पुनर्जन्मविषये, स्वप्नविज्ञानविषये, मनोविज्ञानविषये च बहूनि सूक्तानि ऋषिभिर्दृष्टानि सन्ति। अत अथर्ववेद दार्शनिकविषयानां प्रचीनभाण्डागारो वर्तते।

**अथर्ववेदे राजनीतिकविषयाः**

राजनीतेः दण्डनीतेश्च प्राचीनं स्वरूपम् अथर्ववेदे दृश्यते। अथर्ववेदस्य बहुषु सूक्तेषु राजनीतिकविषया मन्त्रबद्धाः सन्ति। तेषां विषये सङ्क्षेपेणात्र सूचना हि प्रस्तूयते। वैदिकवेलायां राजनीतिकी अवस्था कीदृशी आसीत्, राजानः कथं शासनं कुर्वन्ति स्म, राज्यसञ्चालनस्य कान्युपकरणानि आसन्, मन्त्रीसेनागुप्तचराणां का व्यवस्था आसीत्, प्रजानृपयोः कीदृशं सम्बन्धश्च असीदित्यादीनां प्रश्नानामुत्तराणि प्राप्यन्ते अथर्ववेदे।

राष्ट्रः, राष्ट्रियता, देशरक्षा, ग्रामव्यवस्था, राजकर्तव्याः, सेनाप्रयोगः, राज्ञो निर्वाचनं, राज्यसहायकाः, न्यायदण्डौ, देशस्य वित्तव्यवस्था, शस्त्रनिर्माणं, सेनापतिनियोजनमित्यादयो विषया उपलभ्यन्ते वेदेऽस्मिन्। तृतीयकाण्डस्य राष्ट्रधारणसूक्ते सजातीयानां जनानां सुसमृद्ध्यै, समुन्नत्यै, चिरकालपर्यन्तं स्थिरत्वेन जीवनाय मित्रं स्तौति मन्त्रद्रष्टा। अस्मिन् सूक्ते राष्ट्रैकताया भावना दृश्यते। चतुर्थकाण्डस्य प्रथमो मन्त्रः कथयति, "भूतो भूतेषु पया आ दधाति भूतानामधिपतिबभूव" (अथर्ववेदः, ४।८।१)। अस्मिन् राज्याभिषेकसूक्ते न केवलं नृपाणामधिकारविषयः कथितः अपितु तस्य कर्तव्याकर्तव्यविषयः अपि निगदितः। अष्टमकाण्डस्य ध्रुवो राजासूक्ते राज्ञो ध्रुवत्वं स्थापितम्। यथा द्यावापृथिवी, पर्वताः, विश्वं, जगच्च ध्रुवमस्ति राजा अपि ध्रुवत्वं प्राप्नोति। तस्य राज्ञो राज्यं वरुणदयो देवा वर्धयन्ति। तादृशो राजा हि शत्रूञ्जयति, प्रजाश्च तस्मैकृते सुमनसो भवन्ति। (अथर्ववेदः, ६।८८।२)। अनेन प्रकारेण राज्ञः अधिकारकर्तव्यौ निर्धारितौ स्तः।

अथर्ववेदे राजनीतिः तत्सम्बद्धाश्च बहवो विषयाः सन्ति। द्वादशकाण्डे, त्रयोदशकाण्डे, षष्टमे सप्तमे च काण्डे राजनीतिकविषयाः सन्दर्शिताः सन्ति। तेषां मन्त्राणामध्ययनेन प्राचीना राजनीतिकव्यवस्थाया विषये विविधानि स्वरूपाणि द्रष्टुं शक्यते।

**अथर्ववेदे आयुर्वैदिकविषयाः**

भैषज्यवेदः इति नाम्ना अथर्ववेद एव विज्ञायते। अतः नाम्ना एव ज्ञायते यत् अस्मिन् वेदे आयुर्विज्ञानस्य बहवो विषया सन्निविष्टाः सन्ति। यावत् कालपर्यन्तं जीवनं भवति

तावदेवायुर्भवति। जन्माद् मृत्युपर्यन्तमेवायुर्कालः। आयोर्ज्ञानं हि आयुर्वेदः। सुस्वस्थतापूर्णेन मनसा शरीरेण च जीवनयापनाय बहवो मार्गाः प्रदर्शिताः सन्ति अस्मिन् वेदे। व्याधिपरिचयः, तद्भेदाः तेषां निराकरणाय उपायाः सन्ति वेदेऽस्मिन्। प्राचीने कालेऽपि रोगाः आसन्। तैः सह युद्धाय ओषधीनां प्रयोगाः मनोवैज्ञानिकप्रयोगाश्च प्रयुक्ता आसन्। आधुनिकायुर्वेदस्य कतिपयाधुनिकस्य चिकित्साविज्ञानस्य च बीजाङ्कुराणि अथर्ववेदे एव प्राप्यन्ते। मानसिकस्वास्थ्यसम्बद्धा रहस्यमयविषया अपि प्राप्यन्तेऽत्र। सामान्यतया शारीरिक स्वास्थ्यसम्बद्धा मानसिकस्वास्थ्यसम्बद्धाश्च अनेके विषया अथर्ववेदे सर्वत्र विकीर्णास्सन्ति। अस्य वेदस्य प्रथमकाण्डादेव तादृशा विषयाः प्रारभ्यन्ते। आद्यसूक्तं हि मेधाजननसूक्तमिति नाम्नोल्लिखितम् वर्तते। अत्र बुद्धिविकासाय प्रार्थना कृता।

द्वितीये रोगोपशमनसूक्ते रोगनिवारणाय प्रक्रिया दर्शिता। प्रथमकाण्डस्य तृतीये सूक्ते पुरीषेऽवरुद्धस्य मुत्रस्य वाणेन बहिष्करणविधिर्लिखितः। अपां भेषजसूक्तेषु जलचिकित्साया बहूनि रूपाणि दृश्यन्ते। येषु सूक्तेषु प्रधानौषधिरूपेण जलं सम्पूज्यते जलस्यभिमानीदेवता स्तूयते च। वैदिका ऋचः स्तुतिरूपास्सन्ति। बाह्यतः तेषु स्तुतयः सन्ति परन्तु अभ्यन्तरतः रहस्यमयानि ज्ञानानि सन्ति। प्रथमकाण्डस्यैकादशे नारीसुखप्रसुतीसूक्ते प्रसववेलायाः कष्टनिवारणाय उपायाः प्रस्तुता सन्ति। प्राकृतिकरूपेण गर्भाद् बालं बहिष्करणाय किं कर्तव्यमिति चिन्तनमत्र प्राप्यते -

**यथा वातो यथा मनो पथा पतन्ति पक्षिणः**

**एवा त्वं दशमास्य साकं जरायुणा पताव जरायु पद्यताम्। (अथर्ववेदः, १।११।६)**

यक्ष्मनाशन-ज्वरशमन-कृमिजम्भन-सर्पविषनाशनादिषु सूक्तेषु आयुर्वेदस्य बहुधा विषयाः सन्ति। यद्यपि तत्र आयुर्वेदस्य आधुनिकाः सदृशाः विभागा न सन्ति तथापि शरीरस्थरोगनिवारणाय, शिशुरोगनिवारणाय, सम्यक्प्रसवाय, वृश्चिकसर्पदंशनिवारणाय, ज्वरकुष्टयक्ष्मादयो यामविशेषरोगनिवारणाय, वैदिकोपचारपद्धतयः प्राप्यन्ते। सांमनस्य-दीर्घायुप्राप्ति-मणिबन्धन-कृत्याप्रतिहरणादिषु सूक्तेषु मनोविकारशमनपुरःसरं स्वस्थमानसिकस्थितिनिर्माणाय विविधानि उपचारोपकरणानि समुपस्थापितानि। विशेषतः प्राकृतिकतत्त्वानां शक्तीनामुपयोगेन चिकित्सा कर्तव्या। सूर्यचन्द्रजलवनस्पत्यादय एव मनुष्याणामन्येषां प्राणीनाञ्च कृते प्राथमिकौषधयः सन्तीति अथर्ववेदस्थायुर्वेदस्योपदेशः।

**अथर्ववेदे आर्थिकविषयाः**

वेदाः प्राचीनकालस्य समाजस्य दर्पणाः सन्ति। तेष्वपि अथर्ववेदे सामाजिकसांस्कृतिकाः विषया बहुधाः सन्तीति वेदान्वेषकाः स्वीकुर्वन्ति। अस्माकं

परम्परायां वेदमन्त्राः विविधेषु यागेषु विनियुज्यन्ते। तेषां मन्त्राणां व्याख्यापि याज्ञिकप्रकृयानुसारी च कृता पूर्वैर्मनीषीभिः। मन्त्रेषु सर्वत्र यागस्वरूपाणि, देवतास्वरूपाणि, द्रव्यस्वरूपाणि हि दृश्यन्ते। रहस्यमयी शक्तिर्मन्त्रेषु संस्थापिता पूर्वजैः। तैः मन्त्राणां सामाजिकदृष्ट्या, ऐतिहासिकदृष्ट्या व्याख्या नाधिका कृता। मन्त्राणामनेकैः प्रकारै विश्लेषणं भवितुं शक्नोति। तथा सति चेद् मन्त्रेषु प्राचीननां मानवानां सस्कृतिसभ्यतानां प्रच्छन्नानि रूपाण्यपि दृश्यन्ते।

अथर्ववेदे प्रचीनकालस्य आर्थिकविषयाः अपि सन्ति। क्रयविक्रयादिनियमाः, यातायातानां साधनानि, वस्त्राभूषणशृङ्गारवस्तूनां विनिमयानां व्यवस्था च आथर्वणेषु मन्त्रेषु प्राप्यन्ते। वैदिकस्य समाजस्य आर्थिकव्यवस्था कृषिवाणिज्यव्यापारपशुपालनादिषु क्रियाव्यवहारेषु आधृता आसीत्। विजितराज्यात् प्राप्तस्य सुवर्णान्नगोवाजिमेषादय अपि राज्यसञ्चालनस्य संवलाः सन्ति।

तृतीयकाण्डस्य सप्तदशे कृषिसूक्ते वैदिककृषिकर्मस्य स्वरूपं स्पष्टतया द्रष्टुं शक्यते। हलस्यस्वरूपं, बीजवपनकार्यं, वृषभैः कर्षणम्, वपनस्य बीजस्य सम्यक्तया फलप्राप्त्यै सम्बद्धदेवानां स्तोत्राणि सन्ति। अस्य सूक्तस्याध्ययनेन अन्नं धनं सर्वधनं प्रधानमिति ज्ञातुं शक्यते।

तृतीयकाण्डस्य चतुर्दशे गोष्ठसूक्ते गोधनस्य विवर्धनाय, समुन्नत्यै च चिन्तनं वर्तते। विघ्नव्यवधानराहित्येन गवां समृद्ध्यै प्रार्थना कृतास्ति। कृषिकर्मणि गोमयस्योपयोगिता च प्रदर्शिता। तस्यैव काण्डस्य पञ्चदशे वाणिज्यसूक्ते व्यापारस्य साफल्याय अग्निं प्रार्थयति वणिक्, "शुनं नो अस्तु प्रपणे विक्रयस्य प्रतिपणः फलिनं मा कृणोतु "(अथर्ववेद, ३।१५।४।)। शङ्खः, सुवर्णं, माणिक्यादीनां धातूनां स्थाने स्थाने व्यापारश्चासीत्। स्थानविशेषे प्रसिद्धानां वस्तूनां दूरस्थेषु देशेषु क्रयविक्रयाश्च भवन्ति स्म। वस्तुपरिवहनाय वृषभाश्वगर्धभादयः पशवः प्रयुज्यन्ते स्म। (अथर्ववेद, २०।१२६।३) वैदिकसमाजे अन्नगोवाजिभूमिसुवर्णघृतमध्वादीनि वस्तुनि वैभवे समाम्नातान्यासन्।

**अथर्ववेदे विज्ञानम्**

प्राचीनस्य विज्ञानस्य अनेकानि रूपाणि वैदिकेषु मन्त्रेषु प्राप्यन्ते। तेपामपि अथर्वणेषु मन्त्रेषु प्राचीनविज्ञानस्याधिक्यं विज्ञायते। खगोलशास्त्रीया कतिपयावधारणा वेदेभ्य एव प्रारभ्यते। गृहविज्ञानं, कृषिविज्ञानं, वास्तुविज्ञानं, मनोविज्ञानं, राज्यविज्ञानञ्च वेदेषूपलभ्यन्ते। रसायनविज्ञानं, पदार्थविज्ञानं, तत्त्वविज्ञानं, वनस्पतिविज्ञानं, प्राणीविज्ञानमपि वेदेषु सहजरूपेण प्राप्यन्ते। आधुनिकविज्ञानप्रविधीनां

नवीनाविष्कारैस्सह तुलनां कृत्वा दुर्मतयो जना हसितुमपि शक्नुवन्ति परन्तु तत्त्वज्ञा मनुष्या वैदिकमन्त्रेषु विज्ञानसम्बद्धा विषयाः पश्यन्त्येव।

अग्निवायुसूर्याणां सृष्टिपद्धतिषु, प्राणीवनस्पतीनां स्वाभाविकप्रणलीषु च यादृशः प्रभावो वर्तते तस्य गूढतरं वर्णनं मन्त्रेषु प्राप्यन्ते। अथर्ववेदस्य तृतीयकाण्डस्यैकत्रिंशत्तमे यक्ष्मनाशनसूक्ते सूर्यकिरणेभ्यो यक्ष्मरोगतिरोभूताय सूर्यं प्रार्थयति। न केवलं रोगनिवारणे अपितु पृथिव्यां जीवनसञ्चालनाय सूर्य एव सहायकः। सूर्यो जगत आत्मा वर्तते। वेदाः कथयन्ति सविता प्रसविता भवति। सूर्य एव भूतान् जनयति। पृथिव्यामग्निरूपेण सूर्यस्यैव शक्तिर्विराजते। सूर्यः प्राणीवनस्पतिभ्यो गतिं प्रयच्छति। वैदिकमन्त्राणं वर्णनशैली अवश्यमेव भिन्न किन्तु वदन्ति विज्ञानम् हि।

सूर्य ऊर्जां प्रयच्छति। चन्द्र ओषधममृतञ्च प्रयच्छति। वायुः प्राणान् प्रयच्छति। पञ्चमहाभूतानां संयोगेन जगत् प्राप्नोति समुन्नतिम्। येषां प्रभावेणैव जगति षड्भावविकाराः सञ्चलन्ति च। प्रतिदिनं परिवर्तमानस्यास्य जगतः सृष्टिस्थितिलयादिषु विषयेषु आथर्वणमन्त्राः कथयन्ति। मन्त्राः प्रतीकात्मकेन रूपेण कथयन्ति। पुनः पौन्येन व्याख्या कृत्वा कृत्वा वेदमन्त्रा रहस्यमया दुर्बोध्याश्चाभवन्। अनेकदृष्ट्या तेषां भाष्याञ्च कृतं वैदिकैः। वैज्ञानिकदृष्ट्या अपि वेदमन्त्रा व्याख्येयाः सन्ति। अथर्ववेदीया वैज्ञानिकरहस्यैः परिपुष्टाः सन्ति।

**अथर्ववेदे अभिचारः**

अभिचारकर्मसु आथर्वणा मन्त्रा विनियुक्ताः सन्ति। विशेषतया वैतानसश्रौतसूत्रे विस्मयोत्पादकानि रहस्याभिधायकानि बहूनि कर्माणि, अनुष्ठानानि वर्णितानि सन्ति। तेषु कर्मसु अथर्ववेदस्य मन्त्रा विनियोगाय पुरःसारिताः सन्ति। अचार्येण सायणेनापि अथर्ववेदस्य भाष्योपक्रमे वैतानश्रौतसूत्रानुसारं विनियोगं प्रदर्शितम्। एतावता अथर्ववेदस्य मारणमोहनोच्चाटनवशीकरणादिना सह सम्बद्धता उद्घोषिता वर्तते। अथर्ववेदीयेषु कतिपयेषु सुक्तेषु तादृशाः विषयाः सन्ति। पतिवशीकरणं, स्त्रीवशीकरणं, शत्रुसम्मोहनं, शत्रुनाशनं, बाजीकरणं, कृत्याप्रतिहारमित्यादिषु सूक्तेषु आभिचारिका विषयाः सन्ति।

अथर्ववेदे वर्णितेषु मानवसमुदायेषु तन्त्र-मन्त्र-मणिबन्धनादिभिरुपचारैर्मनोरोगीणां सुस्वास्थ्यं काम्यते स्म। सम्मोहनविद्यया सहाय्येन विकृतचित्तग्रस्ताणां मनुष्याणामुपचारं कुर्वन्ति स्म। भूतप्रेतपिशाचान् परिहाराय मन्त्रा युज्यन्ते स्म। आथर्वणमन्त्रेणाभिमन्त्रितेषु जलभष्ममृत्तण्डुलादिषु रहस्यमयी दैवीशक्तिर्जायत इति विश्वासः अपि वर्तते।

अथर्ववेदस्य पञ्चमकाण्डस्य एकत्रिंशत्तमे कृत्यापरिहरणसूक्ते आभिचारिककार्यस्य वर्णनं दृश्यते। शत्रूणां भयवर्धनाय, बलनाशाय, पारिवारिकशान्तिविनाशाय कृत्या निर्मीयते। इष्टसाधनाय च कृत्या प्रयुज्यते। शत्रुप्रेषितां कृत्यां प्रत्यावर्तनाय सूक्तेऽस्मिन् उक्तमस्ति, "कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम्" (अथर्व, ५।३१।२)। आभिचारिकानि कर्माणि रहस्ययुक्तानि भवन्ति। प्राचीनानां ग्राम्यजनानमाश्चर्यजनको विश्वासो येषु आभिचारिककर्मसु प्रतिभाति। कृत्यादीनां शक्तिर्मनोगता भवति। नेत्रकर्णादिभिर्ज्ञानेन्द्रियैः तेषां प्रत्यक्षीकरणं न सम्भवति। मनबुद्धितर्काणां ह्यभिचारिककर्मोत्पादितशक्तिरभीप्शितविषयः। इति तु सिद्धमेवाथर्ववेदे आभिचारिकाः क्रिया वर्णिताः सन्ति। अन्यवेदापेक्षा अथर्ववेदे अधिकाः सन्त्यभिचाराः।

**निष्कर्षः**

चतुर्षु वेदेषु अथर्ववेदस्य महत्त्वपूर्णं स्थानं वर्तते। सनातनवैदिकपरम्परायां वेदाः यागसम्पादनाय विशिष्टमेधासम्पन्नेभ्य ऋषिभ्यः स्वज्ञानचक्षुषा दृष्ट्वा दृष्ट्वा मन्त्राः प्राप्ताः। वेदा न केनापि रचिता वा निर्मिता इति विश्वासः। तथा स्यादपि। वेदै अग्निष्टोमादयो यागाः सम्पाद्यन्ते। अस्य जगतः सृष्टिप्रक्रिया अपि यज्ञवत् प्रतिभाति। अतः सृष्टिप्रक्रियायाः वर्णनं कुर्वन्तिवेदाः। प्रकृतिरूपं यागसम्पदनस्य बहवो विधयः सन्ति वेदेषु।

वेदाः प्राचीनानां मानवानां सभ्यतासंस्कृतीनां लिखितेतिहासो वर्तन्ते। समाजशास्त्रीयदृष्ट्या तेषु ग्रन्थेषु प्राचीनसमाजस्य बहूनि चित्राणि प्राप्यन्ते। अथर्ववेदो विषयवैविध्याद् महत्त्वपूर्णं स्थानमलङ्करोति। अस्य वेदस्य मन्त्रा अनेकेषु कर्मसु विनियुज्यन्ते। याज्ञिकर्मणि, विविधरोगाणामुपशमनेषु, अनिष्टदर्शननिवारणेषु, कृषिपशुपालनादिषु कर्मसु च वेदस्यास्य मन्त्रा विनियुक्ताः सन्ति। तेषु मन्त्रेषु वर्णितविषया हि कर्मणि विनियोगस्य कारणमस्ति। अतः विषयवैविध्यदथर्ववेदो भृशमनुसन्धेयो वर्तते।

**सन्दर्भसामग्रीसूची**

आचार्य, श्रीराम शर्मा (२०६१). अथर्ववेदसंहिता (सरल हिन्दी भावार्थसहित भाग १-२). ब्रह्मवर्चस्।

कौण्डिन्न्यायनः, आचार्यः (२०७९). वेदवेदाङ्गोपाङ्गविमर्शः. भुँडीपुराण प्रकाशन।

खानलः, वासुदेवः (२०७८). अष्टादशविद्या. श्रीमती शारदाखनालः।

गौडः, रामस्वरूपशर्मा (२००७). अथर्ववेदसंहिता (सायणभाष्यसंवलिता). चौखम्बा विद्याभवन।

त्रिपाठी, रमाशङ्कर (२०७५). वैदिक साहित्य और संस्कृति. चौखम्बा कृष्णदास अकादमी।
द्विवेदी, कपिलदेव (सन् २००८). वैदिक साहित्य एवं संस्कृति. विश्वविद्यालय प्रकाशन।
पाठक, जमुन एवं सिंह, उमेश प्रसाद (२०६७). नवीनवैदिकसञ्चयनम्. चौखम्बा कृष्णदास अकादमी।
पाण्डेय, ओमप्रकाश (सन् २००४). वैदिक यज्ञसंस्था और वेद विज्ञान. महर्षि सान्दीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान।
रेग्मी, ऋषिराम (२०६१). अथर्ववेदसंहिता र तत्सम्बद्ध साहित्यको सङ्क्षिप्त परिचय. संस्कृतमा के छ. (सम्पा.) पोखरेल ऋषिराम र अन्य. जयतु संस्कृतम्।
रेग्मी, ऋषिराम (२०७३). अथर्ववेदका सङ्क्षिप्त परिचय. वेद-कथाङ्क. (सम्पा.) खेमका राधेश्याम. गीताप्रेश।
सूर्यकान्त (२०७७). वैदिक कोश. चौखम्बा कृष्णदास अकादमी।

# धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणम्

**विष्णुप्रसादशर्मा**

धर्मशास्त्राचार्यः

**लेखसारांशः**

संन्यासाश्रमः– यावताऽकालेन तीव्रतपः शोषितवपुषो विषयकषायपरिपाको भवति पुनश्च मदोद्भवाशङ्का नोद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्यात्। 'वन–गृह– शब्दाभ्यां तत्संबन्ध्याश्रमो लक्ष्यते।' 'मोक्ष' शब्देन च मोक्षैकफलकश्चतुर्थाश्रमः। अनियतपरिमाणत्वादायुषस्तृतीयभागस्य दुर्विज्ञानातृतीयमायुषो भागमिति रागक्षयावधिवानप्रस्थकालोपक्षणार्थम्। अत एव शङ्खलिखितौ– "वनवासाद् उर्ध्व शान्तस्य गतवयसः पारिव्राज्यम्"। एवं वनेषु विहृत्यैव विधिवद् दुश्चरतपोऽनुष्ठानप्रकारेण वानप्रस्थाश्रमं विषयरागोपशमनाय कञ्चित्कालमनुष्ठाय "चतुर्थमायुषो भागम्" इति शेषायुः काले सर्वथा विषयसङ्गान्त्यक्त्वा परिव्राजकाश्रममनुतिष्ठेत्।

**शब्दकुञ्जीः**– आध्यात्मिकशिक्षा, अध्यात्मः, आत्मज्ञानम्, आत्मस्वरूपम्, त्रीणि ऋणानि, आत्मज्ञानप्राप्तिः।

**विषय परिचयः**

यथा मनुः–

**वनेषु च विहृत्यैवं तृतीयं भागमायुषः।**

**चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत्।। मनुस्मृति।**

सनातनधर्मस्य वेदोऽस्ति मुख्याधारः। सन्यासीति च सर्वधर्मान् परित्यज्य निर्ममो निरहङ्कारो भूत्वा स्वतन्त्रो यतिश् चरति। इति यतिधर्मः। वेदानन्तरं स्मृतयः अस्माभिः स्वीक्रियन्ते। श्रुतिस्मृतिशास्त्रेष्वस्माकं प्राचीना विद्यार्थात् त्रयी– वार्ता – दंडनीतिः – आन्वीक्षिकी च निगूढास्सन्ति। आभिः विद्याभिः पुरुषार्थचतुष्टयस्य प्राप्तिर्भवति। मानवजीवनस्य मुख्योद्देस्य पुरूषार्थचतुष्टयस्य प्राप्तिरेव वर्तते। अस्मात् कारणात् श्रुतिस्मृतीनामध्यनमावश्यकं अस्ति। किन्तु वेदाध्ययनं सर्वेषां कृते न सम्भवम्। परन्तु स्मृतीनामध्ययनं सुलभं भवति। मनुयाज्ञवल्क्यानां प्रणीतानां स्मृतिप्रमुखानामध्ययनात् वेदविषयकज्ञानप्राप्तिर्भवति। अतः वेदविषयकज्ञानं भवति चेत् तस्य श्रेयः स्मृतिः ग्रन्थाय जायते। अस्मिन्नेव क्रमे अत्र याज्ञवल्क्यप्रणीताया आध्यात्मिकशिक्षायाः विशदं परिचयं

प्राप्स्यामः। अतः धर्मानुष्ठानं सर्वमनुष्याणां कृते मङ्गलकारकं भवति। ईहलोके परत्र च मनुष्याणां पोषणम्, तोषणं, रक्षणञ्च धर्मेणैव भवति। अस्य विषये विमति वा भिन्न मतं नैव दृश्यते। यः स्मृतिः न जानाति सः आत्मानं न जानाति।

**अहिंस्रकः समः सत्यो धृतिमान्नियतेन्द्रियः।**

**शरण्यः सर्वभूतानां गतिमाप्नोत्यनुत्तमाम्।।२०।। (महाभारत, शान्तिपर्व, मोक्षधर्मपर्व, अध्याय २४५)**

अहिंसकः समः सत्यः धृतिमान् नियत–इन्द्रियः शरण्यः सर्व–भूतानाम् गतिम् आप्नोति अन्–उत्तमाम्  वा अत्युत्तमाम्।

**विमुक्तं सर्वसङ्गेभ्यः मुनिमाकाशवत् स्थितम्।**

**अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः।।२२।।** (यथोपर्युक्त)

विमुक्तम् सर्व–सङ्गेभ्यः मुनिम् आकाशवत् स्थितम् अस्वम् एकचरं शान्तम् तम् देवाः ब्राह्मणम् विदुः।

**निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।**

**निर्मुक्तं बन्धनैः सर्वैस्तं देवा ब्राह्मणं विदुः।।२४।।** (यथोपर्युक्त)

निर्–आशिषम् अन्–आरम्भं निर्–नमस्कारम् अस्तुतिम् निर्–मुक्तम् बन्धनैः सर्वैः तम् देवाः ब्राह्मणम् विदुः।

**एकश्चरति यः पश्यन् न जहाति न हीयते।**

**अनग्निरनिकेतश्च ग्राममन्नार्थमाश्रयेत्।।५।। (महाभारत, शान्तिपर्व, मोक्षधर्मपर्व, अध्याय २४५)**

पश्यन् यः एकः चरति, न जहाति न हीयते, अन्–अग्निः च अनिकेतः च ग्रामम् अन्न–अर्थम् आश्रयेत्।

**अश्वस्तनविधाता स्यान्मुनिर्भावसमाहितः।**

**लघ्वाशी नियताहारः सकृदन्ननिषेविता।।६।।** (यथापूर्वोक्तम्)

अश्वस्तन–विधाता, मुनिः, भाव–समाहितः, लघु–आशी, नियत–आहारः, सकृत्–अन्न–निषेविता स्यात्।

**कपालं वृक्षमूलानि कुचैलमसहायता।**

**उपेक्षा सर्वभूतानामेतावद् भिक्षुलक्षणम्।।७।। (यथापूर्वोक्तम्)**

कपालं वृक्ष–मूलानि कुचैलम् असहायता सर्वभूतानाम् उपेक्षा एतावत् भिक्षु–लक्षणम्।

**न क्रुद्ध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः।**

**सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः।।१४।।** (महाभारत, शान्तिपर्व, मोक्षधर्मपर्व, अध्याय २४५)

न क्रुद्ध्येत् न प्रहृष्येत् च मानितः अमानितः च यः सर्वभूतेषु अभयदः तम् देवा ब्राह्मणम् विदुः।

**नाभिनन्देत मरणं नाभिनन्देत जीवितम्।**

**कालमेव प्रतीक्षेत निदेशं भृतको यथा।।१५।।** (यथोपर्युक्त)

न अभि-नन्देत मरणम् न अभि-नन्देत जीवितम् कालम् एव प्रतीक्षेत निदेशम् भृतकः यथा।

**अनभ्याहतचित्तः स्यादनभ्याहतवाग् भवेत्।**

**निर्मुक्तः सर्वपापेभ्यो निरमित्रस्य किं भयम्।।१६।। (यथोपर्युक्त)**

अन्-अभि-आहत-चित्तः स्यात् अन्-अभि-आहत-वाग् भवेत् निर्-मुक्तः सर्व-पापेभ्यः निर्-अमित्रस्य किम् भयम्।

धर्मशास्त्रं तु वै स्मृतिः इत्युक्तेः मन्वत्रिविष्णुयाज्ञवल्क्यादीनां स्मृतयः धर्मशास्त्रनाम्ना प्रसिद्धः सन्ति। तासु मनुस्मृतिः सर्वश्रेष्ठा सर्वज्येष्ठा च मन्यते। एवं प्रकारेण याज्ञवल्क्यस्मृतिः ग्रन्थमपि अग्रस्थानं प्राप्यते। अस्य ग्रन्थे आचारव्यवहारप्रायश्चित्तसम्बद्धाः सर्वे विषयाः सरलया गिरा अतिविस्तरेण निरुपिताः सन्ति। धर्मशास्त्रविषयमवलम्ब्य पिपठिषूणां प्रियपाठकाः, सज्जनवृन्दः, जिज्ञासु, शास्त्रअनुयायीनां कृते कुल्लुकभट्ट मन्वर्थमुक्तावलीसहितायाः मनुस्मृतेः, याज्ञवल्क्य, विज्ञानेश्वर मिताक्षरा टीका सहितायाः याज्ञवल्क्यस्मृति ग्रन्थेः विविधाः धर्म एवं धर्मशास्त्रविषया, नियमाः, समाविष्टाः सन्ति।

धर्मसूत्राणि, स्मृतयो, धर्मनिबन्धाश्चेति त्रिविधानि शास्त्राणि मूलतो धर्मशास्त्ररुपेण प्रसिद्धानि सन्ति। धर्मनिबन्धेषु विशेषेण धर्मसूत्रनिबद्धानां मन्वादिस्मृतिनिरुपितविषयाणां च देशकालपरिस्थित्यनुकूलतया व्यवस्थापनम्, वर्णनम्, विश्लेषणं, सत्यापनञ्च विहितमस्ति। अस्मिन् शोधप्रबन्धलेखे शास्त्रीयविषयत्वेन मुख्यतः संस्कारसम्बद्धाः विषया निर्धारिताः सन्ति। एवमत्र धर्माधर्मविवेकसौकर्याय शास्त्रीयपरिचायको धर्मशास्त्रसम्बद्धाश्च विषयाः समाविष्टाः सन्ति।

अतः धर्मशास्त्रनिर्दिष्टानां विविध ज्ञानसम्बद्धविषयाणां ज्ञानार्जने अस्य लेखप्रबन्धस्य वैशिष्ट्यं सिद्धं भवति। अतः धर्मानुष्ठानं सर्वमनुष्याणां कृते मङ्गलकारकं भवति। ईहलोके परत्र च मनुष्याणां पोषणम्, तोषणं, रक्षणञ्च धर्मेणैव भवति। मानवाः सामाजिक मानसिकः शारिरिक आर्थिक दृष्ट्या सबलोऽपि यदि आध्यात्मिक रुपेण सक्षमः सबलो नैव भवन्ति चेत् तेषां जीवनं निरर्थको भवन्ति। तथा जीवनस्य सारं नैव प्राप्यन्ते। ते दुःखिनो भवन्ति च। तस्मात् कारणात् धर्मशास्त्रनिर्दिष्टानां विविध ज्ञान संम्बद्धविषयाणां ज्ञानार्जने अस्य लेखप्रबन्धस्य उद्देश्यं तथा लेखस्यसारं वर्तते।

धर्मस्य मूलं वेदो मन्यते। मानवानां कर्तव्याकर्तव्यादिधर्माधर्मनिरुपणार्थं धर्मशास्त्राणां रचना विहिता दृश्यते। महर्षिभिर्वेदस्य स्मरणादेव धर्मशास्त्राणां रचना विहिता। वेदोऽखिलो धर्ममूलम्। वेद एव सकलज्ञानस्य भाण्डागारो वर्तते। आचारहीनं न पुनन्ति वेदाः। तस्मात् कारणात् आचारयुक्त मानवा एव सफलो जायते। मन्वादिभिर्निर्मितानि धर्मशास्त्राणि वेदमूलत्वादेव तेषां प्रामाण्यञ्च शास्त्रेषु निदर्शितमस्ति।

अत्र लेखस्य ज्ञायते यत् इन्द्रियैः अथवा मनसा परमतत्त्व प्राप्तिरसम्भवा एव। तत् केवलं आत्मज्ञानेन प्राप्यते यतो हि आत्मा सत्यमस्ति, मनः इन्द्रियश्च साधनरूपेण प्रतीयते। मुनिनोक्तं यत् आत्मनः श्रवण–मनन– चिन्तनने आत्मतत्त्वस्य अनुभवः भविष्यति। आत्मतत्त्व अनुभवेन अमृतत्त्वं प्राप्यते। अस्य साक्षात्कारः केवलं मनसैव भवितुं शक्नोति।

**शोधलेखस्य पृष्ठभूमिः**

याज्ञवल्क्यप्रदत्तयतेरात्मौपासनाङ्ग ज्ञाननियमस्य प्रतिपादनं धर्मशास्त्रग्रन्थेषु विहितं वर्तते। धर्मस्य वेदमूलकत्वात् धर्मशात्राणां प्रवर्तकैः महर्षिभिर्वेदस्य स्मरणादेव श्रौतगृह्यधर्मशुल्वादीनां सूत्रग्रन्थानां तथा मनुस्मृतिः, याज्ञवल्क्यस्मृतिः प्रभृतीनां स्मृतिग्रन्थानाञ्च रचना विहिता। मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, ग्रन्थेषु च सर्वत्र यतिधर्मान् आत्मज्ञाननियमादीनां वर्णनं उपलभ्यते। यतिधर्मान् वा सन्यासाश्रमधर्मस्य व्यवस्थायाः परम्परा वेद,ब्राह्मण,कल्पादीनां क्रमेण प्रचलिता,संचालिता दृश्यते। अतो सन्यासाश्रमधर्मस्य निर्माणं वेद, ब्राह्मण, कल्पस्मृति, पुराणग्रन्थानां पृष्ठभूमौ विहितं दृष्टिगोचरी भवति।

**समस्याकथनम्**

आर्यावर्तान्तर्गतानां सन्यासिनां जीवनं वर्णाश्रमव्यवस्थाया आधारेण संञ्चालितमस्ति। तत्र वर्णितास्वाश्रमेषु संन्यासाश्रमव्यवस्थाया महत्वं सर्वाधिकं वर्तते। तथापि विÃद्भिर्विविध

विषयाणां सम्यक् अध्ययनं विहितं दृश्यते। परन्तु अत्र उपस्थापितः धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणावसरे याज्ञवल्क्यप्रदत्तयतेरात्मौपासनाङ्गं तथा च धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणं, तद् ज्ञाननियमविमर्शः विषये विशिष्टमध्ययनमद्यापि केनाऽपि पूर्णरुपेण नैव विहितम्। तेन सामाजिकव्यवस्थायामस्य विषयस्य अध्ययन अभावेन दृश्यमानाः समस्याः सूत्ररुपेण अत्र समुपस्थापिताः सन्ति।

क) आत्मज्ञानस्याधिकारी कः भवति?

ख) आत्मज्ञानम् कथं भवति?

ग) आत्मज्ञानोपायाः कः?

घ) आत्मस्वरुपम् कथं सिद्धयति?

ङ) आत्मज्ञानप्राप्तिः कथं भवति?

अस्मिन् विषये उपरीनिर्दिष्टाः समस्याः सन्ति।

**लेखस्यउद्देश्यकथनम्**

अत्र समुपस्थापितानामध्ययनसमस्यानां समाधानाय वक्ष्यमाणक्रमेण उद्देश्यानि च निरुपितानि।

क) आत्मज्ञानस्याधिकारी कः भवति? इति विषये सैद्धान्तिकाधारसमुपस्थापनञ्च।

ख) आत्मज्ञानम् कथं भवति? इति विषये सामान्यपरिचयः प्रदत्तोऽस्ति।

ग) आत्मज्ञानोपायाः कः? इत्यस्मिन् विषये विवेचनं विहितमस्ति।

घ) आत्मस्वरुपम् कथं सिद्धयति? इत्यस्मिन् विषये विवेचनं विहितमस्ति।

भ्) आत्मज्ञानप्राप्तिः कथं भवति? इत्यस्मिन् विषये विवेचनं विहितमस्ति।

**पूर्वकार्यसमीक्षा**

अत्र धर्मशास्त्रसम्बद्धः वैदिकग्रन्थानामाधारेण विविधापथा वर्णाश्रमधर्मस्याध्ययनं विवेचनं विश्लेषणञ्च विहितानां विदुषां विचाराणां समीक्षा विधीयते। मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, ईत्यादिषु ग्रन्थेषु प्रस्तुतोऽशीर्षक विषये धर्मशास्त्रीय दृष्ट्या प्रामाणिकाः ग्रन्थाः प्रकाशिताः सन्ति। तेनैव सहाय्येन अद्यपर्यन्तं अस्माकं सनातनसमाजे विधिनिषेधयोः निर्णयो विधियन्ते। पूर्वकार्यस्य समीक्षणअबसरे उपरि निर्दिष्ट धर्मशास्त्र सम्बद्धाः ग्रन्थाः प्रमुखरुपेण अङ्गिकृत्य शोधलेखप्रबन्ध निर्मातुम् शक्यते।

पोखेलकाशीराजः स्वकीये लेखने "प्राच्यसभ्यतामा धर्म र धर्मशास्त्र" इति शीर्षके श्रुतिस्मृतिपुराणेषु निर्देशितं मानवस्य आचारधर्म इति उद्घाटयति। सः धर्मस्य मूलम् वेद इति मनुस्मृतेः कथनं पुरस्सरति।

पोखेलकाशीराजः स्वकीये लेखने "गृहस्थाश्रमधर्मविमर्शः" इति शीर्षके श्रुतिस्मृतिपुराणेषु,स्मृतिग्रन्थेषु निर्देशितं मानवस्य गृहस्थाश्रमधर्मस्य पृष्ठभूमिः सैद्धान्तिकाधारसमुपस्थापनञ्च इति उद्घाटयति। सः धर्मस्य मूलम् वेद इति मनुस्मृतेः कथनं पुरस्सरति।

आचार्यप्रेमकुमारः "गृहस्थाश्रम र गृहस्थ ब्राह्मणका कर्तव्यहरू" इति शीर्षकं विधाय धर्मः कः? इति जिज्ञासायां कथयति –उपनिषदं सः स्मृतिपुराणादिषु ग्रन्थेषु अस्य धर्मस्य व्याख्या विहिता इति निर्दिशति। यथा – धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्टं प्रजा उपसर्पन्ति, धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्, तस्मात् धर्मः परम इति उच्यते।

**अध्ययनविधि**

अस्य आलेखस्य अध्ययनं पुस्तकालयेषूपलब्धानां धर्मशास्त्र सम्बद्धः ग्रन्थानामाधारेण लेख्यसामग्रीसङ्कलन पूर्वकं विहितमस्ति। अध्ययनेऽस्मिन् तुलनात्मकविधेरवलम्बनं विधाय विषयस्य विवेचनपूर्वकमधीतविषयस्य विविधानां वैदिकग्रन्थानामाधारेण विश्लेषणं कृतमस्ति। अत्र प्रमुखरुपेण तोलनविवेचनविश्लेषणादीनां अध्ययनविधीनां प्रयोगेण निष्कर्षस्योपस्थापनं विहितं वर्तते।

**लेखस्य सीमा क्षेत्रञ्च**

अस्य अध्ययनस्य सीमायां मनुस्मृतिः, याज्ञवल्क्यस्मृतिः ग्रन्थाश्च निर्धारिताः सन्ति। धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणं तथा च निरुपणपूर्वकं तस्य महत्वप्रदर्शनञ्चास्यानुसन्धानकार्यस्य क्षेत्रमस्ति। धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणं व्याख्यानं, सन्देहनिरुपणञ्च अस्य लेखस्य सीमा वर्तते।

**विश्लेषणस्य सैद्धान्तिकाधारः**

प्रस्तुतोऽयम् आलेखो धर्मशास्त्रमनुसृत्य निर्मितोऽस्ति। वैदिकपरम्परायां सनातनधर्मस्य वैशिष्ट्यस्य, भारतीयसंस्कृतेः वैशिष्ट्यस्य, वर्णधर्मप्रधानस्य, सदाचारपालनस्य, कर्मवादस्य, पुनर्जन्मवादस्य, आत्मज्ञानस्य, श्रुतिस्मृतीनां प्रामाण्यस्य, सत्यपरिपालनस्य, यज्ञमहत्त्वस्य, अहिंसापालनस्य, त्यागमहत्त्वस्य, तपोमयजीवनमहत्त्वस्य, मातृपितृगुरुभक्तेः, राष्ट्रभक्तेः, राष्ट्रहितस्य, इहलौकिकपारलौकिकभावनायाः, वर्णव्यवस्थायाः, आश्रमव्यवस्थायाः, राष्ट्रोन्नतेः, स्वोन्नतेश्च सर्वाः मूलभूतभावनाः समुपलभ्यन्ते एवञ्च सुस्पष्टं विवेच्यन्ते। वेदानां प्रामाण्यं सर्वैः स्वीक्रियते, यतो हि वेदस्य वेदाङ्गसहिताध्ययनं नैव सर्वेषां जनानां कृते यथावद् ज्ञानं

सुकरमिति वेदविद्भिः वेदानुगततदर्थाभिधायकस्मृतय उपनिबद्धाः। अत एव मन्यते अस्माभिः स्मृतिशास्त्रं मनुना निगदितं च यत् -

**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।**

**ते सर्वार्थेश्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ।।** मनुस्मृतिः २.१०

स्मृतिशास्त्रे षड्विधधर्माणाम् यथा वर्णधर्म - आश्रमधर्म- वर्णाश्रमधर्म-नित्यधर्म-नैमित्तिकधर्म-साधारणधर्माणां वर्णनमस्ति। धर्मस्य आशयो वर्तते स्वकर्त्तव्यपालनम्। मनुष्यः सोपानवत् स्वधर्मनिरतं भूत्वा धर्मार्थकाममोक्षप्रभृतीन् पुरुषार्थचतुष्टयान् प्राप्नोति। तत्र प्रथमः पुरुषार्थः प्रथमोऽभीष्टोऽपि च धर्म वर्तते। चेतनस्य स्वभावमस्ति यत् वर्तमानपरिस्थितौ सदैव न्यूनतायामनुभवति व उन्नयनप्राप्त्यर्थं च लालयति। आत्मोन्नति-प्राप्त्यर्थं स्वस्याभ्युदयमभिलषति। मानवस्य अभिलषितोन्नत्याः मुख्यसाधनं धर्मः वर्तते। अस्य विपरीतफलप्रदायकमधर्मः भवति। अतः सांख्यकारिकायामुक्तं यथा-

**धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण।**

**ज्ञानेन चापवर्गो विपर्यादिष्यते बन्धः।।** -सांख्यकारिका कारिकासंख्या ४४

वायुपुराणेऽपि चोक्तं यथा-

**धारणाद् धृतिरित्यर्थाद् धातोरधर्मह प्रकीर्तितः।**

**अधारणेऽमहत्त्वे च अधर्म इति चोच्यते।।** वायुपुराणम् ५७.५८

इहलौकिकपारलौकिकाभ्युदयस्य च नामधर्मः। धर्मात् मानवतायाः उन्नतिर्भवति। धर्मेण पुरुषार्थचतुष्टयं सिद्ध्यति। वैशेषिकसूत्रे महर्षिकणादेनोक्तं यत् -**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः**। वैशेषिकधर्मसूत्रम् १.२।

प्राणिनां यः सर्वविधाभ्युदयमोक्षयोः साधनोऽस्ति स धर्मः। शास्त्रप्रतिपादित-सम्पूर्णाभीष्टानां व्यभिचारितोपायः धर्मः। सम्पूर्णजगतः कर्ता-धर्ता - हर्ता मुख्याधारः धर्मोस्ति। अर्थात् इहलौकिकपारलौकिकसुखप्राप्त्यर्थं धर्मरक्षणं पालनञ्चावश्यकम्। कर्तव्यबोधनाय ज्ञानान्वेषणाय च सदैव धर्मशास्त्रे निमवग्नाः भवामो वयम्, अत अस्माकं प्राचीनस्मृतिशास्त्रेषु बहुनां विदुषाम् आध्यात्मिकशिक्षाविषये विचाराः पूर्वमेव प्रदत्ताः। आधुनिककालेऽपि तेषामध्ययनं कृत्वाधन्याः वयम्। महर्षिणा याज्ञवल्क्येनाऽपि स्वग्रन्थे आध्यात्मिकशिक्षायाः विवेचनम् कृतम्।

अध्यात्म इत्यस्य शाब्दिकार्थोऽस्ति आत्मनोऽध्ययनम् अर्थात् स्वान्वेषणम्। आत्मस्वरूपविषये याज्ञवल्क्येनोक्तं यत् "यथा समस्तस्पर्शाः त्वचि केन्द्रीभूताः भवन्ति अथवा सम्पूर्णविचाराः मनसि निमग्नाः, भवन्ति तथैव सांसारिकप्रपञ्चाः आत्मनि केन्द्रिताः

भवन्ति। ” अस्मात् कारणात् आत्मप्राप्तिरेव मानवीयप्रयत्नेषु महत्त्वपूर्णं ध्येयं वर्तते। अत एव याज्ञवल्क्यमुनिना अध्यात्मशिक्षाः निर्दिष्टाः ताः अत्र पञ्चबिन्दुरूपेण मया प्रस्तूयन्ते–

क) आत्मज्ञानस्याधिकारी

ख) आत्मज्ञानम्

ग) आत्मज्ञानोपायाः

घ) आत्मस्वरुपम्

ङ) आत्मज्ञानप्राप्तिः

**आत्मज्ञानस्याधिकारी**

अत्र प्रसङ्गे आत्मज्ञानस्याधिकारी कः भवति? अस्य समाधानस्य विषये याज्ञवल्क्येन उक्तम् यत्

**अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान्।**

**शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा।।**

**सन्निरुद्धयेन्द्रियग्रामं रागद्वेषौ प्रहाय च।**

**भयं हित्वा च भूतानाममृतीभवति द्विजः।।**

**कर्तव्याञ्ञ्शयशुद्धिस्तु भिक्षुकेण विशेषतः।**

**ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय च।।** -याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ५७.६१.६२

अर्थात् वेदमधीत्य, जपं कृत्वा, पुत्रवान् भूत्वा, अन्नदानादि कृत्वा, अग्निमान्, भूत्वा यथाशक्तिनित्यनैमित्तिकादिनि अनुष्ठानानि कृत्वा मोक्षे मनः कुर्यात्। यावता कालेन तीव्रतपः शोषितवपुषो विषयकषायपरिपाको भवति। पुनश्च मदोद्भवाशङ्का नोद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्यात्। वनगृहशब्दाभ्यां तत्सम्बन्ध्याश्रमो लक्ष्यते। मोक्षशब्देन च मौक्षैकफलकश्चतुर्थाश्रम ज्ञायते। अर्थात् गृहाद् गार्हस्थ्यादनन्तरं मोक्षे मनः कुर्यात्। न अन्यथा अस्ति। नान्यथापदस्यात्र आशयो अस्ति यत् -

**ऋणानि त्रीण्यपाकृत्य मनो मोक्षेनिवेशयेत्।**

**अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः।।** मनुस्मृतिः ६.३५

त्रीणि ऋणानि संशोध्य मनो मोक्षे निवेशयेत्। तान् ऋणानि त्वसंशोध्य मोक्षं चतुर्थाश्रममनुतिष्ठन्नरकं व्रजति इति शास्त्रे उक्तम्। एषा व्यवस्था तु वैकल्पिकी भवितुं शक्नोति। यतो हि ब्रह्मचर्याश्रमादनन्तरं प्रव्रज्याविधिरपि विहित अस्ति। **जाबालिश्रुतौ**

**विकल्पो दृश्यते निर्दिष्टं वर्तते तत्र ब्रह्मचर्यं परिसमाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्, यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा।** इति मनुस्मृतिः कुल्लूकभट्टटीका अनुसारेण अत्र उल्लेखितो वर्तते।

यदा तु ब्रह्मचर्यात् प्रव्रजति तदा न प्रजोत्पादनादिनियम जायते। अकृतदारपरिग्रहस्य तत्रानधिकारात् रागप्रयुक्तत्वाच्च विवाहस्य। न च ऋणत्रयापाकरणविधिरेव दारानाक्षिपतीति शङ्कनीयम्। विद्याधनार्जननियमवदन्यप्रयुक्तदार सम्भवे तस्यानाक्षेपकत्वात्। ननु जायमानो वै ब्राह्मणस्त्रिभिऋणवाञ्जायते। ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः इति जातमात्रस्यैव प्रजोत्पादनादीन्य आवश्यकानीति दर्शयति। नहि जातमात्रः अकृतदाराग्नि परिग्रहो यज्ञादिष्वधिक्रयते। तस्मादधिकारी जायमानो ब्राह्मणादिर्यज्ञादीननुतिष्ठेदिति तस्य अर्थः। अतश्चोपनीतस्य वेदाध्ययनमेवावश्यकं भवति। कृतदाराग्नि परिग्रहस्य प्रजोत्पादनमपीति निरवद्यम्।

मनुस्मृतिः ग्रन्थानुसारेण आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्। तथा एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः इत्युपक्रमोपसंहाराभ्यां मनुना ब्राह्मणस्य अधिकारः प्रतिपादयति। ब्राह्मणाः प्रव्रजन्ति इति श्रुतेश्चाग्रजन्मन एवाधिकारो न द्विजातिमात्रस्य। अन्ये तु त्रैवर्णिकानां प्रकृतत्वात्। त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः इति सूत्रकारवचनाच्च द्विजातिमात्रस्याधिकारमाहुः। तथा च चक्षुरादीन्द्रियरुपादिविषयेभ्यः सम्यक् विनिवृत्य रागद्वेषौ प्रियाप्रियविषयौ त्यक्त्वा भूतानामपाकारेण अभयमकुर्वन् शुद्धान्तः करणः सन्नद्वैतसाक्षात्कारेणामृती भवति। अर्थात् जीवः मुक्तो भवति। अतः विषयाभिलाषद्वेषजनितदोषस्य अन्तः करणस्य शुद्धिः कल्मक्षयः प्राणायामैः कर्तव्याः। मनुनोक्तं यत् –

**दह्यन्ते ध्यायमानानां धातूनां हि यथा मलाः।**

**तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्।।** मनुस्मृतिः ६.७१

धातूनां धायमानानां मलद्रव्याणि दह्यन्ते एवं मनसो रागादयश्चक्षुरादेश्च विषयप्रवणत्वादयो दोषाः प्राणायामेन विषयानभिध्यानाद्दह्यन्ते। तस्मात् भिक्षुकेण त्वेषा शुद्धिर्विशेषतोऽनुष्ठेया। एतादृशः पुरुषः आत्मज्ञानस्य मोक्षस्य वा अधिकारी स्वीक्रियते।

**आत्मज्ञानम्**

**अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा।**

**आधयो व्याधयः क्लेशा जरारूपविपर्ययः।।**

**भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३. ६३.६४

अर्थात् स्वध्येयसिध्यर्थं वैराग्यस्यावश्यकता वर्तते। वैराग्यप्राप्त्यर्थं मूत्रपुरीषादिपूर्णनानाविधगर्भवासागतयः पर्यालोचनीयाः। तथा च एकविंशतिः महारौरवादिनरकादिदुःखविषये चिन्तनमावश्यकम् भवति। निषिद्धा चरणादि क्रियाजन्या महारौरवादिनिरयपतनरुपा गतयः अस्मिन् वाक्यस्य चिन्तनमावश्यकम् भवति। तथा च आधयोः मनः पीडाः, शरीरस्य ज्वरादिव्याधयः, अतिसाराद्याः, अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः, जरा, रूपविपर्ययः, श्वसूकरखरोरगाद्यनेकजातिषु उत्पत्तिः इत्यादि बहुतरक्लेशावहं जगत्स्वरूपं पर्यालोच्य तत्परिहारार्थम् आत्मज्ञानोपाय भूतेन्द्रियजये प्रयतेत।

**आत्मज्ञानोपायाः**

याज्ञवल्क्यमुनिना आत्मज्ञानसिध्यर्थं साधनं दत्तम् यथादर्पणो मलाच्छन्नो रूपज्ञानोत्पादनसमर्थो न भवति तथैव अविपक्वरणो रागादिमलाक्रान्तचित्तोऽपि आत्मबोधे समर्थः नास्ति। अतः चित्तवृत्तिनां निरोधं कृत्वा आत्मध्यानं कुर्यात्। उक्तं यत् **– ध्यानयोगेन संपश्येत्सूक्ष्मआत्मात्मनि स्थितः।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.६४। योगश्चित्तवृति निरोधः स्यात् इति शास्त्रेउक्तम्। आत्मैकाग्रता ध्यानं प्रधानं भवति इति शास्त्रमर्यादा वर्तते। तस्या एव बाह्यविषयत्वोपरमः ध्यान, योगेन निदिध्यासतापरपर्यायेण सूक्ष्मशरीरप्राणादिव्यतिरिक्तः क्षेत्रज्ञ आत्मा आत्मनि ब्रह्मण्यवस्थितः इत्येवं तत्त्वं पदार्थयोरभेदं सम्यक् पश्येदपरोक्षी कुर्यात्। अत एव श्रुतौ आत्मा वारे द्रष्टव्यः इति साक्षात्काररुपं दर्शनमनूद्य तत्साधनत्वेन श्रोतव्यो,मन्तव्यो निदिध्यासितव्यः इति श्रवण, मनन, निदिध्यासनानि विहितानि। जन्म समये तु योनि सङ्कटनिर्गमान्महादुःखानुभवनं बाल्ये मोहं गुरुवश्यतामध्ययनादानक्लेशं यौवने च विषयाप्राप्तौ। तथा च अमार्गेण तदवाप्तौ विषयसेवनान्नरकपतनम् इत्यादि विषय सम्यक् प्रकारेण चिन्तनियम, मननं आवश्यकं भवति।

चित्तवृत्तिनिरोधेन आत्मैकाग्रतां कृत्वा ध्यानेन सूक्ष्मशरीरप्राणादिव्यतिरिक्तः क्षेत्रज्ञ आत्मा आत्मनि ब्रह्मण्यवस्थितः सम्यक् परोक्षी कुर्यात्। अत एव श्रुतौ आत्मावारे द्रष्टव्यः इति साक्षात्काररूपं दर्शवमनूद्य तत्साधनत्वेन **"श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"** इति बृहदारण्यकोपनिषद् ५.४.५ अनुसारेण दर्शितोऽस्ति। "इतिश्रवणमनननिदिध्यासनानि विहितानि सन्ति। याज्ञवल्क्येन उपासनीयात्यस्वरूपं प्रतिपादितम् यत् –

**द्वासप्ततिसहस्राणि हृदयादभिनिः सृताः।**

**हिताहिता नाम नाड्यस्तासां मध्ये शशिप्रभम्।।**

**मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः।**

**स ज्ञेयस्तं विदित्वेह पुनराजायते न तु।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.१०८.१०९

अर्थात् हृदयप्रदेशादभिनिः सृताः कदम्बकुसुमकेसरवत्सर्वतो निर्गता हिताहितेति संज्ञकाः द्वासप्ततिसहस्राणि नाड्यो भवन्ति। अपरास्तिस्रो नाड्यस्तासामिडापिङ्गलाख्ये द्वे नाड्यौ सव्यदक्षिणपाश्र्वगते हृदि विपर्यस्ते नासाविवरसंबद्धे प्राणापानायतने। सुषुम्नाख्या पुनस्तृतीया दण्डवन्मध्ये ब्रह्मरन्ध्रविनिर्गता। तासां नाडीनां मध्ये मण्डलं चन्द्रप्रभं तस्मिन्नात्मा निर्वातस्थदीप इवाचलः प्रकाशमान आस्ते स एवं भूतो ज्ञातव्यः। यतस्तत्साक्षात्करणादिह संसारे न पुनः संसरति अमृतत्त्वञ्च प्राप्नोति।

**आत्मस्वरूपम्**

याज्ञवल्क्येन आत्मस्वरूपविषये प्रतिपादितम् यत् –

**निःसरन्ति यथा लोहपिण्डात्तप्तात्स्फुलिङ्गकाः।**

**सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति हि।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.६७

**आकाशमेकं हि यथा घटादिषु पृथग्भवेत्।**

**तथात्मैको ह्यनेकश्च जलाधारेष्विवांशुमान्।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.१४४

**ब्रह्मखानिलतेजांसि जलं भूयश्चधातवः।**

**इमे लोका एष चात्मा तस्माच्च सचराचरम्।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.१४५

अर्थात् तप्तलोहपिण्डात् स्फुलिङ्गका निःसरन्ति तथैव परमात्मनो जीवात्माः प्रभवन्ति हि यस्मात् तस्मात्युज्यत एव जीवपरमात्मनो भेदव्यपदेशः। यथैकमेव गगनं कूपकुम्भाद्युपाधिभेदेन भिन्नं नानेवानुभूयते यथा वा भानुरेकोऽपि भिन्नेषु जलपात्रेषु करकमणिकमल्लिकादिषु नानेवानुभूयते तथैकोऽप्यात्मा अन्तः करणोपाधिभेदेन भिन्नत्वं प्रतीयते। ब्रह्म, खम्, अनिलः, तेजः, जलम्, भूश्चेत्येते वातादिधातव एव शरीरं व्याप्य धारयन्तीति। तत्र पञ्चधातवः जडत्वं सन्ति तथा आत्माज्ञानमयं विद्यन्ते। एतस्या जडाजडसमुदायस्थावरजङ्गमात्मकं जगदुत्पद्यते। एतदेव हृदये दीपवत्प्रभुः स्थितोऽस्ति।

**आत्मत्तत्वप्राप्तिः**

आत्मतत्त्वप्राप्त्यर्थं याज्ञवल्क्यमुनिना प्रतिपादितं यत् – आचार्यसेवा, सत्पुरूषसङ्गः, ललनालोकनालम्भयोः परित्यागः, परिग्रहाणां त्यागः, इन्द्रियाणां प्रवृत्तिनिरोधः, तन्द्रालस्ययोः त्यागः, सूक्ष्मप्राणिवधादिदोषपरामर्शः, बाह्यान्तः करणसंयमः, वेदान्तार्थेषु विवेकित्वम्, तत्प्रतिपादितध्यानकर्मानुष्ठानम्, सर्वभूतेषु आत्मदर्शनम्, जीर्णकाषायधारणम्, शरीरपरिसंख्यानम्, रजस्तमोविधुरता, प्राणायामादिभिर्भावशुद्धिः एतैरुपायैः सम्यक् शुद्धः केवलसत्त्वयुक्तो ब्रह्मोपासनेनामृती भवेत् अर्थात् मुक्तो भवति। तथाचोक्तं –

**तत्त्वस्मृतेरूपस्थानात्सत्त्वयोगात्परिक्षयात्।**

**कर्मणां सन्निकर्षाच्च सतां योगः प्रवर्तते।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.१६०

अर्थात् आत्मतत्त्वं सदैव स्मरणात्, आत्मनि निश्चलोपस्थानात्, सत्त्वशुद्धियोगात्, केवलसत्त्वगुणयोगात्कर्मबीजानां परिज्ञानात्, सत्पुरूषाणां संङ्गात्, आत्मयोगः प्रवर्तते। तथा च याज्ञवल्क्येन मोक्षमार्गं प्रतिपादितं यत् –

**अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि।**

**सितासिताः कर्बुरुपाः कपिला नीललोहिताः।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.१६६

**ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम्।**

**ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्।।** याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः ३.१६७

अर्थात् योऽसौ हृदि प्रदीपवत्स्थितो जीवस्तस्यानन्ता रश्मयो नाड्यः सुखदुःख–हेतुभूताः सितासितकर्बुरूपाः, कपिला, नीललोहितारूपाः, सर्वतः स्थितास्तेषामेको रश्मिरुध्वव्यवस्थितः योऽसौ सूर्यमण्डलं निर्भिद्य हिरण्यगर्भनिलयं चातिक्रम्य वर्तते। तेन जीवः परां गतिं प्राप्नोति अर्थात् तस्य इह संसारे पुनरागमनं न भवति। ते मोक्ष मार्गं प्राप्नुवन्ति। यतिधर्मविषयस्य सूत्रात्मकरुपेण धर्मशास्त्रनिर्णयः –

- विशीर्णान्यमलान्येव चेलानि प्रथितानि तु। कृत्वा कन्थां बहिर्वासो धारयेद् धातुरञ्जितम्।। रथ्यायां बहुवस्त्राणि भिक्षा सर्वत्र लभ्यते। भूमिः शय्याऽस्ति विस्तीर्णा यतयः केन दुःखिताः।। – नारदपरिव्राजकोपनिषद् ३।३०; यतिधर्मसङ्ग्रह, पृ.२४, २५, १४६; सन्न्यासोपनिषद् २।९९।

- कौपीनं दण्डमाच्छादनं च स्वशरीरोपभोगार्थं च लोकस्योपकारार्थाय च परिग्रहेत्। परमहंसोपनिषद्, पृ.१६६।
- कौपीनयुगलं कन्था दण्ड एकः परिग्रहः। यतेः परमहंसस्य नाधिकं तु विधीयते।। नारदपरिव्राजकोपनिषद् ३।२८।
- कुण्डिकां चमसं शिक्यं त्रिविष्टब्धमुपानहौ। शीतोपघातिनीं कन्यां कौपीनाच्छादनं तथा।। पवित्रं स्नानशाटीं च उत्तरासङ्गमेव च। अतोऽतिरिक्तं यत् किञ्चत् सर्वं तद् वर्जयेद् यतिः।। – कुण्डिकोपनिषद् ९,१०;। कठरुद्रोपनिषद् १,२;। सन्यासोपनिषद् ३।
- कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम्। पादुके चाऽपि गृह्णीयात् कुर्यान् नान्यस्य सङ्ग्रहम्।। यति., पृ.२४।
- यतिपात्राणि मृद्वेणुदार्वलावुमयानि च। सलिलं शुद्धिरेतेषां गोबालैश्चावघर्षणम्।। – याज्ञवल्क्यस्मृति ३।६०,। यति., पृ.७८।
- अथातः परमहंसपरिव्राजकानामासनशयनादिकं भूमौ ब्रह्मचारिणाम्, मृत्पात्रं वाऽलावुपात्रं वा दारुपात्रं वा। – आरुणिकोपनिषद्, पृ.१४८।
- अलावुं वेणुपात्रं च दारवं मृन्मयं तथा। भिक्षोश् चत्वारि पात्राणि पञ्चमं नैव विद्यते।। – शिवपुराण ६÷२०।३३।
- इह यतयो भिक्षार्थं ग्रामं प्रविशन्ति पाणिपात्रमुदरपात्रं वा ओं हि ओं हीत्येतदुपनिषदं विन्यसेत्। – आरुणिकोपनिषद्, पृ.१४८।
- औषधवदशनमाचरेत्। – आरुणिकोपनिषद्, पृ.१४८।
- एककालं चरेद् भैक्षं न प्रसज्येत विस्तरे। भैक्षे प्रसक्तो हि यतिर् विषयेष्वपि सज्जति।। – मनुस्मृति ६।५५।
- असक्तः प्राणरक्षार्थं पुनर्मूलफलादिकम्। भक्षयन् नैव दृष्येत भेषजं दन्तधावनम्।। – जावालदर्शनो., यति., पृ.११५।
- भिक्षुर् द्विर् भोजनं कुर्यात् कदाचिज् ज्ञानदुर्बलः। स्वस्थावस्थो यदा लौल्यात् तदा चान्द्रायणं चरेत्।। – यमवचन, यतिधर्मसङ्ग्रह, पृ.११३, ११५।
- विधूमे सन्नमुसले वानप्रस्थप्रतिश्रये। काले प्राप्ते चरन् भैक्षं कल्पते ब्रह्मभूयसे।। – शान्तिपर्व २४२।८।
- हितं मितं सदाऽश्नीयात् यत् सुखेनैव जीर्यति। धातुः प्रकुप्यते येन तदन्नं वर्जयेद् यतिः।। – यतिधर्मसङ्ग्रह, पृ.८०।

- यावतोदरपूर्तिः स्यात् तावद् भैक्षं समाचरेत्। सिक्थमप्यधिकं भिक्षुराददानो व्रजत्यधः।। – यतिधर्मसङ्ग्रह, पृ.८१।
- मिताशनो भवेन् नित्यं भिक्षुर् मोक्षपरायणः। कामदर्पादयो दोषाः न भवन्ति मिताशिनः।। – यतिधर्मसङ्ग्रह, पृ.८०।
- पांसुना च प्रतिच्छन्नः शून्यागारप्रतिश्रयः। वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाऽप्रियः।। यत्राऽस्तमितशायी स्यान् निरग्निरनिकेतनः। यथालब्धोपजीवी स्यान् मुनिर् दान्तो जितेन्द्रियः।। – नार. ५। १३,१४।
- नाऽराजके जनपदे चरत्येकचरो वशी। भावयन्नात्मनाऽऽत्मानं यत्रसायंगृहो मुनिः।। – वाल्मीकिरामायण २। ६७। २३।
- स यथाशास्त्रदृष्टेन मार्गेणेह परिभ्रमन्। वार्षिकाँश् चतुरो मासान् पुरा मयि सुखोषितः।। – शान्तिपर्व ३२०। २६।
- ग्राम एकरात्रं पत्तने पञ्चरात्रं क्षेत्रे पञ्चरात्रं तीर्थे पञ्चरात्रमनिकेतः स्थिरमतिर् नाऽनृतवादी गिरिकन्दरेषु वसेत्। – नारदपरिव्राजकोपनिषद् ७। २।
- ग्राम एकरात्रं तीर्थे त्रिरात्रं पत्तने पञ्चरात्रं क्षेत्रे सप्तरात्रमनिकेतनः स्थिरमतिरनग्निसेवी (वसन्)। – परमहंसपरिव्राजकोपनिषद्।
- ग्रामैकरात्रनिवासिनो नगरे तीर्थेषु पञ्चरात्रं वसन्तः। – आश्रमोपनिषद् ४।
- अथ हंसा नाम ग्राम एकरात्रं नगरे पञ्चरात्रं क्षेत्रे सप्तरात्रं तदुपरि न वसेयुः। – भिक्षुकोपनिषद्।
- कृशो भूत्वा ग्राम एकरात्रं नगरे पञ्चरात्रं चतुरो मासान् वार्षिकान् ग्रामे वा नगरे वाऽपि वसेत्। पक्षा वै मासो इति द्वौ मासौ वा वसेत्। – सन्न्यासोपनिषद् १। १।
- एकरात्रं वसेद् ग्रामे त्रिरात्रं नगरे तथा। भैक्षेण वर्तयेन् नित्यं नैकान्नादी भवेद् यतिः।। – नारदीयपुराण १। २७। ९५।
- कल्पस् त्वेवं परित्यज्य देहमात्रावशेषितः। ग्रामैकरात्रविधिना निरपेक्षश् चरेन् महीम्।। – भागवत ७। १३। १।
- एकरात्रस्थितिर् ग्रामे पञ्चरात्रस्थितिः पुरे। तथा तिष्ठेद् यथा प्रीतिर् द्वेषो वा नाऽस्य जायते।। – विष्णुपु. ३। ९। २८।
- एकरात्रं वसेद् ग्रामे त्रिरात्रं पत्तने वसेत्। यो याति स यतिः प्रोक्तो योऽन्यो योगविडम्बकः।। – स्कन्दना. १८५। ३३।
- नगरे पञ्चरात्रिकाः, ग्रामे चैकरात्रिकाः। – शान्तिपर्व १९२। ३।

- न चैकत्र समासक्तो न चैकग्रामगोचरः। मुक्तो ह्यटति निर्मुक्तो न चैकपुलिनेशयः।। – अनुशासन. १४१। ८७।
- परिव्राजकस्य (स्वधर्मः) – संयतेन्द्रियत्वम् अनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्राऽरण्यवासो बाह्य– माभ्यन्तरं च शौचम्। – कौटलीय अर्थशास्त्र १। ३।
- नीरुजश् च युवा चैव भिक्षुर् नाऽऽवसथे वसेत्। – सन्न्यासोपनिषद् २। ९३। – यतिधर्मसङ्ग्रह., पृ.१०७।
- वानप्रस्थगृहस्थाभ्यां न संसृज्येत कर्हिचित्। अज्ञातचर्यां लिप्सेत न चैनं हर्ष आविशेत्।। – नारदपरिव्राजको ५। १९।
- निस्सङ्गता मुक्तिपदं यतीनां सङ्गादशेषाः प्रभवन्ति दोषाः। आरूढयोगो विनिपात्यतेऽधस् सङ्गेन योगी किमुताल्पबुद्धिः।। – विष्णुपुराण ४। २। १२४।
- अनमित्रश् च निर्वन्धुरनपत्यश् च यः क्वचित्। त्यक्तधर्मार्थकामश् च निराकाङ्क्षी च मुच्यते।। आश्व.१९। ६।
- वासे बहूनां कलहो भवेद् वार्ता द्वयोरपि। एक एव चरेत् तस्मात् कुमार्या इव कङ्कणः।। भागवत ११। ९। १०।
- नगरं न हि कर्तव्यं ग्रामो वा मिथुनं तथा। एतत् त्रयं प्रकुर्वाणः स्वधर्माच् च्यवते यतिः।। नारदपरिव्राजको. ३। ५७।
- एक एव चरेद् भिक्षुरात्मारामोऽनपात्रयः। सर्वभूतसुहृच् छान्तो नारायणपरायणः।। – भागवत ७। १३। ३।
- न शिष्याननुबध्नीत ग्रन्थान् नैवाभ्यसेद् बहुन्। न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित्।। – भागवत ७। १३। ८।
- त्रैवर्गिकॉस् त्यजेत् सर्वानारम्भानवनीपते। मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु।। विष्णुपुराण ३। ९। २६।
- आविकं त्वधिकं वस्त्रं तूलीं तूलपटीं तथा। प्रतिगृह्य यतिश् चैतान् पतते नाऽत्र संशयः।। – यतिधर्मसङ्ग्रह, पृ.१०९, सन्न्यासोपनिषद् २। ९५–९६।
- विधवां कञ्चुकोपेतां सधवां कञ्चुकं विना। यतिं च कञ्चुकोपेतं दृष्ट्वा चक्षुर् निमीलयेत्।। – यतिधर्म, पृ.१११।
- ऊर्णा केशोद्भवा ज्ञेया मलकीटोद्भवः पटः। कस्तूरीं रोचनां रक्तं वर्जयेदात्मवान् यतिः।। – यतिधर्म., पृ.१११।

- अन्यद् वस्त्रादिकं सर्वं त्यजेन् मूत्रपुरीषवत्। ऊर्जा तु रोमसम्भूता कृमेर् मलयुतं पटः।। कस्तूरीं रोचनां रक्तं प्राण्यङ्गमस्थिसन्निभम्। एतान् स्पृष्ट्वा प्रमादेन स्वधर्माच् च्यवते यतिः।। – यतिधर्म., पृ.१११।
- चित्रवस्त्रं तु न ग्राह्यमपि कार्पाससम्भवम्। तथा कीटोद्भवं चीनं त्यजेच् छुनकसङ्गवत्।। – यतिधर्म., पृ. ११२।
- एकान्नादी भवेद् यस् तु कदाचिल् लम्पटो यतिः। न तस्य निष्कृतिर् दृष्टा प्रायश्चित्तायुतैरपि।। लोभाद् यदि यतिर् विप्र तनुपोषपरो भवेत्। स चण्डालसमो ज्ञेयो वर्णात्रमविगर्हितः।। –नारदीयपुराण १। २७। ९८,९९,। सौरपुराण २०। १४–१५।
- यस् तु मोहेन वाऽन्यस्मादेकान्नादी भवेद् यतिः। न तस्य निष्कृतिः का चिद् धर्मशासेषु कथ्यते।। – कूर्म. २। २९। १७।
- एकान्नं तु त्र्यहं भुक्त्वा निरन्तरमनापदि। प्राणायामशतं कुर्याच् छुध्यर्थं यतिरात्मवान्।। – यतिधर्म., पृ.११६।
- भैक्षं वा सर्ववर्णेभ्य एकाऽन्नं वा द्विजातिषु। अपि वा सर्ववर्णेभ्यो न चैकाऽनं द्विजातिषु।। – स्मृतिसन्, पृ. १८४२।
- चरेन माधुकरं भैक्षं यतिर् म्लेच्छकुलादपि। एकान्नं न तु भुञ्जीत बृहस्पतिसमादपि।। – संन्यासोपनिषद् २। ७१।
- माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम्। तात्कालिकं चोपपन्नं भैक्षं पञ्चविधं स्मृतम्।। संन्यासो. २। ६५।
- भिक्षित्वा वर्तमानानां योगिनां सिद्धिकाङ्क्षिणाम्। मदमात्सर्यमानाद्या दोषा गच्छन्ति संक्षयम्।। – शाण्डिल्य, ३। ४३।
- घृतं श्वमूत्रसदृशं मधु स्यात् सुरया समम्। तैलं सूकरमूत्रं स्यात् सूपं लशुनसम्मितम्।। माषापूपादि गोमांसं क्षीरं मूत्रसमं भवेत्। तस्मात् सर्वप्रयत्नेन घृतादीन् वर्जयेद् यतिः।।। संन्यासोपनिषद् २। ७५,७६।
- मधुकरवृत्याऽऽहारमाहरन् कृशो भूत्वा मेदोवृद्धिमकुर्वन् आज्यं रुधिरवत् त्यजेत्।। – नारदपरिव्राजकोपनिषद् ७। १।
- यथालाभमश्नीयात् प्राणसन्धारणार्थं यया मेदोवृद्धिर् न जायते। – सन्यासोपनिषद् १। १।

- मधुकरवृत्त्याऽऽहारमाहरन् कृशीभूत्वा मेदोवृद्धिमकुर्वन् विहरेत्। सन्यासोपनिषद् २। ५९।
- माधुकरेणाऽन्नमश्नन् मेदोवृद्धिमकुर्वन् कृशीभूत्वा चरेत्। – परमहंसपरिव्राजकोपनिषद्।
- न वै देवान् पीवरोऽसंयतात्मा रोरूयमाणः ककुदी समश्नुते। चलत्तुन्दी रभसः कामवादी कृशास इत्यणवस् तत्र यान्ति।। – बौधायनधर्मसूत्र १। १०÷३२। ऋग्वेदखिल ४।९।५।
- अनृत गु हि कृत्त्वा मेद्यति। – मावाशुयवे. शतपथब्राह्मण २।४।२।६।
- अल्पान्नाभ्यवहारेण रहःस्थानासनेन च। ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत्।। – मनुस्मृति ६।५९।
- जवो हि सप्तेः प्रथमं विभूषणं त्रपाऽङ्गनानां कृशता तपस्विनाम्। श्रुतं द्विजानां धनिनामगर्वता पराक्रमः शस्त्रबलोपजीविनाम्।। – शिष्टसुभाषित।
- सामर्थ्ये शिबिकामश्वं गजं वृषभमेव च। शकटं च रथं वाऽपि समारुह्य च कामतः।। व्रतं सान्तपनं कुर्यात् प्राणायामशतान्वितम्। असामर्थ्ये समारुह्य कृच्छ्रमेकं विशोधनम्।।–द्र–यतिधर्म., पृ.१११–।
- मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च। दिवास्वापश्च यानं च यतीनां पतनानि षट्।। – नारदपरिव्राजको ३। ७१।
- दूरयात्रां प्रयत्नेन न वर्जयेदात्मचिन्तकः। सदोपनिषदं विद्यामभ्यसेन् मुक्तिर्हेतुकीम्।। न तीर्थसेवी नित्यं स्यान् नोपवासपरो यतिः। न चाऽध्ययनशीलः स्यान् न व्याख्यानपरो यतिः।।–नारप. ३। ७२,७३।
- तीव्रज्ञानविरागाभ्यां सम्पन्नोऽपि यतिर् ध्रुवम्। स्त्रीवित्तभूषासद्वस्त्रसंसर्गाद् भ्रष्टतां व्रजेत्।। पुष्पचन्दनतैलादिसुगन्धिद्रव्यवर्जनम्। त्यागी कुर्वीताऽन्यथा तु भवेद् देहात्मधीः स वै।। स्कन्दवै.९।२३।२५,२६।
- कामो लोभो रसास्वादः स्नेहो मानस्तथा च रुट्। एते त्याज्याः प्रयत्नेन षड् दोषाः संसृतिप्रदाः।। – स्कन्दवै १। २३। ३९।
- ब्रह्मचारी यतिर् वाऽपि यस्मिन् देशे यदा तदा। पाचनं कुरुते मोहात् तद् राष्ट्रं तत्क्षणात् परम्।। निर्मानुष्यं शुष्कजलमा शताब्दाद् भविष्यति। स्मृतिसन्दर्भ, पृ.२७४०।

- स्वयं पक्त्वा तु यो भुङ्क्ते तस्य सान्तपनत्रयम्। पाचयित्वा तु यो भुङ्क्ते तस्य कृच्छ्रं विधीयते।। – यति., पृ.१२०।
- छेदने भेदने पाके यतिर् यस्तु प्रवर्तते। तादृशं कश्मलं दृष्ट प्रेताशौचं विधीयते।।–द्र. यतिधर्मसङ्ग्रह, पृ.१०९।
- यत्र वर्णी मस्करी वा पाकार्थं पावके तृणम्। इन्धनं वा निक्षिपतस् तद् राष्ट्रं लयमेति वै।। –लौगाक्षिस्मृति, स्मृतिसन्दर्भ, षष्ठ भाग, पृ. ३३१।
- पक्वं वा यदि वाऽपक्वं पाचयेद् यः क्वचिद् यतिः। स्वधर्मस्य तु लोपेन तिर्यग्योनिं व्रजेद् यतिः।। – यति, पृ.१०८।
- कणपिण्याकतक्रं वा शाकमूलफलादिकम्। पक्वं वा यदि वाऽपक्वं पचन्नज्ञानतो यतिः।। आचरेत् त्रीणि कृच्छ्राणि प्राकृतान्येव शुद्धये। अभ्यासाद् बुद्धिपूर्वं हि पाकदोषान् न मुच्यते।। – यतिधर्म, पृ.११७।
- अन्नदानपरो भिक्षुर् वस्त्रादीनां प्रतिग्रही। उभौ तौ मन्दबुद्धित्वात् पूतीनरकशायिनौ। – यतिधर्मसङ्ग्रह, पृ.१०८।
- यत्यन्नं यतिपात्रस्थं यतिना प्रेरितं च यत्। अन्नत्रयं न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत्।। – यतिधर्मसङ्ग्रह, पृ.११५।, संस्कारगणपति, पृ.८७२।
- अन्नदानपरो भिक्षुश् चतुरो हन्ति दानतः। दातारमन्नमात्मानं यस्मै चाऽन्नं प्रयच्छति।। – यतिधर्मसङ्ग्रह, पृ.११०।
- माधूकरं समाहृत्य ब्राह्मणेभ्यो ददाति यः। स याति नरकं विप्रो भोक्ता चान्द्रायणं चरेत्।। – यतिधर्मसङ्ग्रह, पृ.११०।
- आत्यन्तिकं ब्रह्मचर्यमाश्रमत्रयवासिनाम्। स्वदारनियमात् सम्यग् ब्रह्मचारी गृहाश्रमी।। – यतिधर्मसङ्ग्रह, पृ.२७।
- नामगोत्रादिचरणं देशं कालं कुलं श्रुतम्। वयो वृत्तं व्रतं शीलं ख्यापयेन् नैव सद्यतिः।। – यतिधर्मसङ्ग्रह, पृ.१०३।
- प्रतिग्रहं न गृहणीयान् नैव चाऽन्यं प्रदापयेत्। प्रेरयेद् वा तथा भिक्षु स्वप्नेऽपि न कदाचन।। –यतिधर्म,, पृ.१०८।
- द्रव्यस्त्रीमांससम्पर्कान् मधुमाक्षिकलेहनात्। विचारस्य परित्यागाद् यतिः पतनमृच्छति।। – यतिधर्मसङ्ग्रह, पृ.११०।
- परार्थं न प्रतिग्राह्यं न दद्याच् च कथञ्चन। – सन्न्यासोपनिषद् २।९३, पृ.४८१।

- सन्न्यासी यो हि भूत्वा तु हिरण्यं सङ्गहेद् यदि। तस्य दर्शनमात्रेण सचैलो जलमाविशेत्।। द्रव्याऽऽदानं यतिर् यो वे प्रकरोति नराधमः। पच्यते नरके घोरे यावदाभूतसम्प्लवम्।। – वायु, यतिधर्म., पृ.११९।
- भूमिर् गावो हिरण्यं च यतेर् यस्य परिग्रहः। तादृशं कश्मलं दृष्ट्वा सचैलो जलमाविशेत्।। – यतिधर्म., पृ.११०।
- परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति। – जाबालोपनिषद्, खण्डिका–५।
- ते ह स्म पुत्रैषणायाश्च्च वित्तैषणायाश्च्च लोकेषणायाश्च्च व्युत्थायाऽथ भिक्क्षाचय्र्यञ् चरन्ति। – मावाशुयवे. शतपथब्राह्मण १४।६।४।१, १४÷७÷२÷२६ः कावाशुयवे. बृहदारण्यकोपनिषद् ३। ५÷१ः ४।४।२२।
- मुण्डोऽममोऽक्रोधोऽपरिग्रहः। वासिष्ठधर्मसूत्र १०।६।
- काञ्चनं च तिला गावो भूमिर् धान्यं धनं स्त्रियः। प्रतिगृह्य यतिश् चैतान् पतते नाऽत्र संशयः।। – यतिधर्म, पृ.११०।
- यतीनां काञ्चनं दत्त्वा ताम्बूलं ब्रह्मचारिणे। चौराणामभयं दत्त्वा दाताऽपि नरकं व्रजेत्।। – पराशरस्मृति १। ६०। यतिधर्मसङ्ग्रह, पृ.१०३।
- शुक्लवस्त्रं च यानं च ताम्बूलं धातुमेव च। प्रतिगृह्य कुलं हन्यात् प्रतिगृह्णाति यस्य च।। – पराशरस्मृति १६१।
- कन्या–भू–स्वर्ण–रत्ना–ऽश्व–गजवाहनसञ्चयाः। यतिवर्णिप्रदत्तास् ते गृहिणो नरकप्रदाः।। – कपिलस्मृति, श्लो.९४६–।
- तिलधान्यहिरण्यं च गोभूदासीगृहादिकम्। तदादाय निषिद्धं तु योऽश्नुते तं त्यजेद् यतिम्।। स साधुभिर्बहिष्कार्यः स्मृतोऽसौ पतितो यतिः। तं दृष्ट्वा भिन्नमर्यादं स्नानं कुर्यात् सहाम्बरम्।। – यतिधर्म., पृ.१०९।
- अध्यात्मपुस्तकं विप्रैर् दत्तं गृह्णीत भिक्षुकः। न तावद् द्रव्यमादाय लेखयेद् दोषदर्शनात्।। –यतिधर्मसङ्ग्रह, पृ.२५।
- आशीर्युक्तानि कर्माणि हिंसायुक्तानि यानि च। लोकसङ्ग्रहधर्मं च नैव कुर्यान् न कारयेत्।। –आश्व. ४६।३९।
- समो भूतेषु हिंसाऽनुग्रहयोः। – गौतमधर्मसूत्र १।३।२३।
- अनिहोऽनमुत्रश् चरेत्। आपस्तम्बधर्मसूत्र २।९।१।२०।

- द्वाविमौ न विराजेते विपरीतेन कर्मणा। निरारम्भो गृहस्थश्च कार्यवाश् चैव भिक्षुकः।। – यतिधर्मसङ्ग्रह, पृ.१०४,१४७; नारदपरिव्राजकोपनिषद् ६।३०।
- त्रैवर्गिकॉस् त्यजेत् सर्वानारम्भानवनीपते। मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु।। विष्णुपुराण ३।९।२६–३३।
- न शिष्याननुबन्धीत ग्रन्थान् नैवाभ्यसेद् बहुन्। न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित्।। नारदपरिव्राज, ५÷४९।
- शौचं स्नानं तथा भिक्षां नित्यमेकान्तसेवनम्। भिक्षोश् चत्वारि कर्माणि पञ्चमं नैव विद्यते।। शिव. ६।२०।३२।
- दम्भन्यासमिषेण वञ्चितजनं भोगैकचिन्तातुरं सम्मुह्यन्तमहर्निशं विरचितोद्योगक्लमैराकुलम्। आज्ञालधिनमज्ञमज्ञजनतासम्माननाऽसन्मदं दीनानाथदयानिधानपरमानन्दप्रभो पाहि माम्।। –भागवत १०।८७÷३९।
- ब्रह्मचर्यमहिंसा च सत्यमस्तेयमार्जवम्। वेदान्तश्रवणं ध्यानं भिक्षोः कर्माणि नित्यशः।। – यतिधर्मसङ्ग्रह, पृ.१४६।
- दद्यान् नाऽवसरं किञ्चित् कामादीनां मनागपि। आसुप्तेरामृतेः कालं नयेद् वेदान्तचिन्तया।। – यतिधर्म., पृ.१५९।
- स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्। कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः।। विष्णुपुराण ६।७।३७।
- अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च। आध्यात्मिकं च सततं वेदान्ताऽभिहितं च यत्।। इदं शरणमज्ञानामिदमेव विजानताम्। इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम्।। मनुस्मृति ६÷८३,८४।
- यतज् ज्ञानं परं प्रोक्तं पूजैषैव परा स्मृता। यदनारतमन्तस्थशुद्धचिन्मात्रवेदनम्।ः। – यतिधर्मसङ्ग्रह, पृ.१५१।
- अहं ब्रह्मेति वाक्यार्थबोधो यावद् दृढो भवेत्। शमादिसहितस् तावदभ्यसेच् छ्रणादिकम्।। – यतिधर्म, पृ.१५९।
- नाभिनन्देत मरणं नाभिनन्देत जीवितम्। कालमेव प्रतीक्षेत निदेशं भृतको यया।। – मनु.६।४५, शान्ति.२४५÷१५।
- बहिर् भ्रमति यः कश्चित् त्यक्त्वा देहस्थमीश्वरम्। स्वगृहे पायसं त्यक्त्वा भिक्षामटति दुर्मतिः।। – यतिधर्म, पृ.३१।

- पाषाणलोहमणिमृन्मयविग्रहेषु पूजा पुनर्जननभोगकरी मुमुक्षोः। तस्माद् यतिः स्वहृदयार्चनमेव कुर्याद् बाह्यार्चनं परिहरेदपुनर्भवाय।। – मैत्रेय्युपनिषद् २।२६।
- न वाह्यदेवार्चनं कुर्यात्। – नारदपरिव्राजकोपनिषद् ७। १, सन्न्यासोपनिषद् १।५१।
- शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः। अज्ञानां भावनार्थाय प्रतिमाः परिकल्पिताः।। – जाबालदर्शनो. ४।५१।
- यद्यनुत्पन्नविज्ञानो विरक्तः प्रीतिसंयुतः। यावज्जीवं जपेद् युक्तः प्रणवं ब्रह्मणो वपुः।। अथवा शतरुद्रीयं जपेदामरणाद् द्विजः। एकाकी यतचित्तात्मा स याति परमं पदम्।। कूर्मपुराण २।११।९९–१००।
- ध्यानं शौचं तथा भिक्षा नित्यमेकान्तशीलता। भिक्षोश् चत्वारि कर्माणि पञ्चमं नोपपद्यते।। – दक्षस्मृति ७। ३८। (लाभपूजानिमित्तं तु व्याख्यानं शिष्यसङ्ग्रहः। एते चान्ये च बहवः प्रपञ्चाः कुतपस्विनाम्।। दक्षस्मृ. ७।३७)।
- वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि। एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते।। सर्वभावविनिर्मुक्तं क्षेत्रज्ञं ब्रह्मणि न्यसेत्। एतद् ज्ञानं च ध्यानं च शेषोऽन्यो ग्रन्थविस्तरः।। – दक्षस्मृति ७÷१५, २१।
- अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः। स्नानं मनोमलत्यागः शौचमिन्द्रियनिग्रहः।। – मैत्रेय्युपनिषद् २।२।
- कपालं वृक्षमूलानि कुचैलमसहायता। उपेक्षा सर्वभूतानामेतावद् भिक्षुलक्षणम्।। – शान्तिपर्व २४५।७; (द्र.– मनु.६।४४; नारदपरिव्राजकोपनिषद् ३।५४; पद्मसृष्टि. १९। ३२४ ; भविष्य.१।१४५। ४)।

तत्र मुमुक्षुणामुदयनानि व्याख्यास्यामः। तत्र लोकदोषदर्शिनो मुमुक्षोरादित एवाऽऽचार्याभिगमनम्, तस्योपदेशा– नुष्ठानम्, अग्नेरेवोपचर्या, धर्मशास्त्रानुगमनम्, तदर्थावबोधः, तेनावष्टम्भः, तत्र यथोक्ताः क्रियाः, सतामुपासनम्, असतां परिवर्जनम्, असङ्ङ्गतिर् दुर्जनेन, सत्यं सर्वभूतहितमपरुषमनतिकाले परीक्ष्य वचनम्, सर्वप्राणिषु चाऽऽत्मनीवाऽवेक्षा, सर्वासामस्मरणम् असङ्कल्पनम् अप्रार्थनम् अनभिभाषणं च स्त्रीणाम्, सर्वपरिग्रहत्याग, कौपीनप्रच्छादनार्थं धातुरागनिवसनम्, कन्यासीवनहेतोः सूचीपिप्पलकम्, शौचाधानहेतोर् जलकुण्डिका, दण्ड– धारणम्, भैक्ष्यचर्यार्थ पात्रम्, प्राणधारणार्थमेककालमग्राम्यो यथोपपन्न एवाऽभ्यवहारः, श्रमापनयनार्थं शीर्णशुष्क पर्णतृणास्तरणोपधानम्, ध्यानहेतोः कायनिवन्धनम्, वनेष्वनिकेतवासः, तन्द्रा–निद्रा–

ऽऽलस्यादिकर्मवर्जनम् इन्द्रियार्थेष्वनुरागोपतापनिग्रहः, सुप्तस्थितगतप्रेक्षिताहारप्रत्यङ्गचेष्टादिकेष्वारम्भेषु स्मृतिपूर्विका प्रवृत्तिः सत्कार-स्तुतिगांविमानक्षमित्वम्, क्षुत्पिपासाऽऽयासश्रमशीतोष्णवातवर्षासुखदुःख संस्पर्शसहत्वम्, शोकदैन्योद्वेगमदः मानलोभरागेर्ष्याभयक्रोधादिभिरसञ्चलनम्, अहङ्कारादिषूपसर्गसंज्ञा, लोकपुरुषयोः सर्गादिसामान्यावेक्षणम्, कार्यकालात्ययभयम्, योगारम्भे सततमनिर्वेदः, सत्त्वोत्साहः, अपवर्गाय धीधृतिस्मृतिबलाधानम्, नियमनमिन्द्रियाणां चेतसि, चेतस आत्मनि आत्मनश्चः धातुभेदेन शरीरावयसङ्ख्यानम् अभीक्ष्णम्, सर्व कारणवद् दुःखम् अस्वम् अनित्यम् इत्यभ्युपगमः, सर्वप्रवृत्तिषु दुःखसंज्ञा, सर्वसन्यासे सुखम् इत्यभिनिवेशः, एष मार्गोऽपवर्गाय, अतोऽन्यथा बध्यत इत्युदयनानि व्याख्यातानि। चरकसंहिता-शारीरस्थान ५।१२।

- प्रव्रज्यासु वृथाचारान् राजा दण्डेन वारयेत्। धर्मो ह्यधर्मोपहतः शास्तारं हन्त्युपेक्षितः।।-कौअ. ३।१६ (श्लो.१४३)।
- विद्यार्थं ब्रह्मचारी स्यात् सर्वेषां पालने गृही। वानप्रस्थः सन्दमने सन्न्यासी मोक्षसाधने। वर्तयन्त्यन्यथा दण्ड्या या वर्णाश्रमजातयः।। - शुक्रनीति ४।४।२-३।
- यश् चापि धर्मसमयाद् विच्युतो धर्मजीवनः। दण्डेनैव तमप्योषेत् स्वकाद् धर्माद् धि विच्युतम्।। मनु. ९।२७३। वैदिक धर्म मूल रुपमा पृ.९८२- ९८९।

**निष्कर्षः**

धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणं इत्यस्मिन् विषये सनातनवैदिकधर्मे मानवानां संरक्षणार्थं विभिन्नानां आश्रमधर्मस्य व्यवस्था विहिता वर्तते। तन्मध्ये यति धर्मान् स्थानमपि अग्रभागे दृश्यते। निष्कर्षरूपेण ज्ञायते यत् इन्द्रियैः अथवा मनसा परमतत्त्व प्राप्तिः असम्भवा एव। तत् केवलं आत्मज्ञानेन प्राप्यते यतो हि आत्मा सत्यमस्ति, मनः इन्द्रियश्च साधनरूपेण प्रतीयते। मुनिनोक्तं यत् आत्मनः श्रवण-मनन- चिन्तनने आत्मतत्त्वस्य अनुभवः भविष्यति। आत्मतत्त्वानुभवेन अमृतत्त्वं प्राप्यते। अस्य साक्षात्कारः केवलं मनसैव भवितुं शक्नोति। उक्तं यत् -" मनसैवानुदृष्टव्यम् " इति। किञ्चित बिन्दुरुपमात्रेण अत्र प्रस्तुयन्ते यथा -

- तमेतं वेदानुवचनेन ब्राह्मणा विधिदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन। बृहदारण्यकोपनिषद् ४।४।२२।

- वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः। श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः।। – याज्ञवल्क्यस्मृति ३।१९०।
- स्वातन्त्र्यात् सुखमाप्नोति स्वातन्त्र्याल् लभते परम्। स्वातन्त्र्यान् निर्वृतिं गच्छेत् स्वातन्त्र्यात् परमं पदम्।। – अष्टावक्रगीता १८।५०।
- ग्रामाच् छ्रोत्रियागारादग्निमाहृत्य स्वविध्युक्तक्रमेण पूर्ववदग्निमाजिघ्रेत्। खण्डिका–२।
- साऩ्यासिकं विधिं कृत्स्नं कारयित्वा विचक्षणः। ददौ तदैश्वरं ज्ञानं स्वशाखाविहितव्रतम्।। कूर्मपु. १।१४।३८।
- य आत्माऽपहतपाप्मा विजरो विमृत्युर् विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः। छान्दोग्यो. ८।७।१। स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म। कावाशुयवे. वृहदारण्यकोपनिषद् ४।४।२५। निष्कलं निष्क्रियं शान्तम्। श्वेताश्वतरोपनिषद् ६।१९। सत्यं ज्ञानमनन्तं ब्रह्म। कावाशुयवे. बृहदारण्यकोपनिषद् ३।९।२८।
- निषेकादिश्मशानान्ता विधयो ब्राह्मणाश्रिताः। तस्माद् यतेस् तु संस्कारं मन्त्रवित् कुरुते गृही।। यति., पृ.१३३।
- ब्रह्मचर्यमहिंसा च सत्यमस्तेयमार्जवम्। वेदान्तत्रवणं ध्यानं भिक्षोः कर्माणि नित्यशः।। – यतिधर्मसङ्ग्रह, पृ.१४६।
- आत्तो वै सशरीरः प्रियाप्रियाभ्याम्। छान्दोग्योपनिषद् ८।१२।१।
- अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः। छान्दोग्योपनिषद् ८।१२।१।
- नाऽवेदविन् मनुते तं बृहन्तम्। आत्रेयतैत्तिरीयकृष्णयजुर्वेदब्राह्मण ३।१२।१९।७। बेदाऽहमेतम् पुरुषम् महान्तमादित्त्यवर्णन् तमसः परस्तात्। तमेव विदित्त्वाऽतिमृत्युमेति नाऽन्यः पन्था बिद्यतेऽयनाय।। – मावा. शुक्लयजुर्वेदमन्त्रार्षसंहिता ३१११८। यस्मिन् त्सब्वाणि भूतानिऽआत्त्मैवाऽभूद् द्विजानतः। तत्र को मोहः कः शोकऽएकत्त्वमनुपश्श्यतः।। – मावा. शुक्लयजुर्वेदमन्त्रार्षसंहिता ४०।७। तद् द्योयो देवानाम् प्रत्त्यबुद्ध्यत सऽएव तदभवत् तथर्षीणान् तथा मनुष्याणाम्।– मावाशुयवे. शतपथब्राह्मण १४।४।२।२१। कावाशुयवे. बृहदारण्यकोपनिषद् १।४।१०। ब्रह्मविदाप्नोति परम्। तैत्तिरीयोपनिषद् २।१।१। ज्ञात्वा देवम् मुच्यते सर्वपाशैः। श्वेताश्वतरोपनिषद् २।१५, ४।१६। तरति शोकमात्मवित्। छान्दोग्योपनिषद्

७।११३। एतद् यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य। मुण्डकोपनिषद् २।११०। ब्रह्मविद् ब्रह्मैव भवति। मुण्डकोपनिषद् ३।२।९।

- तद्योयो देवानाम् प्रत्यबुद्ध्यत सऽएव तदभवत् तथर्षीणान् तथा मनुष्याणाम्। तद् धैतत् पश्श्यन्नृषिर् व्वामदेवः प्रतिपेदेऽहम् मनुरभवः सूर्यश्श्‍ चेति तदिदमप्येतर्हि य एवंव् वेदाऽहम् ब्रह्मास्मीति सऽइदः सव्वम् भवति। मावाशुयवे. शतपथब्राह्मण १४।४।२।२१,२२ (कावाशुयवे. बृहदारण्यकोपनिषद् १।४।१०)।
- एवमात्रमधर्माणां साधनात् साधवो मताः। गृहस्थो ब्रह्मचारी च वानप्रस्थोऽव भिक्षुकः।। – वायुपुराण ११६१।२६।
- सन्न्यासीति च सर्वधर्मान् परित्यज्य निर्ममो निरहङ्कारो भूत्वा स्वतन्त्रो यतिश् चरति।– निरालम्बोपनिषद्, उपनिषत्सङ्ग्रह, पृ.२५६। यदा मनसि वैराग्यं जातं सर्वेषु वस्तुषु। तदैव सन्न्यसेद् विद्वानन्यथा पतितो भवेत्।। द्रव्यार्थमन्नवस्त्रार्थं यः प्रतिष्ठार्थमेव वा। सन्न्यसेदुभयभ्रष्टः स मुक्तिं नाऽऽप्तुमर्हति।। मैत्रेय्युपनिषद् २,१९,२०। यदा मनसि सञ्जातं वैतृष्ण्यं सर्ववस्तुषु। तदा सन्न्यासमिच्छेत पतितः स्याद् विपर्यये।। विरक्तः प्रव्रजेद् धीमान् सरक्तस्तु गृहे वसेत्। सरागो नरकं याति प्रव्रजन् हि द्विजाधमः।। – नारदपरिव्राज. ३।१२,१३। विद्यार्थं ब्रह्मचारी स्यात् सर्वेषां पालने गृही। वानप्रस्थः सन्दमने सन्न्यासी मोक्षसाधने।। – शुक्रनीति ४।४।२–३। तस्मात् त्यक्तकषायेण कर्तव्यं दण्डधारणम्। इतरस् तु न शक्नोति विषयैरभिभूयते।। – दक्षस्मृति ७।२८। सर्वेषामेव वैराग्यं सन्यासे तु विधीयते। पतत्येवाऽविरक्तो यः सन्यासं कर्तुमिच्छति।। कूर्मपुराण ११११। कषायं पाचयित्वा तु श्रेणिस्थानेषु च त्रिषु। प्रव्रजेच् च परं स्थानं परिव्राजमनुत्तमम्।। शान्तिपर्व २४५।३। अनिष्कषाये काषायमीहार्थमिति विद्धि तम्। धर्मध्वजानां मुण्डानां वृत्त्यर्थमिति मे मतिः।। शान्तिपर्व १८१३४। स गार्हस्थ्याच् च्युतश्च त्वं मोक्षं चाऽप्राप्य दुर्विदम्। उभयोरन्तराले वै वर्तसे मोक्षवार्तिकः।। – शान्ति ३२०।१७४।

**संन्यासाश्रमस्य कर्तव्याकर्तव्यविचारः**

सर्वभूतेभ्यः प्रियाप्रियकारिभ्यो हित उदासीनो, न पुनर्हिताचरणः। हिंसायामनुग्रहे च भूतेषु समो यो हिनस्ति यो वाऽनुगृह्णाति तत्र तत्र निर्विकारः। यथा– “समो भूतेषु हिंसानुग्रहयोः “ ऐहिकं पारत्रिकं च न कंचिदारम्भं कुर्यात्। “अनारम्भी शान्तो बाह्यान्तः

करणोपरतः त्रयो दण्डा अस्य सन्तीति त्रिदण्डी। ते च दण्डा वैणवा ग्राह्याः। प्राजापत्येष्ट्यनन्तरं त्रीन्वैणवान्दण्डान्मूर्धप्रमाणान्दक्षिणेन पाणिना धारयेत्सव्येन सोदकं कमण्डलुम् इति स्मृत्यन्तरदर्शनात्। एकं वा दण्डं धारयेत् "एकदण्डी त्रिदण्डी वा" इति बौधायनवचनात्। 'चतुर्थमाश्रमं गच्छेद् ब्रह्मविद्यापरायणः। एकदण्डी त्रिदण्डी वा सर्वसंगविवर्जितः।। इति चतुर्विंशतिमते दर्शनाच्च। तथा शिखाधारणमपि वैकल्पिकम्। सर्वानेव केशान्सह शिखया वापयेत् शिखावर्जं वापयेद्वा। मुण्डः शिखी वेति विकल्पेनैक दण्डत्रिदण्डग्रहणविकल्पोऽप्युक्तः। यथा– "मुण्डः शिखी वा" अत्र श्रुतिस्मृती–

**अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा।**

**सशिखीत्युच्यते विद्वान्नेतरे केशधारिणः।।**

**सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः।**

**एकदण्डं गृहीत्वा च भिक्षुधर्मं समाचरेत्।।**

**शिखी यज्ञोपवीती च यद्वा सम्यक्प्रबोधितः।**

**त्रिदण्डग्रहणं कृत्वा भिक्षुधर्मं समाचरेत्।।**

मुण्डोऽममोऽक्रोधोऽपरिग्रहः इति वसिष्ठस्मरणात्। तथा यज्ञोपवीतधारणमपि वैकल्पिकमेव। 'सशिखान्केशान्निकृन्त्य विसृज्य यज्ञोपवीतम्' इति काठकश्रुतिदर्शनात् कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः। केशान्यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः।। इति बाष्कलवचनात्। 'काषायो मुण्डस्त्रिदण्डी सकमण्डलुपवित्रपादुकासनकन्थामात्रः इति देवलस्मरणात्। शौचाद्यर्थं कमण्डलुसहितश्च भवेत्।

**एकरात्रं वसेद् ग्रामे नगरे रात्रिपञ्चकम्।**

**वर्षाभ्योऽन्यत्र वर्षासु मांसांस्तु चतुरो वसेत्।।**

तथा च याज्ञवल्क्यः3

**सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः।**

**एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्।।**

भिक्षाकाल एव ग्रामं प्रविशेत्। शेषकालं देवालयादौ वृक्षमूलेषु वा वसेत्। 'भिक्षार्थी ग्राममियात् अप्रमत्तो वाक्चक्षुरादिचापलरहितो भैक्षं चरेत्। आत्मानमेव ध्यात्वाऽनपेक्षमाणः प्राचीनमुदीचीं वा दिशं प्रव्रजेत् चतुर्षु वर्णेषु भैक्षचर्यां चरेत्। पाणिपात्रेणाऽशनं कुर्यात्। औषधवदशनमाचरेत्। औषधवदशनं प्राश्नीयात्। यथालाभमश्नीयात्। प्राणसन्धारणार्थं यथा मेदोवृद्धिर्न जायते, कृशी भूत्वा ग्रामे एकरात्रं, नगरे पञ्चरात्रं, चतुरो मासान् वार्षिकान् ग्रामे वा नगरे वापि वसेत्। "पक्षो वै मासा" इति

द्वौ मासौ वा वसेत्। विशीर्णं वस्त्रं वल्कलं वा प्रतिगृह्णीयात् नान्यत् प्रतिगृह्णीयात् यद्यशक्तो भवति।

संन्यासाश्रमे सततयोगाभ्यासो भ्रमणशीलजीवनयापनञ्च विहितं शास्त्रे। तद्यथा– 'यतमानो यतिः साधुः स्मृतो योगस्य साधनात्। संन्यासाश्रमस्य जीवनमादर्शमयं जीवनं भवति। इत्थं चतुर्ष्वपि आश्रमेषु वासं विधाय परमपुरुषार्थस्य मोक्षस्य सम्प्राप्तिं मानवः करोति। अयमेव मोक्षाख्यः परमपुरुषार्थोऽस्ति। स्वकीयकर्तव्यस्य फलप्राप्तुं विचारं न कृत्वा यो विचरणं करोति सः संन्यासी भवति। तद्यथा भगवद्गीतायाम् उल्लेखोऽस्ति। यत्–

**अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।**

**स संन्यासी च योगी च न निरग्निः न चाक्रियः।।**

**कृतज्ञताज्ञापनम्**

अस्मिन् आलेखे धर्मशास्त्रे धर्मशास्त्रदृष्ट्या धर्मशात्रप्रतिपादितयतिधर्मस्य समीक्षणम् एवं स्वरूपविश्लेषणक्रमे, सैद्धान्तिकविषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विषयविज्ञेभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् हार्दिकीं कृतज्ञतां व्यनज्मि।

**संदर्भग्रन्थसूची**

मनुस्मृति., मनु. (सन् २००७), अनु. शिवराज आचार्य कौण्डिन्न्यायन, वाराणसी : चौखम्बा संस्कृत संस्थान।

याज्ञवल्क्यस्मृतिः, याज्ञवल्क्यः, (सन् २०६५), (मिताक्षरा). वाराणसी : चौखम्बा संस्कृत संस्थान।

बृहदारण्यकोपनिषद्, (सन् २०११), भर्तु प्रपन्न भाष्यकारः, गीताप्रेस गोरखपुरम्।

सांख्यकारिका, (सन् २००६), ईश्वरकृष्णः, ज्वालाप्रसादगौड़,व्याख्याकारः, चौखम्भाविद्याभवनम् वाराणसी।

वायुपुराणम्, (सन् २०१८), शिवजीत सिंह, चौखम्भाविद्याभवनम्, वाराणसी,।

वैदिक धर्म मूल रूपमा, ( २०८०) शिवराज आचार्य कौण्डिन्न्यायन, स्वाद्ध्यायशाला, काठमाण्डौं।

# संस्कृतं - भारतवर्षस्य संस्कृतेः सम्पर्कस्य च भाषा

**प्रा. डा. नवराजकट्टेलः**

नेपालसंस्कृतविश्वविद्यालयः

**लेखसारः**

'संस्कृतं नाम दैवीवाक्' इति सर्वे जानन्ति। इयं भाषा प्राचीनतरा, परिष्कृता, वैदिकवाङ्मयेन परिभूषिता चास्ति। साहित्यसिद्धान्त-काव्य-कोष-व्याकारण-दर्शनस्मृति-तन्त्रनीतिशास्त्रैः सुसज्जितास्ति। रामायणमहाभारतपुराण-संहितादिभिश्चेयं भाषालङ्कृतास्ति। संस्कारयुता भाषा, परिष्कृता भाषा संस्कृतभाषेति बुध्यते। भारतवर्षशब्देन दक्षिण-एशियानां देशानां बोधो जायते। एतेषु देशेषु नेपाल-भारत-श्रीलङ्का-भुटान-बङ्गलादेश-पाकिस्तान-मालदिब्स-अफगानिस्तानाः समायान्ति। दक्षिणपूर्वि-एशियानामधेयाः कतिपयदेशाश्च भारतवर्षे समायान्ति, एतेषु देशेषु इन्डोनेशिया-थाइल्याण्ड-ब्रह्मदेशादयोः ११ देशाः समायान्ति। एतेषु १९ देशेषु संस्कृतभाषायाः सनातनसंस्कृतेश्च प्रभावो दृश्यते। एवञ्च एतेषां देशानां लिप्यामपि ब्राह्मीलिपेः प्रभावो वर्तते। अतः इयं भाषा भारतवर्षस्य संस्कृतेः सम्पर्कस्य च भाषा भवितुमर्हति। अत्र प्रयत्नो विधातव्यः। आङ्ग्भाषां विहाय अन्यां भाषां सम्पर्कस्य भाषां कर्तुं प्रयत्नः क्रियते चेत् सर्वस्वीकृता भाषा भवति संस्कृतम्।

**शब्दकुञ्जिकाः** - भारतवर्षः, अष्टादशविद्या, वैदिकसंस्कृतिः, उत्तरवैदिकसंस्कृतिः, सम्पर्कभाषा।

**विषयपरिचयः**

भारतवर्ष इति कथनेन दक्षिण-एशियावर्तिनां देशानां बोधो जायते। एतेषु देशेषु नेपाल-भारत-श्रीलङ्का-भुटान-बङ्गलादेश-पाकिस्तान-मालदिब्स-अफगानिस्तानाः परिगण्यन्ते। कतिपयदक्षिणपूर्वी-एशियादेशाश्च भारतवर्षे गण्यन्ते। एतेषु देशेषु इन्डोनेशिया-थाइल्याण्डब्रह्मदेशादयो सन्ति। एतेषु अनेकेषु राष्ट्रेषु संस्कृतभाषायाः सनातनसंस्कृतेश्च प्रभावो दृश्यते। सनातनसंस्कृतौ वैदिकसंस्कृतिः उत्तरवैदिकसंस्कृतिश्च परिगण्यते। वैदिकसंस्कृतेः निरन्तरता एव उत्तरवैदिकसंस्कृतौ परिलसति, परन्तु तत्र परिवद्र्धनं परिष्करणं च दृश्यते। उत्तरवैदिके रामायण-महाभारत-पुराण-दर्शन-स्मृति-तन्त्रग्रन्थानां प्रभावः दृश्यते। भारतवर्षस्य अनेकेषु देशेषु भारोपेलीपरिवारस्य भाषायाः प्रयोगो भवति। भारोपेलीपरिवारस्य अनेकासु भाषासु संस्कृतभाषा प्राचीनतरा, समृद्धा,

परिष्कृता, व्याकरणकोशकाव्यभरिता प्रसृता च विद्यते। लक्षशो ग्रन्थाः संस्कृते निबद्धाः सन्ति। भारते द्विशताधिकाः, नेपाले शताधिकाः, पाकिस्ताने पञ्चाशदधिका भाषाः एवं रीत्या अन्येषु देशेषु च अनेका भाषाः परिलसन्ति। एतासु भाषासु अधिकांशभाषाः संस्कृतादेव समुद्भूताः सन्ति। अतः एतासु भाषासु स्वरव्यञ्जनवर्णव्यवस्था, उच्चारणव्यवस्था, शब्दभाण्डागारं, व्याकरणव्यवस्था, वाक्यरचनापद्धतिः, लिपिव्यवस्था च निकटवर्तिनी अस्तीति परिज्ञायते। परन्तु एता भाषाः स्वतन्त्राः। अस्माकं भाषाभाण्डागारे समागत्य आङ्ग्लभाषा अस्मान् शास्ति। सा सम्प्रभाषायाः स्थानं गृह्णाति। यदि भारतवर्षीभाषाणां समन्वयं कृत्वा कार्यं विधीयते चेत् संस्कृतभाषा अपरा सर्वमान्या सम्पर्कभाषा भवितुं शक्नोति।

**अध्ययनस्य समस्या, उद्देश्यञ्च**

किं नाम भारतवर्षम्? भारतवर्षे के के देशाः समायान्ति? वैदिकसंस्कृतिः उत्तरवैदिकसंस्कृतिश्च का? किं संस्कृतं भारतवर्षस्य सम्पर्कस्य द्वितीया भाषा भवितुमर्हति? भारतवर्षे संस्कृतभाषायाः संस्कृतेश्च प्रभावः कीदृशः? इति प्रश्नानामुत्तरमन्वेषणमेवास्याध्ययनस्य उद्देश्यं विद्यते।

**अध्ययनस्य सैद्धान्तिकाधारः सीमा च**

एतस्मिन्नध्ययने पुस्तकालयः, वैद्युतसञ्चालः, विद्वद्भिः परामर्शश्च सामग्रीसङ्कलनस्य मुख्यस्रोतो वर्तते। अध्ययने प्राथमिकस्रोतस्सु भाषासाहित्यादिदिग्रन्थाः, द्वितीयस्रोतस्सु वैद्युतमाध्यमः पत्रपत्रिकादयश्च सन्ति। गुणात्मकप्रकृतेरध्ययने व्याख्यात्मको विश्लेषणात्मकविधिश्च अवलम्बितो विद्यते। अस्मिन् आलेखे विषयपरिचयस्य सामान्यः प्रयत्नः विहितो विद्यते। मुख्यशीर्षकं समादाय कतिपयोपशीर्षकेषु विचारविमर्शः विहितोऽस्ति। अत्र विश्वविद्यालयेन स्वीकृता मिश्रस्रोतःसङ्केतपद्धतिरवलम्बिता। विषयचिन्तनस्य उद्घाटनमेवास्या-ध्ययनस्य उद्देश्यमस्ति।

**१.भारतवर्षस्य संस्कृतौ संस्कृतस्य प्रभावः**

भारतवर्षं आदिकालादेव वैदिकसनातनधर्मस्य उद्गमा भूमिरवर्तत। इयं भूमिः संस्कृतभाषायाः उद्गमा भूमिर्वर्तते। अस्यां भूमौ वैदिककालिकाः ऋषयो वेदमन्त्रान् ददृशुः। वैदिकसाहित्यस्य, वैदिकदर्शनस्य च विकासं चक्रुः। अत्रैव ब्राह्मीलिपेः आविष्कारो जातः। मूर्तामूर्तसंस्कृतेः विकासो जातः। अनेके मानववंशाः अत्र समागच्छन्। तेषां सम्मीलनेन सन्निकटव्यवहारेण च परस्परं संस्कृतिरपि प्रभाविता, भाषा च प्रभाविता। एका एव भाषा स्थानस्य दूरत्वात्, दीर्घकालेन अवच्छेदात्, अनुकरणस्य दौर्बल्याच्च

एका एव भाषा अनेका जाता। यथा संस्कृतभाषातः शताधिका अनेका भाषा जाताः। भाषा एव संस्कृतिः। भाषा एव संस्कृतेः व्यञ्जकतत्त्वमिति कथयन्ति तज्ज्ञाः।

**संस्कृतेः परिभाषा, तस्या अभिव्यञ्जक-तत्त्वानि च**

प्रकृतिभिन्नं मानवनिर्मितं, मूर्तम् अमूर्तं, स्थूलं, सूक्ष्मं, खाद्यपेयं, वस्त्राभूषणं, गृहस्योपकरणानि, कृष्युपकरणानि, यन्त्रोपकरणनि, आयुधानि, दैनिककृत्यं, वर्षकृत्यं, संस्कारकृत्यं, सामाजिकव्यहारः, गोत्रसम्बन्धः, परिवारः, समाजः, राष्ट्रं, इति एतानि सर्वाणि तत्त्वानि संस्कृतिशब्देन बुध्यन्ते। मानवव्यवहारः एव संस्कृतिः। मानवजीवनशैली अपि संस्कृतिः। भाषापि संस्कृतिः, भूषापि संस्कृतिः।

अनेकानि सन्ति संस्कृतेः अभिव्यञ्जकतत्त्वानि। भाषा एव संस्कृतेरभिव्यञ्जकतत्त्वमिति वदन्ति विज्ञाः। वस्तुनिष्ठां भौतिकसंस्कृतिं मूर्तसंस्कृतिं वा तत्तदेव वस्तु अभिव्यञ्जयति। अमूर्तसंस्कृतिं भाषा व्यञ्जयति। साहित्यमपि संस्कृतेरभिव्यञ्जकतत्त्वं भवति। इतिहासः परम्परा च संस्कृतेः व्यञ्जकतत्त्वं भवति।

**वैदिकसंस्कृतिः भारतवर्षे तस्य प्रभावश्च**

वाल्मीकिरामायणस्य प्राग् वैदिककालमिति विज्ञाः कथयन्ति। तस्य व्याप्तिकालः षट् सप्त वा सहस्रं वर्षाणि मन्यते। अनेकेषु कालखण्डेषु संस्कृतभाषायां वेदेवेदाङ्गादयः ग्रन्थाः निबद्धाः सन्ति। अष्टादशविद्याश्च अस्यां भाषायां लिखिताः सन्ति। वैदिकसाहित्ये लक्षशः पुस्तकानि लिखितानि वर्तन्ते। तेषु वैदिकग्रन्थेषु अनेका विषयाः समागताः विद्यन्ते। ऋषयः भारतवर्षे एव स्थित्वा वेदमन्त्रान् ददृशुः। ते दैनिककृत्यं, वर्षकृत्यं, संस्कारकृत्यं, अनुष्ठानकृत्यञ्च कयारीत्या सम्पादनीयमिति स्पष्टं चक्रुः। जीवनशैली प्रतिपादिता। विविधानि उपकरणानि आविष्कृतानि। देवभाषायाः ब्राह्मीलिपेश्च प्रचारो विहितः। अतः वैदिकसंस्कृतेः संस्कृतभाषायाश्च प्रभावः सर्वत्र प्रसारितः। तत्र भारतवर्षे अनेकेषां राज्याणां एकीभवनं, अनेकीभवनं च सर्वदैव प्राचलत्। भारतवर्षे कदाचित् ५५० अधिकानि राष्ट्राणि अस्तित्वे समागतानि आसन्। अनया प्रक्रिययापि संस्कृतेः भाषायाश्च प्रसाराय सहजं वातावरणं निर्मितम्। यायावराः ऋषयः भारतवर्षं भ्रामं भ्रामं वैदिकसंस्कृतिं स्थापयामासुः। अधुनापर्यन्तं तस्य प्रभावः दृष्टिगोचरो भवति।

**उत्तरवैदिकसंस्कृतिः तस्य भारतवर्षे प्रभावः**

का उत्तरवैदिकसंस्कृतिः? वेदोत्तरकालिकसंस्कृतिरेव उत्तरवैदिकसंस्कृतिरित्युच्यते बुधैः। वेदोत्तरकाले वाल्मीकिः रामायणं रचयामास। कृष्णद्वैपायनो वेदव्यासः अष्टादशपुराणानि, महाभारतं, ब्रह्मसूत्रं लिलेख। स वेदस्य मन्त्रराशिं चतुर्धा विभज्य

वैशम्पायनजैमिनिप्रभृतिभ्यः शिष्येभ्यः पाठयामास। अनकैः ऋषिभिः स्मृतिग्रन्थाः, नीतिशास्त्राणि, षड्दर्शनानि, तन्त्रशास्त्राणि रचितानि। नित्यकृत्यं, नैमित्तिककृत्यं, वर्षकृत्यं, संस्कारकृत्यं, यज्ञानुष्ठानकृत्यं परिष्कृतं, पुनःव्याख्यानं विहितम्। वैदिककाले सामान्या देवता उत्तरवैदिककाले विशिष्टाः जाताः। यज्ञस्य महत्त्वं क्षीणतरमभवत्। पूजायाः महत्त्वमवर्धत। वैदिकतिथिपर्वाणि पौराणिकतिथिपर्वसु परिवर्तितानि। पुराणस्थापिताः ब्रह्मविष्णुमहेश्वराः प्रधानदेवताः जाताः। तन्त्रस्थापिताः महाकाली–महालक्ष्मी–महासरस्वती–देव्यः प्रधानत्वंगताः। पुराणोक्ताः तन्त्रोक्ताः मूर्तयः मन्दिराणि च स्थापितानि तत्र पूजादिकार्याणि सम्पादितानि।

सनातनसंस्कृतौ धर्मशास्त्राणां स्मृतिग्रन्थानां प्रभावश्च वर्धितः। धर्मशास्त्राणां स्मृतिग्रन्थानां च संख्या वर्धिता। पूजायां विविधकृत्येषु च वेदतन्त्रयोः मन्त्राणां प्रयोगो जातः। सनातनसंस्कृतौ आयुर्वेदस्य प्रभावो जातः। खाद्याखाद्येषु विमर्शो जातः, कदा भोज्यं कदा न, किं खाद्यं किमखाद्यमिति विचारितम्। औषधदृष्ट्या महत्त्वपूर्णाः पिप्पलशमिविल्वादयो वृक्षाः पूजास्थाने सम्मानिताः। सनातनसंस्कृतौ दर्शनशास्त्राणां प्रभावो वर्धितः। दर्शनशास्त्रिभिः विविधविषयं विविच्य धर्मार्थकामोक्षमूलं जीवनलक्ष्यं घोषितम्। सर्वाणि कार्याणि धर्ममूलानि भवितव्यानीति तेषामुपदेशस्य सारो जातः। सनातनसंस्कृतौ चतुःषष्टिकलायाः प्रभावो जातः। तत्र प्राविधिककलायाः वर्णनं सौन्दर्यकलायाः वर्णनं युद्धकलायाश्च विवेचनं दृश्यते। तत्र व्यावहारिककलायाश्च उल्लेखो विद्यते। तथैव सनातनसंस्कृतौ वास्तुशास्त्राणां प्रभावो जातः। वास्तुशास्त्रे नगरनिर्माणं, गृहनिर्माणं, मन्दिरनिर्माणं, राजप्रासादनिर्माणं च कथं विधातव्यमिति समायाति। गृहे कुत्र महानसं कार्यं, पूजाप्रकोष्ठं विधातव्यं, कुत्र मूलपुरुषस्य स्थानं रचितव्यमिति वर्णितमस्ति। अनेनापि संस्कृतौ प्रभावो दत्तः।

बौद्ध–जैन–धर्मसंस्कृतौ संस्कृतस्य प्रभावो दृश्यते। बौद्धधर्मे, जैनधर्मे च अनेके ग्रन्थाः संस्कृतभाषायां लिखिताः सन्ति। तत्र संस्कृतस्य पठनं पाठनञ्च भवति। अधुनापि तत्र संस्कृते ग्रन्थरचना जायते। धर्मकीर्ति–नागार्जुना–श्वघोषादयो विद्वांसः संस्कृतभाषायां अनेकविषयेषु सहस्रशो ग्रन्थान् रचयामासुः। सनातनसंस्कृतौ तीर्थयात्रायाः महत्त्वं वरीवर्ति। पुराणेषु तीर्थयात्रायाः महत्त्वं वर्णितमस्ति। अतः नैपालिकाः भारतस्य, भारतीयाः नेपालस्य तीर्थानां भ्रमणं कृत्वा दर्शनं पूजनञ्च कुर्वन्ति। भारते विश्वनाथः, रामेश्वरः, द्वारिका, बद्रीकेदारौ, रामजन्भूमिश्च विद्यते। नेपाले पशुपतिनाथः, जानकीमन्दिरं, मुक्तिनाथः, बुढानीलकण्ठः, गोरक्षकाली, गोरक्षनाथः इति एतेषां मन्दिराणि विराजन्ते।

नेपाले मन्दिरतीर्थानि, नदीतीर्थानि, तडागतीर्थानि, पर्वततीर्थानि च सन्ति। एवञ्च नेपाले शैवपीठं, शाक्तपीठं, वैष्णवपीठं, गाणपत्यपीठञ्च दृश्यते।

सनातनसंस्कृतौ स्थाननामकरणे, व्यक्तिनामकरणे, वस्तुनामकरणे च संस्कृतस्य प्रभावो दृश्यते। यथा नेपाले भारते च अनेकेषां स्थानानां नाम गीतापुरम्, सीतानगरं, रामनगरं, भरतपुरं, व्यासनगरं, वाल्मीकिनगरं, शिवनगर, पार्वतीपुरम्, राजमार्गः, देवमार्गः, इन्द्रह्रदः इत्यादयः सन्ति। व्यक्तीनां नामकरणे संस्कृतस्य संस्कृतेश्च प्रभावो दृश्यते। रामप्रसादः, कृष्णचन्द्र, जानकी, सीता, पार्वती, गौरी, इन्दिरा, लक्ष्मी, सरस्वती, हरिः, शिवश्चेत्यादयः। एवञ्च वस्त्राभूषणव्यवस्थायां परिवारव्यवस्थायाञ्च संस्कृतस्य प्रभावो दृश्यते।

**२. संस्कृतं - भारतवर्षस्य द्वितीया सम्पर्कभाषा**

भारतवर्ष इति कथनेन वर्तमानसमये दक्षिण-एशिया इति बुध्यते। तेषु राष्ट्रेषु अफगानिस्तान- बङ्गलादेश-भुटान-भारत-नेपाल-मालदिब्स-पाकिस्तान-श्रीलङ्काः सन्ति। कतिपयभारतीयविद्वांसो नेतारश्च प्राचीनभारतवर्षे (आधुनिक-पूर्व-एशियादेशेषु) बर्मा-कम्बोडिया-थाइल्याण्ड-इन्डोनेसिया-सिङ्गापुर-मलेसिया-फिलिपिन्स-लाओस-भियतनाम- तिमोरलेस्टे-ब्रुनोइनामाख्या एकादश देशाः आसन् इति कथयन्ति। एतेषु कतिपयराष्ट्रेषु हिन्दुराजानः द्वादशशताब्दीपर्यन्तं शासनं चक्रुः। तेषां पदचिह्नानि अद्यापि द्रष्टुं पार्यते। ततःपश्चात् मुसलमानानामाक्रमेण क्रमशः तेषां राज्यव्यवस्था समाप्ता। धर्मपरिवर्तनं तीव्ररूपेण विहितम्। तथापि कतिपयदेशेषु अद्यपर्यन्तं हिन्दुधर्मावलम्बिनो विराजन्ते, यथा बालिद्वीपः। तत्र विद्यालयेषु, विश्वविद्यालयेषु विविधधार्मिकपीठेषु च संस्कृतस्य पठनपाठनं जायते। एतेषां संक्षिप्तविवरणं पूर्वेशियादेशेषु संस्कृतमिति उपशीर्षके लिखितमस्ति। एतेषु देशेषु कदाचित् आङ्गलाः शासनं चक्रुः। अतः आङ्ग्लभाषायाः एव प्रभावो दृश्यते, कतिपयस्थाने आङ्ग्लभाषा एव मातृभाषा इव जातास्ति। अतः अस्मिन् क्षेत्रे आङ्ग्लभाषा एव सामूहिकसम्पर्कभाषा, पठनपाठनस्य च भाषा जाता। ताम् आङ्ग्लभाषां विहाय सामूहिकसम्पर्कस्य भाषां कारयितुं शक्यते चेत् संस्कृतभाषामेव सम्पर्कभाषां कारयितुं पार्यते।

प्राचीनभारतवर्षे बहूनि राष्ट्राणि समुद्भूतानि दरीदृश्यन्ते। भारतवर्षे कदाचित् ५५० राज्यानि बभूवुः। नेपाले एव सुदूरपश्चिमे २२ राज्यानि, गण्डकीक्षेत्रे २४ राज्यानि चासन्। मल्लकाले काष्ठमण्डपे एव चत्वारि राज्यानि बभूवुः। काष्ठमण्डपपूर्वे च राष्ट्रखण्डानि आसन्।

**भारतवर्षस्य भाषासु संस्कृतस्य प्रभावः**

भारतवर्षे संस्कृतभाषायाः प्रभावः दरीदृश्यते। नेपाले भाषावैज्ञानिकैः १४३ भाषा ब्रूयन्ते इति निगदितमस्ति। २०७८ वर्षस्य राष्ट्रियजनगणनायां नेपाले १२४ भाषाः समाविष्टाः सन्ति। एतासु भाषासु ४८ भाषाः भारोपेलीपरिवारस्य सन्ति। ६४ भाषा एकाक्षरीपरिवारस्य विलसन्ति। भारोपेलीपरिवारस्य भाषा संस्कृतभाषातः एव समुद्भूताः सन्ति अथवा तासु संस्कृतस्य प्रभावः घनीभूतरूपेण विलसति।

भाषाविज्ञो भोलानाथतिवारी विश्वस्य पञ्चसहस्राधिकानां भाषाणां वर्गीकरणं त्रयोदश (१३) भाषापरिवारेषु विदधाति। एतेषु परिवारेषु भारोपीयपरिवारोऽपि एकः। अस्मिन् भाषापरिवारे सहस्रशो भाषाः समायान्ति। ताश्च पुनः द्विधा विभज्यन्ते – शतं शाखा, केन्तुं शाखा इति। केन्तुंशाखायां केल्टिक–जर्मनिक–लैटिन–ग्रीक–तोषरी इति पञ्चपरिवाराः सन्ति। शतं शाखायां अल्वेनियन–वाल्टिक–स्लाव–आर्मेनियन–भारत–इरानेली इति पञ्चपरिवाराः सन्ति (तिवारी, सन् १९९२ ः १२४)। अस्याः शाखायाः 'भारत–इरानेली' चैका शाखा। अस्यां शाखायां आर्येरानीभाषे स्तः। इरानीशाखायां खोवा, दरदः, तत्र च शीना, काश्मीरी कोहिस्तानी भाषा सन्ति। एतासु च अनेका भाषा विराजन्ते। अत्रैव दरदतः अवेस्ता, ततः बर्गिस्ता, पश्तो (पख्तो)देवारी, बलूची, ओमेटिक, कुर्दी, फारसी इति भाषाः विकसिताः सन्ति (तिवारी, सन् १९९२ ः १३०)।

आर्यभाषायां वैदिकी भाषा, उत्तरवैदिकी भाषा च समायाति। वैदिकभाषायाः प्रयोगः वेदब्राह्मणा–रण्यकोपनिषद्ग्रन्थेषु दरीदृश्यते। ईशवीयस्य एकसहस्रवर्षपूर्वं वैदिकभाषायां परिवर्तनं समागतम्। ततो लौकिकसंस्कृतभाषायाः उत्पत्तिर्जाता। लौकिकसंस्कृतभाषायाञ्च उदीच्य–प्राच्य–दाक्षिणात्य–मध्यदेशीयभेदाः समुद्भूताः अभूवन्। तथैव ख्रीष्टीयपञ्चमशतकपूर्वं संस्कृतभाषायां पुनः परिवर्तनं अभवत्। ततः प्राकृतभाषाः समुद्भूताः। प्रकृतिः संस्कृतं तत्र भवं प्राकृतमुच्यते। प्रकृतेः संस्कृतात् आगतं प्राकृतम् इति (तिवारी, सन् १९९२, १५०) पालीप्राकृतं अभिलेखीप्राकृतञ्च प्राकृतस्य भेदद्वयं प्राप्यते। अभिलेखीप्राकृतभाषाया दृष्टान्तं यथा (क) लघुशिलालेखः (ई.पू. २५८–२५२), (ख) भब्रूशिलालेखः (ईपूं २५७), (ग) कलिङ्गशिलालेखः (ईपू. २५६), (घ) गुहाअभिलेखः (ई.पू. २५७), नेपाललुम्बिनीशिलालेखः (ईपू. २४९) इत्यादयः शिलालेखाः सन्ति। एते अशोकशिलालेखे सम्बद्धाः सन्ति। अन्ये च शिलालेखाः विराजन्ते (तिवारी, सन् १९९२, १५६)।?

प्राकृतभाषासु प्राचीनमागधी (पूर्वप्राकृतम्) प्राचीनशौरसेनी (पश्चिमप्राकृतम्), प्राचीन–अर्धमागधी (मध्यपूर्व) समायान्ति (तिवारी, सन् १९९२, १५७)। एताभ्यः भाषाभ्यः नव्यप्राकृतभाषा समुद्भूताः ते यथा १.शौरसेनी, २.पैशाची, ३.महाराष्ट्री, ४.अर्धमागधी ५.मागधी इति (तिवारी, सन् १९९२, १६२)। एताुसां भाषाणामुपभेदाश्च दृश्यन्ते। एताभ्यः भाषाभ्यः अनेकाः भेदा अभूवन्। शौरसेनीभाषातः पश्चिमहिन्दी, राजस्थानीया, गुर्जरीभाषा समजनि। अपभंशतः पर्वतीयापभ्रंशभाषाः जाताः। पैशचीतः लहन्दा, पञ्जावी च जाता। व्राचड इत्यतः सिन्धी जाता। महारगटङीतः मराडी, अर्धमागधीतः पूर्वहिन्दी समभवन्। मागधीतः बिहारी, बङ्गाली, उडिया, असमिया अभूवन् (तिवारी, सन् १९९२, १७५)। शौरसेनीतः श्रीलङ्कायाः सिंहाली भाषा जाता। शौरसेनीतः वा दरदतः खसापभ्रंशभाषा जाताः, ततो नेपाली भाषा समजनि। तराईभागस्य मैथिली–भोजपुरी–अवधी –भाषाश्च प्राकृतभाषातः अभूवन्। एताभ्यः भाषाभ्यः एव नेपाले ४८ भाषाः, भारते १२१ भाषाः समुदुभूताः। भारते २२१ भाषाः वाग्व्यवहारे विलसन्ति।

ननु २२ भाषाणां राजकीयमान्यता च भारतस्य संविधाने उल्लिखितास्ति। यथा च ते – असमिया, बंगाली, बोडो, डोगरी, गुजराती, हिंदी, कन्नड़ः, कश्मीरी, कोंकणी, मैथिली, मलयालम, मणिपुरी, मराठी, नेपाली, ओडिया, पंजाबी, संस्कृतम्, सन्ताली, सिन्धी, तमिल, तेलुगु, उर्दू। अन्यासु च प्रमुखभाषासु – अवधी, भोजपुरी, छत्तीसगढ़ी, हरियाणवी, राजस्थानी, तिवा, गढ़वाली, कुमाऊँनी, नागपुरी च।

अनेका भाषा लोकव्यवहारे प्रसिद्धाः सन्ति। कपियभाषां विहाय सर्वापि भाषा भारोपेलीपरिवारस्य भाषाः सन्ति, ताः सर्वापि भाषा संस्कृतभाषातः समुद्भूताः सन्ति। नेपाले च ४८ भाषाः भारोपेलीपरिवारस्य सन्ति ताश्च यथा –

नेपाली १३७८४४६७ प्रतिशतं ४४.८६ मैथिली
३२२२८९। प्रतिशतं ११.०५

भोजपुरी १८२०७९५ प्रतिशतं ६.२४ थारु
१७१४०९१ प्रतिशतं ५.८८

बज्जिका ११३३७६४ प्रतिशतं ३.८९ नेवारी
८६३३८० प्रतिशतं २.९६)

डोटेली ४९४८६४ प्रतिशतं १.७ उर्दू
४१३७८५ प्रतिशतं १.४२

मगही २३०११७ प्रतिशतं ०.७९ बैतडेली
१५२६६६ प्रतिशतं ०.५२
अछामी १४१४४४ प्रतिशतं ०.४८ राजवंशी
१३०१६३ प्रतिशतं ०.४५
खसः ११७५११ प्रतिशतं ०.४ बझाङी
९९६३१ प्रतिशतं ०.३४
हिन्दी ९८३९९ प्रतिशतं ०.३४ रानाथारूः
७७७६६ प्रतिशतं ०.२७
चेपाङ ५८३९२ प्रतिशतं ०.२ बाजुरेली
५६४८६ प्रतिशतं ०.१९
दार्चुलेली ४५६४९ प्रतिशतं ०.१६ उराउँ
३८८७३ प्रतिशतं ०.१३
अङ्गिका ३५९५२ प्रतिशतं ०.५२ माझी
३२९१७ प्रतिशतं ०.११
गनगाई २६२८१ प्रतिशतं ०.०९ बङ्गला २३७७४
प्रतिशतं ०.०८
मारवाडी २१३३३ प्रतिशतं ०.०७ डडेलधुरी
२१३०० प्रतिशतं ०.०७
ताजपुरिया २०३४९ प्रतिशतं ०.०७ कुमाल १८४३५
प्रतिशतं ०.०६
मुसलमानः १६२५२ प्रतिशतं ०.०६ संस्कृतम्
१३९०६ प्रतिशतं ०.०५
जुम्ली ८३३८ प्रतिशतं ०.०३ दैलेखी ४९८९
प्रतिशतं ०.०२

एताषां भाषाणां प्रयोगकर्तारः संस्कृतभाषां किञ्चित् जानान्ति, अत्र संस्कृतस्य ७० प्रतिशतशब्दाः प्रयुज्यन्ते, व्याकरणव्यवस्था, वाक्यरचनापद्धतिः, शाब्दबोधप्रक्रिया च समाना दृश्यते। अतः एते संस्कृतं वक्तुं वाञ्छन्ति चेत् शनैः शनैः तत् कर्तुं शक्नुवन्ति। अतः अनेकैः कार्यैः संस्कृतं लोकभाषारूपेण अग्रे समानेतुं पार्यते।

**दक्षिणैशियादेशेषु संस्कृतभाषा**

दक्षिणेशियायाः देशाः नव (९) सन्ति। यथा च ते अफगानिस्तान–बङ्गलादेश–भुटान–भारत–नेपाल–इरान–मालदिब्स –पाकिस्तान–श्रीलङ्काः। अफगानिस्ताने पश्तो (पख्तो, पर्सियन, दारी) भाषायाः तस्य भेदाश्च प्रयुज्यन्ते। अफगानिस्ताने ४० तः ५९ पर्यन्तं अनेका भाषाः सन्ति। तेषु पश्तो भाषायाः वक्तारः ७७ प्रतिशतं, दारीभाषायाः वक्तारः ४८ प्रतिशतपर्यन्तं विराजन्ते। द्वे एव सर्वकारीयमान्यताप्राप्ते भाषे स्तः। दारी भाषा एव फारसी वा पर्सियननाम्ना ख्यातास्ति। तथापि एतासु भाषासु काचित् भिन्नता चानुभूयते। अत्र व्यवहारे प्रचलितासु अन्यासु भाषासु उज्वेकभाषा ११ प्रतिशतं, तुर्कमेनभाषा ३ प्रतिशतं, उर्दुभाषा ३ प्रतिशतं, अन्याश्च नुरिस्तानी–पशाई–बलोचीभाषाश्च १।१ प्रतिशतं वाग्व्यवहारे सन्ति। इमाश्च भाषा आर्य–इरानेलीपरिवारस्यैव सदस्याः वर्तन्ते। तत्र १९७० ख्रीष्टाब्दस्य दशके ७.००.००० हिन्दव आसन्। १९९२ ख्रीष्टाब्दे २२०००० आसन्। परन्तु अधुना हिन्दूनां संख्या न गण्यास्ति।

बङ्गलादेशे ९५–९८ प्रतिशतं जनाः बङ्गालीभाषायाः प्रयोगं कुवन्ति। तत्र १६५.१५ मिलियनजनतासु १३.१ वा ७.९५ प्रतिशतं जनता हिन्दवः सन्ति। तत्र बङ्गलादेशे संस्कृतपाली एजुकेशन बोर्ड इति नामिका संस्कृतपालीशिक्षासमिति अस्ति। इयमेव संस्था संस्कृतस्य पालीभाषायाश्च पठनपाठनस्य परीक्षायाश्च व्यवस्थां सम्पादयति। अस्यान्तः १ संस्कृतमहाविद्यालयाः, ८८ पालीमहाविद्यालयाः, ५० परीक्षाकेद्राणि च सन्तीति विज्ञायते। बङ्गालादेशे चतुःसहस्रं (४०००) परिमितानि हिन्दुमन्दिराणि विलसन्ति। तत्र संस्कृतभाषामाध्यमेन वैदिकतान्त्रिकमन्त्रमाध्यमेन पूजा प्रचलति। हिन्दवः संस्कारकृत्यं, वर्षकृत्यं, नित्यनैमित्तिककृत्यञ्च संस्कृतभाषामाध्यमेन सम्पादयन्ति।

पाकिस्तानदेशे ५० भाषाः भारोपेलीपरिवारस्य सन्ति चेद् अन्ये २४ भाषाश्च प्रयोगे विलसन्ति। पञ्जावी आधिक्येन प्रयोगे दृश्यते। पञ्जावीभाषायाः प्रयोगः ३८.७८ प्रतिशतं, पश्तोभाषायाः प्रयोगः १८.२४ प्रतिशतं, सिन्धीभाषायाः प्रयोगः १४.५७ प्रतिशतं, सारैकीभाषायाः प्रयोगः १२.१० प्रतिशतं, उर्दू ७.०८ प्रतिशतं, बलुची ३.०२ प्रतिशतं, ब्राहुइ १.२४ प्रतिशतं, काश्मीरी च ०.१७ प्रतिशतं प्रयोगे सन्ति। काश्चित् विहाय एताः सर्वाश्च भाषाः भारोपेलीपरिवारस्य वर्तन्ते। अतः तेषां कथनं, समुच्चारणं लेखनं, पठनं, पाठनञ्च समानप्रकृतिमूलकमित्यनुभूयते।ः एतासु भाषासु संस्कृतस्य प्रभाव दरीदृश्यते। शब्दरचनायां, व्याकरणव्यवस्थायां वाक्यविन्यासे च संस्कृतस्य प्रभावो वर्तते। अतः

एतायाः भाषायाः प्रयोगे ये दक्षाः सन्ति ते संस्कृतस्य भाषणे, कथने, वदने, पठने च सारल्यमनुभवन्ति।

ख्रीष्टाब्दस्य १९१७ वर्षस्य जनगणनानुसारं पाकिस्तानदेशे २.१४ प्रतिशतं वा ४४,००,००० हिन्दवः सन्ति। तत्र ५५५ हिन्दुमन्दिराणि च विराजन्ते। पाकिस्तानस्थापनसमये १९४८ ख्रीष्टाब्दे तत्र १२८८ मन्दिराणि आसन्। अधुना ३१ मन्दिराणि सक्रियत्वेन जीवितानि विराजन्ते। तत्र सिख्खानां गुरुद्वाराणि, बौद्धानां विहाराः, स्तुपाश्च आसन्। परन्तु तेषां संख्याधुना न्यूनास्ति। पाकिस्ताने २५१ विश्वविद्यालयाः सन्ति। परन्तु तत्र संस्कृतस्य पठनपाठनं न विद्यते। पाकिस्तानबङ्गलादेशयोः विभाजनपूर्वं बङ्गलादेशवत् पाकिस्तानेऽपि संस्कृत-पाली एजुकेशन-बोर्ड इत्यभिधेया शिक्षासमिति आसीत्। परन्तु विभाजनपश्चात् तत्र औपचारिकरूपेण संस्कृतस्य पठनपाठनं न प्रचलति इति ज्ञायते। परन्तु हिन्दवः तत्रापि संस्कृतस्य माध्यमेन एव नित्यनैमित्तिककृत्यं, संस्कारकृत्यं, वर्षकृत्यञ्च सम्पादयन्ति। तस्य कृते पितृकुले निगूढे गुरुकुले ते स्वयं संस्कृतं पठन्तः सन्ति। हिन्दूनां धार्मिकग्रन्थरत्नानि संस्कृतभाषायां इस्लामधर्मावलम्बिनां धार्मिकग्रन्थाः अरबीभाषायां निबद्धाः सन्ति। धार्मिककारणेन, भारतपाकिस्तानयोः द्वन्द्वेन च तत्र संस्कृतस्य उच्छेदो जातः इत्यनुभूयते। शनैः शनैः तत्र संस्कृतस्य वातावरणं निर्मातुं शक्यते।

श्रीलङ्कादेशे तामिलसिंहालीभाषयोः प्रयोगो आधिक्येन दृश्यते। सिंहालीतमिलभाषयोः राजकीयमान्यता दृश्यते। १३ लक्षाणि वा ७० प्रतिशतजनताः सिहालीभाषां वदन्ति। भारतस्य तमिलनाडुप्रदेशस्य मूलभाषा तमिल विद्यते। अस्याः एव भाषायाः प्रयोगो श्रीलङ्कादेशे जायते। अस्याः तमिलभाषायाः प्रगोगः १५ प्रतिशतं जनता कुर्वन्ति। तत्र २५५४६०६ वा १२.६ प्रतिशतं जनाः हिन्दवः सन्ति। तत्र ७०.२ प्रतिशतं जनताः बौद्धधर्मावलम्बिनः, कृश्चियनाः, मुश्लिमाश्च १२ प्रतिशतं सन्ति।

अनेकानि मन्दिराणि च तत्र विराजन्ते। संस्कारकृत्यं, वर्षकृत्यं, नित्यनैमित्तिककृत्यं च संस्कृतभाषामाध्यमेन जायते। तत्र विद्यालयेषु विश्वविद्यालयेषु च संस्कृतस्य पठनपाठनं जायते। तत्रत्ये बौद्धविश्वविद्यालये संस्कृतं पाठ्यते। जाफ्नाविश्वविद्यालये, केलकनीयाविश्वविद्यालये, श्रीजयवद्र्धनेपुराविश्वविद्यालये, पेरामेनियाविश्वविद्यलायेः, स्वामी विपुलानन्द-इन्स्टिच्युट-इत्यादिषु विश्वविद्यालयेषु संस्कृतविभागो विद्यते इति सूचना मिलति।। तत्र श्रीलङ्कीय-बौद्धपाली -विश्वविद्यालयः, भिक्षु-युनिवर्सिटी अफ श्रीलङ्का नामधेयश्चेति कृत्वा द्वौ बौद्धविश्वविद्यालयौ च स्तः। एवञ्च तत्र त्व्द्यग्

पालीविश्वविद्यालयश्च दृश्यते। बौद्धदर्शनस्य अनेके विषयाः अनेकानि पुस्तकानि संस्कृतभाषायां विलसन्ति। अतः अत्र अस्मिन् देशे संस्कृतभाषा पाठ्यते, तेन च संस्कृतं जनसम्पर्कस्य भाषा भवितुमर्हति। तत्र शनैः शनैः संस्कृतं जनसम्पर्कस्य भाषां कारयितुं शक्यते।

भुटानदेशे द्जोङ्ग्खा ०म्शयलनपजब० स्थानीयभाषायाः भुटानस्य दक्षिणभागे नेपालीभाषायाश्च प्रयोगो दृश्यते। ५५ प्रतिशतं नेपालिनः तत्र वसन्ति स्म, परन्तु भुटानसर्वकारेण अधिकांशनेपालिनः निष्काशिताः तथापि २२ प्रतिशतं नेपालिनः अधुनापि तत्र निवसन्ति। ते नेपालीभाषायाः एव प्रयोगं कुर्वन्ति। ते नेपालीजातीनां कृते भाषायाः कृते च 'ल्होत्साम्पा' शब्दस्य प्रयोगं कुर्वन्ति। ते दैनिककृत्यं, वर्षकृत्यं, संस्कारकृत्यं, अनुष्ठानकृत्यं वैदिकशास्त्राणां मान्यतानुसारं संस्कृतभाषामाध्यमेन कुर्वन्ति। भारते वा नेपाले च समागत्य संस्कृतं नेपालीभाषाञ्च पठन्ति। तत्र श्रीगुरुवासवेश्वर–संस्कृतपाठशाला (गुलवर्गा) च स्थापितास्ति। तत्र संस्कृतस्य पठनपाठनं भवति। भुटानेऽपि संस्कृतस्य वक्तारः सन्ति। अनेके संस्कृतसम्मेलने भुटानतः विद्वांसो भागं गृह्णन्ति। प्रो. हरिप्रसादअधिकारी भुटानदेशीयः संस्कृतस्य प्राध्यापको वर्तते। अतः भुटानदेशे संस्कृतं सम्पर्कस्या भाषा कारयितुं पार्यते।

मालदिब्सदेशे धिवेहीभाषायाः प्रयोगो विधीयते। इयं भाषा सिंहालीभाषाया निकटवर्तिनी इति विज्ञा निगदन्ति। सार्धपञ्चलक्षसंख्यकाभिः जनताभिः अस्याः भाषायाः प्रयोगो विधीयते। संस्कृतस्य शिक्षा अस्याः भाषायाश्च प्रयोगं तत्र इस्लामसमवायिनः न कुर्वन्ति। तत्र ९८.६९ इस्लामधर्मिणः, हिन्दवः ०.२९ प्रतिशतं, क्रिस्तानी ०.२९ प्रतिशतं जनाः निवसन्ति। द्वादश(१२) शताब्द्यां तत्र इस्लामानां प्रवेशो जातः, तदग्रे तत्र राजा, जनताश्च हिन्दवो विराजन्ते स्म, बौद्धा विराजन्ते स्म, रामायणस्य बौद्धस्य च कथा प्रचलति स्म, तत्र तेषां मन्दिराणां मूर्तीनां परिचयो मिलति। अधुना तत्र औपचारिकरूपेण संस्कृतस्य पठनपाठनं न भवति। परन्तु भाषिकदृष्ट्या, धार्मिकदृष्ट्या च तत्र संस्कृतस्य प्रयोगो जायते। भाषिक–साहित्यिक–दार्शनिकदृष्ट्या तत्र संस्कृतभाषायाः स्थापनं, पठनपाठनं, प्रयोगं प्रचारप्रसारञ्च कर्तुं पार्यते।

सर्वेषु देशेषु स्वकीया स्वतन्त्रा राजकीयभाषा वाग्व्यवहारे, लेखने पठने, पाठने च प्रचलति। तत्रत्याः सर्वे च स्वकीयायाः एव भाषायाः प्रयोगं कुर्वन्ति न परदेशस्य भाषायाः प्रयोगम्। अतः सर्वेषां सौकर्यं आङ्गलभाषायाः प्रयोगे जायते, इयं न मातृभाषा, अस्या भाषायाः पठनपाठनं सर्वत्र जायते। अतः आङ्ग्लभाषा प्रथमसम्पर्कस्य भाषा जातास्ति।

अपरापि सम्पर्कभाषा भवितुमर्हति चेत् संस्कृतभाषैव शक्नोति। इयं भाषा सनातनजैनबौद्धानां शास्त्रस्य भाषास्ति, मन्त्रस्य भाषास्ति, सूत्रस्य भाषास्ति, ध्यानस्य, योगस्य भाषास्ति, पूजायाः, संस्कारकृत्यस्य, दैनिककृत्यस्य, वर्षकृत्यस्य शास्त्रस्य च भाषास्ति अतः अमुं सर्वे सम्मानयन्ति। सर्वेषां सम्मानस्य भाषात्वात् इयं दक्षिण–एशियायाः सम्पर्कस्य भाषा भवितुमर्हति।

नेपालभारतयोः संस्कृतभाषाः भारते ह्यनेका भाषाः सन्ति। भारतस्य एका भाषा अपरं न सहते। दक्षिणभारते हिन्दी–बङ्गाली–विहारी–मैथिली–अवधीभाषा न प्रचलन्ति, उत्तरभारते उडिया–तमिल–मलयालम–कन्नडाद्याः न प्रचलन्ति। परन्तु सर्वेषु प्रदेशेषु संस्कृतस्य सम्मानपूर्णं स्थानं विद्यते, सर्वत्र पठनपाठनञ्च जायते, विद्यालयतः विश्वविद्यालयपर्यन्तं संस्कृतस्य अध्ययनाध्यापनं विद्यते। भारते ८१ प्रतिशतं नेपाले च ८१ प्रतिशतं हिन्दवः तिष्ठन्ति। भारते सहस्राधिकानि संस्कृतगुरुकुलानि, सह्राधिकाः संस्कृतविद्यालयाः सन्ति। विंशाधिकानि संस्कृतविश्वविद्यालयाः ह्यनेका मानितसंस्कृतविश्वविद्यालयाश्च सन्ति। अनेकानि आश्रमपीठानि विराजन्ते। एतेषु अनेकेषु पीठेषु संस्कृतस्य पठनपाठनं प्रचलति। संस्कृतभारती नाम्नी संस्था संस्कृतस्य विकासाय, प्रचाराय प्रसाराय, संस्कृतभाषाप्रशिक्षणाय च सन्नद्धास्ति। अनेकासु पत्रिकासु, अनेकेषु वैद्युतसञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारो दृश्यते। सूरिभिः अनेकानि ग्रन्थरत्नानि, काव्यनाटकादीनि संस्कृतभाषाया. रचितानि विलसन्ति, सूरयः रचयन्तश्च सन्ति। अतः भारतः संस्कृतस्य प्रचाराय प्रयोगाय कृतसङ्कल्पितो वर्तते। नेपाले भारते च इयं देववाणी समुद्भूता। अस्य संस्कृतवैभवस्य संरक्षणं, विविद्र्धनमपि आवयोः दायित्वमस्ति।

नेपाले बौद्धकिरातजैनसिख्खादिसहितं ओङ्कारपरिवारस्य ९६ प्रतिशतं जनता निवसन्ति। बौद्धसमुदायस्य जैनसमुदायस्य च धर्मसंस्कृतौ संस्कृतस्य लक्षशो ग्रन्थरत्नानि निबद्धानि सन्ति। अतः नेपाले शताधिकाः भाषाः परस्परं न सहन्ते, ते समुदायस्य भाषा सन्ति। एकः समुदायः अपरसमुदायस्य भाषां न जानाति, वक्तुं न प्रभवति, परन्तु संस्कृतभाषायाः स्थानं सर्वेषु समुदायेषु सम्मानपूर्णं विद्यते। नेपाले द्विशताधिकानि संस्कृतगुरुकुलानि सन्ति, संस्कृतविद्यालयाः, एकः संस्कृतविश्वविद्यालयः विराजते। एतासु संस्कृतसंस्थासु संस्कृतस्य पठनपाठनं जायते। नेपाले संस्कृतस्य १५००० वक्तारः सन्ति। अनेकेषु कार्येषु संस्कृतस्य प्रयोगोऽपि जायते। सामाजिकसञ्जालेषु च संस्कृतस्य गीतानि श्रूयन्ते, जनाः संस्कृतभाषायां प्रवचनं कुर्वन्ति, छात्राः संस्कृतवाक्कलायां स्वकीयं वचनं स्थापयन्ति। अनेकासु गोष्ठीषु संस्कृतभाषायां कार्यपत्राणि प्रस्तूयन्ते।

अनेकासु पत्रिकासु संस्कृतस्य समाचाराः प्रकाश्यन्ते। गोरखापत्रतः समाचाराः प्रकाश्यन्ते, अनेकस्मात् रेडियोतः समाचाराः विविधकार्यक्रमाः प्रसार्यन्ते। अनेकस्मात् दूरदर्शनात् (टेलिभिजनात्), समाचाराः, वार्ता, गीतानि, नृत्यानि, प्रवचनानि प्रस्तूयन्ते। दक्षिणभारतात् गायतु वा नेपालात् गायतु, कश्मीरात् वदतु वा कन्याकुमारीतः वदतु, बङ्गालाद् गदतु, केरलात् वादयतु वा, संस्कृतं सर्वे शृण्वन्ति, समां श्रद्धां कुर्वन्ति। अतः दक्षिण–एशियायाः भारतवर्षस्य वा द्वितीयां सम्पर्कभाषां कारयितुं शक्यते चेत् सा भाषा संस्कृतमेव भविष्यति।

**दक्षिणपूर्वेशियादेशेषु संस्कृतम्**

पूर्वेशियादेशेषु बर्मा–कम्बोडिया–थाइल्याण्ड–इन्डोनेसिया–सिङ्गापुर–मलेसिया–फिलिपिन्स–लाओस–भियतनाम– तिमोर- लेस्टे–ब्रुनोइनामाख्या एकादशदेशाः सन्ति। एतेषु देशेषु च संस्कृतभाषायाः ब्राह्मीलिपेः सनातनसंस्कृतेश्च प्रभावो दृश्यते। अत्र धर्मस्य, संस्कृतेः, इतिहासस्य भूगोलस्य च विविधता दृश्यते। अत्र कतिपयेषु देशेषु प्राक्तनसमये हिन्दुभूपतयः राज्यं कुर्वन्ति स्म। एतेषु देशेषु बौद्धधर्मस्य प्रभावोऽपि दृश्यते।

बर्मा (म्यानमार) अस्या प्रचीननाम ब्रह्मदेशः आसीत्। हिन्दुराजा हिन्दुजनताश्च आसन्। अधुना बौद्धधर्मसापेक्षदेशो वर्तते। अत्र हिन्दूनां बौद्धानाञ्च उपस्थिति दृश्यते चेत् पञ्चलक्षाधिकाः नेपालिनः तिष्ठन्ति। एवञ्चात्र मन्दिराणि, गुरुकुलानि, विद्यालयाः, सन्तः, महात्मानः, आश्रमाश्च विराजन्ते। द्वौ बौद्धविश्वविद्यालयौ च स्तः, तत्र संस्कृतस्य च पठनपाठनं जयते। तथैवात्र भारतीयानां समुपस्थितिश्च अस्मिन् देशे दृश्यते।। तेऽ हिन्दवो सन्ति। म्यानमार इति ब्रह्मदेशे ८९०००० हिन्दवः सन्ति। तत्र ९।१० हिन्दुमन्दिराणि विलसन्ति। समये समये तत्र रथयात्रापि प्रचलति। ते संस्कारकृत्यं, वर्षकृत्य, नित्यनैमित्तिककृत्यञ्च प्रयुञ्जते, पठने पाठने च संस्कृतस्य प्रयोगं कुर्वन्ति। अतः तत्र संस्कृतं सम्पर्कस्य भाषां कारयितुं शक्यते।

थाइल्याण्ड – सिल्पाकोर्न–विश्वविद्यालये .(क्षउिबपयचल गलष्खभचकष्तथ, द्यबलनपयप) संस्कृतस्य स्नातकस्य स्नातकोत्तरस्य पठनपाठनं भवति। एवञ्च तत्र विश्वविद्यालयस्य प्रतीकचिह्ने (छाप) गणेशस्य चित्रं टङ्कितमस्ति। तत्र गणेशस्य पूजा विधीयते। थाइल्याण्डदेशे ब्रह्मविष्णुमहेश्वराणाञ्च पूजा जायते। तत्र चुलालोङ्गकोर्न (ऋजगबियिलनपयचल गलष्खभचकष्तथ) विश्वविद्यालये, पाली–संस्कृतभाषे च पाठ्येते। तत्र २००५ ख्रीष्टाब्दे ५२६३१ वा ०.०९ प्रतिशतं जनाः हिन्दवः आसन्। २०१० ख्रीष्टाब्दे ४१,८०८ जनता हिन्दवो विराजन्ते स्म। ते पठने पाठने, धार्मिकसांस्कृतिककार्येषु च

संस्कृतस्य प्रयोगं कुर्वन्ति। अतः शनैः शनैः तत्र संस्कृतभाषां सम्पर्कस्य भाषां कारयितुं शक्यते।

कम्बोडिया - कम्बोडियादेशे कदाचित् हिन्दुराजा राजते स्म। एवञ्च ४००० मन्दिराणि विराजन्ते स्म, अधुना च २००० मन्दिराणां स्थानसङ्केतः विहितोऽस्ति। अङ्गकोरमन्दिरं सूर्यबर्मनमहोदयेन राजभवनस्य निकटे खीष्टाब्दस्य ११३०–११५० मध्ये निर्मितमासीत्। इदं मन्दिरं विशालभूभागे प्रसृतमस्ति। अत्र हिन्दुबौद्धयोः समन्वयो दृश्यते। अस्मिन् देशे ९७ प्रतिशतं बौद्धाः निवसन्ति, परन्तु १५००० जनता हिन्दवश्च तिष्ठन्ति तत्र। खमेरविद्रोहेण आङ्गकोरमन्दिरमपि क्षतिग्रस्तमासीत्। शान्तिस्थापनापश्चात् शिक्षायामपि परिमार्जनं विहितमस्ति। बौद्धविद्यालयेषु संस्कृतस्य शिक्षा च दीयते। अष्ट्रेलियाराष्ट्रियविश्वविद्यालयेन संस्कृतसंरक्षणाय सहयोगोऽपि दत्तः। एवञ्च तत्र प्रेहसिंहानुक–राजाबुद्धिष्ट–विश्वविद्यालयस्य ( एचभबज क्ष्जबलयगप च्बवब द्यगममजष्कत ग्लष्खभचकष्तथ¬) च स्थापना विहितास्ति।

इन्डोनेसिया – इन्डोनेसियादेशे ४४,९०,००० जनता हिन्दवः सन्ति। तत्र २७०२०३९०० जनता निवसन्ति। प्रथमशताब्दीतः एवात्र हिन्दुत्वस्य हिन्दूनां च प्रवेशो दृश्यते। तत्र भारते सर्वाधिकं, तदनु नेपाले ततश्च बङ्गलादेशे हिन्दूनां संख्या क्रमशो विद्यते। आविश्वं इन्डोनेसियादेशे हिन्दूनां संख्या चतुर्थक्रमेऽस्ति। बालिनगरे बहूनि मन्दिराणि सन्ति चेत् अन्येषु प्रान्तेषु च मन्दिराणि सन्ति तेषां संख्या पञ्चाशदधिकानि जायते। संस्कृतस्य व्यवस्थितपठनपाठनं तु न दृश्यते परन्तु कुलपरम्परायां किञ्चित् पठन्ति, संस्कृतभारती इति संस्थया च तत्र प्रशिक्षणं दत्तमासीत्। अतः तत्र शनैः शनैः संस्कृतस्य वातावरणं निर्मातुं शक्यते।

मलेसिया – देशेऽपि ५.८ प्रतिशतं जना हिन्दवः, १८ प्रतिशतं बौद्धा तिष्ठन्ति। तत्र हिन्दुमन्दिराणि विराजन्ते। अत्रापि व्यवस्थितरूपेण सर्वकारीयसंस्थासु संस्कृतस्य पठनपाठनं न दृश्यते। संस्कृतभारतीत्यादिसंस्थया प्रशिक्षणं प्रचलदस्ति अतः संस्कृतस्य वातारणं निर्मीयमाणं विद्यते। एतावता कथयितुं शक्यते पूर्वेशियादेशेषु बर्मा–कम्बोडिया–थाइल्याण्ड–इन्डोनेसिया–सिङ्गापुर–मलेसिया–फिलिपिन्स–लाओस– भियतनाम–तिमोर.लेस्टे–ब्रुनोइनामाख्या एकादशदेशाः सन्ति। एतेषु देशेषु सनातनसंस्कृतेः, संस्कृतभाषायाः प्रभावो दृश्यते। एतासां देशानां लिप्यामपि ब्राह्मीलिपेः प्रभावो दृश्यते। एवञ्चात्र बौद्धधर्मसंस्कृतेः प्रभावश्च दृश्यते। कतिपया देशाः बौद्धधर्मप्रधानाः सन्ति। अतः

एतेषु देशेषु च संस्कृतस्य प्रचारप्रसारेण संस्कृतं द्वितीयसम्पर्कस्य च भाषां कारयितुं शक्यते इति मदीया धारणास्ति।

**३. निष्कर्षः**

भारतवर्षे सनातनसंस्कृतेः संस्कृतभाषायाश्च प्रभावो दृश्यते। भारतवर्ष इति कथनेन नेपालभारतादयः दक्षिण–एशियायाः अष्टौ देशाः समायन्ति। प्राचीनभारतवर्षे पूर्वेशियानां कम्बोडिया–थाइल्याण्ड–ब्रह्मदेशादीनाञ्च समावेशो दृश्यते। यज्ञप्रधाना वैदिकसंस्कृतिः। पूजाप्रधाना उत्तरवैदिकसंस्कृतिः। 'एकं सद्विप्रा बहुधा वदन्ति' इति वेदवाक्यस्य सर्वमान्यसिद्धान्तश्चाविश्वं पूज्योऽस्ति। वैदिकसंस्कृतौ वैदिकसाहित्यस्य वेदब्राह्मणकल्पग्रन्थानां प्रभावो दृश्यते चेत् उत्तरवैदिकसंस्कृतौ रामायण–महाभारत–पुराण–स्मृति–तन्त्रग्रन्थानां प्रभावो दृश्यते। द्वे एव संस्कृती सनातनसंस्कृतिशब्देन बुध्येते। भारतवर्षे सनातनसंस्कृतेः संस्कृतभाषायाश्च प्रभावो दृश्यते। बौद्धजैनशिख्खकिरातादयः सनातनधारायामेव समाविष्टाः सन्ति। नेपाले शताधिकाः भारते द्विशताधिकाः भाषाः सन्ति। तासु अधिकांशभाषाः संस्कृतादेव समुद्भूताः। अतः एतासु भाषासु संस्कृतस्य प्रभावो दृश्यते। दक्षिण–एशियादेशेषु संस्कृतस्य सम्मानपूर्णं स्थानमस्ति। परन्तु अत्र आङ्ग्लभाषायाः एव शासनं प्रचलति। आङ्ग्लभाषा एव सम्पर्कस्य प्रथमा भाषास्ति। यदि प्रयत्नं विधीयते चेद् भारतवर्षस्य सम्पर्कस्य द्वितीया भाषा संस्कृतं भवितुं शक्नोति। भारतवर्षस्य द्वितीयां सम्पर्कभाषां संस्कृतं कारयितुं पार्यते।

**सन्दर्भग्रन्थाः**


अग्निहोत्री, प्रभुदयाल (सन् १९६३), पतञ्जली कालीन भारत, पटना : विहार राष्ट्रभाषा परिषद्।

इन्द्राणी, वसुराय (सन् २००३), एनथ्रोपोलोजी द स्टडी अफ मेन, न्यु दिल्ली : सचिन्द एन्ड कम्पनी।

उपाध्याय, बलदेव (सन् १९८०), वैदिक साहित्य और संस्कृति, (पाँ.सं) वाराणसी : शारदा संस्थान।

उपाध्याय, रामजी (सन् १९६६), प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका, इलाहबाद : देवभारती प्रकाशन।

कृष्णकुमार, (सन् २००१), प्राचीन भारतका सांस्कृतिक इतिहास, दिल्ली : श्रीसरस्वती सदन।

गैरोला, वाचस्पति, (सन् १९७५), संस्कृत साहित्य का इतिहास, वाराणसी : चौखम्बा विद्याभवन।

---------- (१९८९), वैदिक साहित्य और संस्कृति, (दो.सं.) बनारस : चौखम्बा प्रकाशन।

चित्राव, सिद्धेश्वरशास्त्री (वि.सं. २०२१), भारत वर्षीय प्राचीन चरित्रकोश, पुना : भारतीय चरित्रकोश मण्डल।

चौधरी, किरन चन्द्र (सन् १९८२), हिस्ट्री अफ एनिसेन्ट इन्डिया, दिल्ली : न्यु सेन्ट्रल बूक एजेन्सी।

ठाकुर, हरिनन्दन (१९६९), नेपाल देश और संस्कृति, पटना : बिहार राष्ट्रभाषा परिषद्।

तिवारी, भोलानाथ, (सन् १९९२) भाषाविज्ञान, इलाहवाद : किताबमहल।

द्विवेदी, शिवबालक, (सन् १९७८) संस्कृत भाषाविज्ञान, रामबाग, कानपुर : ग्रन्थम्।

पाठक, सुशील माधव (सन् १९७९), विश्व की प्राचीन सभ्यताओंका इतिहास, पटना : विहार हिन्दी ग्रन्थ अकादमी।

युनिभर्सिटी अफ नर्थ बङ्गाल (२०१९) सामान्य भाषाविज्ञान, दार्जिलिङ्ग : वेस्टबङ्गाल।

सत्यकेतु विद्यालङ्कार (सन् २००७ ), वैदिक युग, नई दिल्ली : श्री सरस्वती सदन।

सम्पूर्णानन्द (सम्वत् २०२२), आर्यों का आदि देश, इलाहबाद : भारती भन्डार।

सुवेदी, हंसपुरे (२०३७), संस्कृत वाङ्मयः सङ्क्षिप्त अध्ययन, काठमाडौँ : पाठ्यक्रम विकास केन्द्र, त्रिभुवन विश्वविद्यालय।

# आयोजकसंस्थानां परिचयः

## नीति-अनुसन्धान-प्रतिष्ठानम्, नेपालः

नीति-अनुसन्धान-प्रतिष्ठानम्, नेपालः (नेनाप) वैक्रमाब्दस्य २०७२ तमे वर्षे स्थापिता स्वतन्त्र-बह्वायामिक्यनुसन्धानसंस्था चास्ति । या विशेषतो नेपालस्य सामाजिकार्थिकविकासानां विषयान् सम्बोधयितुं प्रतिबद्धा । नेपालस्य स्थानीयं द्विपक्षीयं बहुपक्षीयं तथा वैदेशिकसम्बन्धानां नीतिनाञ्च विषये शोधं कृत्वा परामर्श-प्रदानकार्यं संस्थेयं करोति। सामाजिक-सांस्कृतिक-शैक्षिकार्थिक-विषयाणामन्येषां बहुविधविषयाणां चान्वेषणपूर्वकं नेपालसर्वकारस्य विशेषज्ञैः सहान्तःक्रियाद्वारा देशस्य विकासः कथं कर्तुं शक्यत इति परामर्शयितुमियं संस्था स्थापिताभूत्। नेपालस्य द्वितीया प्रकल्परूपेयं संस्था देशे विदेशेषु च संवाद-गोष्ठी-राजनैतिककार्यक्रमाणाञ्च सञ्चालनार्थं स्थापितास्ति । पुनश्च सामाजिक-शैक्षिकार्थिक-सुरक्षा-संस्कृति-कला-दर्शनादिविविधेषु विषयेष्वनुसन्धानयुक्तानि कार्याणि कृत्वा साहित्यप्रकाशनञ्चेयं संस्था कुरुते ।

## केन्द्रीय-संस्कृत-विश्वविद्यालयः

अस्ति विश्वस्मिन् विश्व एक एव बहुपरिसरीयोऽनन्य-साधारणगुणगणविशिष्टः संस्कृतविश्वविद्यालयः, तस्यैवाभिख्या केन्द्रीयसंस्कृतविश्वविद्यालयः। भारतस्य देहलीनगरस्थ एष विश्वविद्यालयो भारतसर्वकारस्य संस्कृतसम्बद्धनीतीनां योजनानां च कार्यान्वयं कर्तुं सर्वकर्मणां प्रमुखकेन्द्ररूपेण कार्यकरणाय च प्राप्तविशेषाधिकारो विद्यते । एतस्य महत्त्वपूर्णदायित्त्वस्य परिपालनाय भारतसर्वकारस्य शिक्षामन्त्रालयेन सह समन्वयं विधायैष विश्वविद्यालयः प्रयोजनवन्ति सफलानि कार्याणि संविदधाति ।

संस्कृतभाषया तत्साहित्येन च न केवलं भारतवर्षेऽपि तु विदेशेष्वपि बहुभाषाणां विकासे महत्त्वपूर्णं योगदानं कुरुते । “सा प्रथमा संस्कृतिर्विश्ववारा” इत्यादिभिः श्रुतिभिः सम्प्रकाशिता वरेण्या सनातनी

भारतीया संस्कृतिः संस्कृतभाषाया अधिष्ठान एव विकसिता । संस्कृतं भारतवर्षस्य सांस्कृतिकनिधीनाम् अनुपमो भाण्डागारः । अपि चेयं भाषा सामाजिक–भौगोलिक– सांस्कृतिकवैविध्यसम्पन्नस्य महतो भारतवर्षस्यैकतायाः सूत्ररूपेण विराजते । भारतस्य अन्ताराष्ट्रियसम्बन्धदृष्ट्या संस्कृतं मृदुशक्तेर्महत्त्वपूर्णं स्रोतो भवति । संस्कृतं स्वप्राचीनविज्ञानमाध्यमेनाधुनिकविज्ञानाय सैद्धान्तिकं धरातलम् अपि प्रदर्शयति ।

**इन्डिया–फाउन्डेशन**

इन्डिया–फाउन्डेशन नामकं संस्थानं भारतीयराजनैतिक-विषयेष्वान्तरिकस्पर्धात्मकसमस्यास्ववसरेषु च केन्द्रितमेकं स्वतन्त्रमनुसन्धानकेन्द्रमस्ति । समाजस्य सभ्यतायै सम्यक्दृष्ट्या समकालिकभारतस्य वैश्विकसन्दर्भस्य चोन्नतिं कर्तुमेषा संस्था विश्वसिति। स्वातन्त्रस्य वस्तुनिष्ठतायाः शैक्षणिककठोरतायाश्च सिद्धान्तानामाधारेणास्याः संस्थाया उद्देश्यं राष्ट्रियान्ताराष्ट्रिय–महत्त्वाधायक–विषयेषु जागर्तिं जनयितुं विचाराणां प्रस्तूतये सन्नद्धास्ति।

विविधविषयेषु राष्ट्रवादिभारतीयदृष्टेरभिव्यक्तये संस्थेयं प्रयत्नरतास्ति । अस्याः संस्थाया उद्देश्यं यदस्माकं समकालिकसमाजे भारतीयसभ्यतां संस्थापयितुं सहयोगं कर्तुमग्रस्थाने स्थित्वा जनमानसान् सम्भावयितुं प्रेरयितुं च निरन्तरसमुद्योग एव । नवदेहलीनगरे कार्यालये विशेषज्ञानामनेकेषां समर्पितानां सहाय्येन संस्थेयं भारते विदेशेषु च समानविचारयुतानां संस्थानां सहयोगेन च कार्यं कुर्वन्त्यस्तीति स्वलक्ष्यप्राप्तये उद्योगरता वर्तते ।

इत्थं सम्मेलनं सम्यक्तया सम्पन्नमिति सर्वेभ्यो धन्यवादाः सन्तुतमाम्।


अन्ताराष्ट्रियं नेपाल-भारत-संस्कृत-सम्मेलनम्
चैत्रमासस्य १४–१६, २०८० । मार्च २७
। काष्ठमण्डपो नेपालः